# THE BOOK WAS DRENCHED

UNIVERSAL LIBRARY
OU_184462
UNIVERSAL LIBRARY

# THE

# PANCHARÂTRA

OF

# BHÂSA

with the commentary

OF

**PANDIT T. GANAPATI SÂSTRÎ**

Editor of the Trivandrum Sanskrit Series.

**Edited and Published by the Commentator.**

1917.

*All Rights Reserved.*] [PRICE Re. 1-0-0.

PRINTED AT THE

SRIDHARA PRINTING HOUSE, TRIVANDRUM.

॥ श्रीः ॥

# पञ्चरात्रं

महाकविश्रीभासप्रणीतम्

अनन्तशयनसंस्कृतग्रन्थावलिप्रकाशनकार्याध्यक्षेण

पण्डितगणपतिशास्त्रिणा

प्रणीतया व्याख्यया

समेतं

तेनैव संशोधितं प्रकाशितं च ।

---

१९१७.

(एतद्ग्रन्थविषयाः सर्वेऽधिकाराः

व्याख्यातारमन्वायत्ताः ।)

---

मूल्यम् एकं रूप्यकम् ।

अनन्तशयने श्रीधराख्यमुद्रणयन्त्रालये
मुद्रितम् ।

BY GRACIOUS PERMISSION

I DEDICATE

THE COMMENTARY ON THE PANCHARÂTRA OF

THE ILLUSTRIOUS BHÁSA

TO MY AUGUST SOVEREIGN

HIS HIGHNESS

SRI RAMA VARMA

G. C. S. I., G. C. I. E.,

MAHARAJA OF TRAVANCORE

WHOSE ENLIGHTENED MUNIFICENCE

AND APPRECIATION OF GÍRVÁNA LEARNING

RECALLING THE BEST TRADITIONS

OF HIS RENOWNED HOUSE

HAVE AUSPICIOUSLY LED TO THE

RECOVERY CONSERVATION AND PUBLICATION

OF SO MANY OF OUR

PRICELESS CLASSICS.

# INTRODUCTION.

This is the second edition of the Pancharâtra which was published for the first time in the year 1912 as number 17 of the Trivandrum Sanskrit Series. A few beautiful passages and some good readings, found in a second manuscript secured, since the publication of the first edition, from Puthyial Nilakanthan châkyar of Manganam near Kottayam in North Travancore, have now been inserted in this edition. This latter manuscript is on palm-leaf and appears to be many centuries old. For the convenience of students, I have added, to this edition, a lucid commentary, sufficiently elaborate.

The play takes its name Pancharâtra from the period of five nights referred to in the plot, which is briefly as follows:—

The Pândavas after having wandered for 12 years in the forests were living in disguise in the thirteenth year, in pursuance of the agreement with Duryodhana, on their defeat in the gambling match. Drona, the family preceptor of the Kurus, knew the reluctance of Duryodhana to give half the kingdom to the Pândavas even after the expiry of the thirteenth year, and apprehended a fratricidal war between the Pândavas and Duryodhana, likely to end in the entire destruction of the Kuru family. In order to avert this catastrophe he wished to persuade Duryodhana to make friends with the Pândavas by giving them half the kingdom, and was looking for an opportune moment when Duryodhana would listen to his advice. At his instance, Duryodhana performed a sacrifice on a grand scale and at the close of the Avabhritha (the bathing ceremony at the end of a sacrifice) declared in the presence of all assembled that he would give Drona, his preceptor in Dharma and arms, anything he (Drona) might fix as Yajna-Dakshina. Then Drona asked Duryodhana to restore half of his kingdom to the Pândavas; and at the instigation of Sakuni (his maternal uncle) who was all along inimical to the Pândavas, Duryodhana undertook to comply with the demand of Drona provided Drona brought within five nights, news of the whereabouts of the Pândavas.

No doubt Duryodhana hoped that this would prove impracticable to Drona as the Pandavas were then in disguise. The news that all the Kichakas were slain in secret in the capital of Virâta, having just then been received, Drona surmised that the slayer of the mighty Kichakas might be Bhîma and that the Pândavas could probably be found in the capital of Virâta. He therefore accepted the terms at the instance of Bhîshma. Then, under pretext of punishing Virâta for absenting himself from the sacrifice, Bhîshma induced the Kauravas to carry off all his cattle. The combat that ensued enabled Drona to locate the Pândavas, within five nights. Duryodhana thereupon handed over half the kingdom to the Pândavas. The subject matter is given, in extenso, in the कथावस्तुसङ्ग्रह.

The nature of the drama—that it is a Samavakâra—,its Rasa, and the various characters in it are examined in the course of the commentary on the last verse in the work.

The play resembles Svapnavâsavadatta in many respects. In both the plays, the names of the principal characters are implied in the मङ्गलश्लोक. Also, the opening sentence of the Sûtra. dhâra 'अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि', the absence of any reference to the work or the author in the Sthâpanâ स्थापना, and the benedictory expression 'महीं राजसिंहः प्रशास्तु नः' in the Bharatavâkya are common to both. The easy flow of charming, sublime and suggestive words and the graphic description of the real nature of things are alike observable in both. These, as well as many other points of resemblance make it possible to infer that both were written by the same author. As for the author of Svapnavâsavadatta it is known beyond doubt, from the verse ascribed to Râjasekhara, 'भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम् । स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः' ॥ that it was written by Bhâsa, who is praised by Kâlidâsa in the Prastâvanâ of his Mâlavikâgnimitra, 'प्रथितयशसां भाससौमिल्लकविपुत्रादीनां' and by Bâna in the introduction of his Harshacharita, 'सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः । सपताकैर्यशो लेभे भासो देवकुलैरिव । The references by Bâna and Râjasekhara further

suggest that Bhâsa might be an author of a large number of dramas. This conjecture has been proved to be a fact by the discovery and publication in the 'Trivandrum Sanskrit Series, of another eleven plays, which are of the same cast as Svapnavâsavadatta and Pancharâtra and whose mutual resemblances make the conclusion undisputable that all of them were written by the same author.

It has to be noted here that the Subhâshitâvali and other extant anthologies quote some ten verses attributed to Bhâsa. Though none of these are found in any of the thirteen plays we have published, it may, however, be assumed that the source of these verses might be other plays of Bhâsa (than those already discovered), as all the plays of Bhâsa are not yet known. But, I think, most probabably the anthologists might have been led astray by false reports current in their times in attributing these verses to Bhâsa. For instance Somadeva the author of Yasastilaka attributes the verse 'पेया सुरा प्रियतमामुखमीक्षितव्यं ग्राह्यः स्वभावललितो विकृतश्च वेषः । येनेदमीदृशमदृश्यत मोक्षवर्त्म दीर्घायुरस्तु भगवान् स पिनाकपाणिः ॥' to Bhâsa which is in fact found in the farce called Mattavilâsa Prahasana* written by the Pallava King Mahendravikrama Varma I, son of Simhavishnu Varma, who flourished early in the 7th century of the Christian era. The verse, as it occurs in that work, is from a Kâpâlika, and only describes the religious tenets of the Kâpâlika sect which were condemned by the followers of all other creeds. It is however curious to observe that this verse, which the author of Yasastilaka ascribes by mistake to Bhâsa, has led some people to hazard inferences about Bhâsa, that he was a devotee of Siva and the like. †

I am surprised to find that a few have been labouring under an erroneous impression that Bhâsa and Dhâvaka are identical. Bhâsa is described by Kâlidâsa as a very ancient poet in his Mâlavikâgnimitra, while Dhâvaka was only a contemporary

---

* This work will be issued in two months in the Trivandrum Sanskrit Series.

† Vide article 'Mahakavi Sree Bhasa'' by Mr. Pandeya Ramavatara Sarma M. A. in the Sanskrit Magazine "Sarada" Vol. I. No. I. published at Allahabad.

and protege of Harsha, the author of Ratnâvali, as is evident from the well-known line 'श्रीहर्षादेर्धावकादीनामिव धनं' in the Kâvyaprakâsa as well as from the comments thereon 'धावको रत्नावलीनाटिकाप्रणयनसहायः' in the Kâvyaprakasa-Bhrihattîkâ by Sri Vidyâchakravartin. How can these two poets, who flourished in different centuries, be deemed identical ?

The grand and charming beauty with which things are described in exact resemblance to nature, and the choice of simple, apt and felicitous words are features so peculiarly characteristic of these Rûpakas that they outshine Kâlidâsa's and come near, in these respects, to the excellence of the epic poets Vâlmîki and Vyâsa. On this ground alone, the antiquity of Bhâsa could be well established. Though we are not in a position to fix his exact date, it can be affirmed without hesitation that he is prior to the age of Chânakya of the 4th century B. C. as the latter cites, as authority in his Arthasâstra, the verse, नवं शरावं सलिलैः सुपूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम् । तत्तस्य मा भून्नरकं स गच्छेद् यो भर्तृपिण्डस्य कृते न युध्येत् ।' (कौटिलीयार्थ०. १०. ३.) from the Pratijnâyaugandharâyana of Bhâsa. Besides the fact that, in these Rûpakas, there are, here and there, a number of archaic expressions as in the Mahâbhârata and other Ârsha works, which do not conform to the rules of Pânini, brings them down to an age still earlier than Pânini himself. Thus, the status of "Muni" assigned to Bhâsa by Jonarâja in his commentary on Prithvirâjavijaya (1. 3.) becomes quite appropriate. That the dramatic excellence of Bhâsa has been a model for Kâlidâsa, could be well established from the fact that Sâkuntala is mostly adorned with the ideas and expressions, peculiar to Bhâsa. Hence the mention of Bhâsa by Kâlidâsa in his Mâlavikâgnimitra among the illustrious ancients has to be explained as due to the recognition of the debt he owed to Bhâsa. All these topics are elaborately dealt with in my introductions to the Svapnavâsavadatta and the Pratimânâtaka.

TRIVANDRUM,<br>16-3-1917.

**T. Ganapati Sâstri.**

# उपोद्घातः ।

यत्तत् **पञ्चरात्रं** नाम रूपकं मयैकमातृकाश्रयेण संस्कृत्य १९१२ तमे वर्षे **अनन्तशयनसंस्कृतग्रन्थावलौ** सप्तदशाङ्कतया ग्रथितं, तस्येदं द्वितीयं संस्करणम्। सारभूतानां केषाञ्चिद् ग्रन्थांशानां मातृकायामपाठादपपाठाच्च प्रथमसंस्करणे सम्भूतमसौष्ठवमस्मिन् द्वितीये संस्करणे द्वितीयादर्शसाहाय्यान्न्यक्षेण निरस्तम्। द्वितीयो ह्यादर्श एतद्राज्यान्तर्गत**माङ्गानग्राम**वास्तव्यस्य **नीलकण्ठशाक्यार्**महाशयस्य सकाशाद् बहुशतवर्षवृद्धजीर्णतालपत्रसम्पुटसमवेतः पूर्वतरे हायने मया समासादितः। व्युत्पित्सुपरमोपकाराधानकामनया ललितं युक्तिविततं व्याख्यानमप्यत्र मया प्रणीय संयोजितम्।

इदं **पञ्चरात्र**मिति व्यपदिश्यते, **दुर्योधन**कल्पिते समयविशेषे कृतस्य रात्रिपञ्चकात्मकस्य कालस्य प्राधान्यविवक्षणात्। ईदृशं ह्यत्रेतिवृत्तमाश्रितं, यथा—

**द्रोणः** किल कुरुकुलाचार्यो दुर्योधनकपटद्यूतविजितविप्रवासितेषु वने यथासमयं द्वादशवर्षाण्युषित्वा त्रयोदशं वर्षमज्ञातवासेन **विराटपुरे** नयत्सु पाण्डवेषु, दुर्योधनस्याधर्मरतेरायतावपि तेभ्योऽर्धराज्यदाने धर्म्येऽनिच्छामुपलभ्य राज्यनिमित्ते दुर्योधनपाण्डवानां कलहं तेन कुरुकुलक्षयं च भाविनमाशङ्कमानः कुरुकुलक्षेमाय पाण्डवार्धराज्यदानं दुर्योधनेन कथमपि कारयितुं दृढां बुद्धिं बबन्ध; तदनुकूलं च **दुर्योधनस्य** धर्मप्रावण्यावसरं प्रतीक्षाञ्चक्रे। अथ **दुर्योधनेन** कमपि महाक्रतुमाहृत्यावभृथान्ते धर्मधनुराचार्याय **द्रोणाय** तदीप्सितस्य यस्यकस्याप्यर्थस्य यज्ञाङ्गदक्षिणात्वेन दाने प्रतिश्रुते पाण्डवार्धराज्यदानमेव स्वाभीप्सितमर्थं **द्रोणः** शशंस। अथ तदीप्सितं विहन्तुकामस्य पाण्डवद्रोहिणः स्वमातुलस्य **शकुने**र्मते स्थित्वा 'पाण्डवानामज्ञातवासिनां रात्रिपञ्चकेन प्रवृत्त्युपनये भवता कृते तेभ्योऽर्धराज्यं दास्यामि' इत्यपूर्वं कमपि समयमशक्यानुष्ठानत्वबुद्ध्या दुर्योधनः कल्पितवान्। **द्रोणश्च** तत्कालश्रुते विराटपुरवृत्ते महाबलस्य **कीचकशतस्य** निगूढवधे **भीमसेन**कृतत्वबुद्ध्या विराटपुरे पाण्डवप्रवृत्तेरुपलम्भनीयतां सम्भावयन् **भीष्म**वाचा तं समयमभ्युपेयाय; **विराटे** च यज्ञानागमनापराधमपदिश्य तेन सह युद्धं तदीयगोधनग्रहणनिमित्तं कौरवाणां **भीष्मसहायः** प्रवर्तयन् पाण्डववृत्तान्तं पञ्चरात्रेणोपनिनाय। ततो यथाप्रतिज्ञं **दुर्योधनः** पाण्डवेभ्योऽर्धराज्यं ददाविति। विस्तरः **कथावस्तुसंग्रहे** द्रष्टव्यः।

अस्य रूपकस्य समवकारत्वं रसनायकादिकं च ग्रन्थान्तिमपद्यव्याख्यानप्रसङ्गे सम्यङ् निरूपितम् ।

इह १. मङ्गलश्लोके पात्रनाम्नां सूचनम्, २. 'एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग पश्यामि' इति सूत्रधारवाक्यं, ३. स्थापनायां कविकाव्यनामानिर्देशः, ४. भरतवाक्ये 'महीं राजसिंहः प्रशास्तु नः' इति प्रशस्तिकथनम्, ५. उदारसरसव्यङ्ग्यार्थतुन्दिलानां सूक्तिभङ्गीनां प्रतिविषयमनायासप्रसरः, ६. वस्तुस्वभावपरमार्थाविष्करणैकशीलतेत्येवमादिकं **स्वप्नवासवदत्त**वदुपलभ्यते । तेन स्वप्नवासवदत्तकविरेवास्य प्रणेतेत्यवधार्यते । **स्वप्नवासवदत्तस्य** तु कविः "भासनाटकचक्रेऽपिच्छेकैः क्षिप्ते परीक्षितुम् । स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः" इति राजशेखरसूक्तिपर्यालोचनया "प्रथितयशसां भाससौमिल्लकविपुत्रादीनाम्" इति **मालविका**प्रस्तावनायां **कालिदासेन**, "सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः । सपताकैर्यशो लेभे भासो देवकुलैरिव" इति **हर्षचरिते भट्टबाणेन** चोपश्लोकितस्तत्रभवान् **भास** इत्यवगतम् । अस्य बहुनाटकप्रणेतृत्वं भट्टबाणराजशेखराभ्यां यत् संसूचितं, तदप्यस्माभिर्विभावितमेव, यतः स्वप्नवासवदत्तपञ्चरात्रात्यन्तसंवादीन्यविप्रतिपत्तव्यतत्समानकर्तृकत्वानि अन्यान्येकादश रूपकाणि अस्माभिरुपलब्धानि, अनन्तशयनसंस्कृतग्रन्थावलौ च पूर्वं प्रकाशितानि ।

सुभाषितावल्यादौ ये भाससम्बन्धित्वेनोपदशाः श्लोका उक्ताः, तेऽस्मदुपलब्धेषु भासनाटकेषु न दृष्टा यद्यपि, तथापि तेषु ये केचिदस्मदनुपलब्धेषु सुभाषितावल्यादिकारैः कामं दृष्टाः स्युः । बहुत्वमात्रमेव हि भासनाटकानां प्रमाणतोऽवगतम्, ननु सङ्ख्यापरिच्छेदः । वस्तुतस्तु, अनुपलभ्यैवातिचिरलुप्तप्रचारान् भासग्रन्थांस्तेषां श्लोकानां भासीयत्वं सूक्तिसङ्कलयितृभिर्भासीयत्वमिथ्याप्रवादविलम्भवञ्चितैर्नूनं कथितं स्यात् । कथमन्यथा तदन्यतमं

"पेया सुरा प्रियतमामुखमीक्षितव्यं ग्राह्यः स्वभावललितो विकृतश्च वेषः ।
येनेदमीदृशमदृश्यत मोक्षवर्त्म दीर्घायुरस्तु भगवान् स पिनाकपाणिः ॥"

इति श्लोकं पल्लवराजवंश्येन सिंहविष्णुसूनुना भवभूतिप्राचीनेन क्रैस्ताब्दीयसप्तमशतकपूर्वभागजीविना **महेन्द्रविक्रमवर्मणा** प्रणीते **मत्तविलासनाम्नि§ प्रहस-**

§ इदं प्रहसनमस्माभिः संशोध्य भूयिष्ठं मुद्रितम्; अर्वाक् च मासद्वयाद् अनन्तशयनराजकीयसंस्कृतग्रन्थावलौ ग्रथितं प्रकाशिष्यते ।

नरत्ने कापालिकोक्तितया स्थितं यशस्तिलककारः सोमदेवो भाससम्बन्धिनं ब्रूयादिति सुधियो विमृशन्तु । एतेन यदस्मिन् उपहसनीयकापालिकचित्तवृत्तिप्रकाशके प्रहसनश्लोके भाससूक्तित्वं मत्वा भासस्य शिवभक्तत्वमन्यच्च तज्जातीयं सोमदेववचनविस्रम्भात् केनचिद् ‡ उत्प्रेक्षितं, तदनुपादेयं द्रष्टव्यम् ।

भास इति धावक इति च कविरेक उच्यत इति तु कस्यचित् कल्पना । भासो हि कालिदासेन पुराणकाव्यकविरुदीरितः 'पुराणमित्येव न साधु सर्वं' (मालवि० १.) इत्येवं वदता । धावकस्तु रत्नावलीप्रणेतुः श्रीहर्षस्य समकालिकस्तदुपजीवी 'श्रीहर्षादेर्धावकादीनामिव धनम्' इति सुप्रसिद्धात् काव्यप्रकाशवाक्यादधीतः, विद्याचक्रवर्तिना काव्यप्रकाशबृहट्टीकायां 'धावको रत्नावलीनाटिकाप्रणयनसहाय' इति स्पष्टमाख्यातः । कथमनयोर्बहुशताब्दीव्यवहितपूर्वोत्तरकालजन्मनोरैक्यं नाम स्यात् ।§

अस्मिन् रूपकचक्रे प्रतिपदार्थमवभासमाना परमोदाररमणीयानां स्वभावानामाविष्करणशैली ललितोचितचारुपदरचनशैली च कालिदासादिकाव्यशैल्यतिशायिनी महर्षिकाव्यशैल्यदूरविप्रकृष्टा च संलक्ष्यते । अनेनैकेनैव हेतुना प्रकृतरूपकचक्रकवेरतिपुरातनत्वमवसातुं शक्यम् । कोऽसौ तस्य कालः स्यादिति चेद्, न वयं परिच्छेत्तुं शक्नुमः; किन्तु क्रैस्तप्राचीनचतुर्थशताब्द्याश्चाणक्यकालात् स पूर्व इति मुक्तसंशयं ब्रूमः, प्रतिज्ञायौगन्धरायणगतस्य

---

‡ अयं रामावतारो नाम विद्वान् । अस्य भासविषयमीदृशं किमपि वर्णनं प्रयागीयशारदाख्यमासिकपत्रिकायाः प्रथमेऽङ्के द्रष्टव्यम् ।

§ अत्र कश्चिदूहः—बाणसंज्ञः कविरेव बाणशब्दशक्याशुगप्रसिद्धशीघ्रगामित्वधर्मोपचारभङ्ग्या धावकशब्देन शीघ्रगामिवाचिना पुरा व्यपदिष्टः । तथा धावयति विद्रावयति प्रतिकवीन् इति, धावति काव्यनिर्माणसरणौ शीघ्रं गच्छतीति च व्युत्पत्त्या स धावको वक्तुमर्हः । तथा च प्रतिकविविद्रावकत्वं क्षिप्रकाव्यक्रियत्वम् आशुगवाचकबाणशब्दबोध्यत्वमित्येतत्त्रितययोगिनं धर्मिणमेकं शक्तिलक्षणाभ्यां धावकशब्दः प्रतिपादयितुं समर्थ इति कृत्वा स बाणकवौ विदग्धैर्नूनं निवेशितः । ननु धावक इति बाणातिरिक्तः कश्चित् पुरुषविशेष आसीत् । एवं सति 'श्रीहर्षादेर्बाणादीनामिव धनम्' इति काश्मीरिकः पण्डितदुर्गाप्रसाददृष्टः काव्यप्रकाशपाठोऽपि 'धावकादीनामिव' इत्युपदर्शितपाठसमानार्थत्वात् स्वरसत उपपन्नो भवतीति ।

# उपोद्घातः ।

"नवं शरावं सलिलैः सुपूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम् ।
तत् तस्य मा भून्नरकं स गच्छेद्यो भर्तृपिण्डस्य कृते न युध्येत् ॥"

इत्येतस्य **भास**पद्यस्य **चाणक्य**कृते कौटिलीयार्थशास्त्रे (अधि० १०. अध्या० ३) प्रमाणीकरणात् । भासनाटकेषु तत्र तत्र **पाणिनि**लक्षणाननुरोधस्य **व्यास**कृताविव दर्शनात् **पाणिने**रपि स प्राचीन इत्यनुमातुं शक्यम् । एवं च पृथ्वीराजविजयकाव्यव्याख्याने **जोनराजेन** 'भासमुनेः काव्यम्' (स० १. श्लो०. ३.) इति वदता प्रकाशिता मुनित्वप्रथापि **भासस्य** युज्यते । प्रकृतरूपकचक्रनानाभङ्ग्यनुकारस्य **शाकुन्तले** दर्शनात् **कालिदासो**पजीव्यकाव्यवैभवत्वं **भासस्य** विभाव्यते । तेन स्वोपजीव्यबहुमानात् **कालिदासेन भासः** पुराणकविश्लाघाप्रसङ्गेऽवश्यस्मरणीय एव सन् **मालविकायां** स्मृतो वेदितव्यः ।

तदेतत् सर्वं **स्वप्नवासवदत्त-प्रतिमानाटकयो**रुपोद्घातेऽस्माभिर्वितत्य निरूपितम् ।

अनन्तशयनम्
१६.३.१९१७

त. गणपतिशास्त्री.

# कथावस्तुसंग्रहः ।

भीष्मद्रोणौ नाम कुरुकुलक्षेमकामौ पाण्डवाज्ञातवासनिस्तारानन्तरं तेभ्योऽर्धराज्यसंविभागं दुर्योधनेन कारयितुं यावच्छक्ति प्रयत्नमास्थिताविति, स न फलित इति च कथा महाभारते प्रसिद्धा । महाकविस्तु कुरुकुलकृपैकमय्यास्तयोश्चित्तवृत्तेरनुरूपं महाभारतानाख्यातमेव कमपि प्रयत्नमीप्सितफलोपहितमिह कथावस्तु कल्पयांबभूव—द्रोणो हि भीष्मसहायः क्रतुं कमपि दुर्योधनेनानुष्ठाप्य तदवसानकरणीयाचार्यदक्षिणात्वेन पाण्डवार्धराज्यसंविभागं वरयन् साधितवानिति ।

हास्तिनपुरानतिनिकटे क्वचिद् गङ्गाकूलजुषि पुण्यारण्ये दुर्योधनस्य यज्ञारम्भः, तद्वैभवं, यज्ञान्ते शालाग्निसन्दीपनम्, अवभृथस्नानं, क्रतुव्रतानुष्ठानजन्याचित्तशान्तिसन्तुष्टस्य दुर्योधनस्य दर्शनेन द्रोणभीष्मयोः परितोषः, द्रोणभीष्मादीनां यथायथमभिवादनादिना सम्भावनं, द्रोणं प्रत्यभीष्टदक्षिणाप्रतिग्रहप्रार्थनम्, उदकपूर्वदक्षिणादानप्रतिज्ञया द्रोणहृदयविश्वासोत्पादनं, ततो द्रोणेन पाण्डवार्धराज्यसंविभागस्येष्टदक्षिणात्वेन कीर्तनं, दक्षिणादानप्रतिबन्धकः शकुनिकलहः, शकुनिपरिसान्त्वनं, शकुनिच्छन्दानुवर्तिना दुर्योधनेन 'अज्ञातवासिपाण्डवप्रवृत्तिः पञ्चरात्रेण यद्युपनीयते, तदा पाण्डवेभ्योऽर्धराज्यं दद्याम्' इत्यपूर्वसमयपरिकल्पनं, विराटवार्ताहरयदृच्छानिवेदितस्य महाबलकीचकवधस्य भीमकृतत्वबुद्ध्या विराटपुरे पाण्डवप्रवृत्त्युपलम्भसौकर्यं रहसि बोधितवतो भीष्मस्य प्रेरणया द्रोणेन पञ्चरात्रसमयाङ्गीकरणं, यज्ञानागमनापराधाद्यपदेशेन गोग्रहणार्थे विराटं प्रति भीष्मद्रोणदुर्योधनादीनामभिषेणनं च प्रथमाङ्के वस्तु ।

अथ भटेन विराटाय गोग्रहणनिवेदनं, कौरवानभियोद्धुं प्रतिष्ठासुना विराटेन बृहन्नलासारथेरुत्तरस्य युद्धरङ्गगमनश्रवणं, बृहन्नलासारथ्यप्रभावाच्छत्रुजयावश्यम्भावं वदता कपटमस्करिणा युधिष्ठिरेण विराटसम्भ्रमप्रशमनम्, उत्तरारब्धे युद्धे द्रोणभीष्मादिभङ्गस्य धार्तराष्ट्रापयानस्य च विज्ञानं, विराटसूदवेषभीमकृतस्य धार्तराष्ट्रसाहाय्यागताभिमन्युग्रहणस्य प्रियस्य श्रवणम्, अभिमन्युं सभामानयतोर्भीमार्जुनयोर्लीलाक्षेपोक्तिकदर्थिताभिमन्युरोषभाषितश्रवणानन्दनिर्वेशः, अथ बृहन्नलावेषच्छन्नात्मनार्जुनेनैव कौरवाः पराजिता इत्यर्जुनवृत्तान्तयाथात्म्यस्य सभागतेनोत्तरेण विराटाय निवेदनम्, अर्जुनेन मस्करिसूदवेषयोर्युधिष्ठिरभीमसेनयोर्विराटाय तत्त्वाख्यानम्, अज्ञातवासप्रतिज्ञानिस्तारान्तोपनताभ्यां शत्रुजयपुत्रसमागमाभ्युदयाभ्यां सुप्रीतान् पाण्डवान् सत्कृत्याभिनन्दता विराटेन गोग्रहणविजयशुल्कार्थे दत्ताया

## कथावस्तुसंग्रहः ।

उत्तरायाः स्वपुत्रार्थेऽर्जुनेन प्रतिग्रहणम्, उत्तराविवाहकार्यं निवेदयितुं तदर्थं राजमण्डलमाह्वातुं च युधिष्ठिरेणादूरसन्निहिताय स्वपितामहाय उत्तरस्य प्रेषणमिति द्वितीयाङ्के प्रतिपाद्यम् ।

अथार्जुनबाणभग्नापयाते कौरवानीकेऽभिमन्युसूतेन भीष्मादिभ्यस्तद्ग्रहणनिवेदनम्, तेषां तन्मोचनोद्यमाचिकीर्षा, अभिमन्युग्राहिणः पुरुषस्यातिजवत्वातिबलत्वाभ्यां सूतबोधिताभ्यां भीमसेनत्वं निश्चिन्वता भीष्मेणाभिमन्युमोचनोद्यमवारणं, भीष्मसूतानीते भीष्मध्वजधर्षिणि क्वचिद् बाणेऽर्जुननामाङ्कस्य शकुनिना वाचनं, तावतापि पाण्डवप्रवृत्त्युपनयममन्यमाने शकुनौ तदनुवर्तिना दुर्योधनेन युधिष्ठिरदर्शनापेक्षणं, तदात्वसन्निहितेनोत्तरेण युधिष्ठिरसन्देशस्योत्तराविवाहसम्बद्धस्य निवेदनम्, इत्थं पञ्चरात्रेण पाण्डवप्रवृत्त्युपनये द्रोणेन साधिते पाण्डवार्धराज्यदानस्य दुर्योधनेन यथाप्रतिज्ञमभिनिर्वर्तनमिति तृतीयाङ्के वस्तु ॥

---

# पात्राणि ।

| | |
|---|---|
| अभिमन्युः | अर्जुनस्य पुत्रः । |
| अर्जुनः | युधिष्ठिरभ्राता । |
| उत्तरः | विराटस्य पुत्रः । |
| कर्णः | अङ्गेश्वरो दुर्योधनस्य सखा । |
| काञ्चुकीयः | विराटस्य कञ्चुकी । |
| गोमित्रकः | कश्चिद् गोपालः । |
| दुर्योधनः | हास्तिनेश्वरः । |
| दूतः | विराटस्य वार्ताहरः । |
| द्रोणः | दुर्योधनादीनाम् आचार्यः । |
| प्रथमः द्वितीयः तृतीयः | यज्ञार्थमागता ब्राह्मणाः । |
| बृहन्नला | तन्नामा षण्डवेषोऽर्जुनः । |
| भगवान् | ब्राह्मणव्यञ्जनो युधिष्ठिरः । |
| भटः | भृत्यः दुर्योधनस्य विराटस्य च । |
| भीमसेनः | युधिष्ठिरभ्राता । |
| भीष्मः | दुर्योधनादीनां पितामहः । |
| राजा | मत्स्यदेशाधिपतिर्विराटनामा । |
| वृद्धगोपालकः | गोकुलाध्यक्षः । |
| शकुनिः | दुर्योधनस्य मातुलः । |
| सूतः | सारथिः विराटस्य अभिमन्योः भीष्मस्य च । |

॥ श्रीः ॥

श्रीगणेशाय नमः ।

# महाकविश्रीभासप्रणीतं

# पञ्चरात्रं

## गणपतिशास्त्रिप्रणीतया व्याख्यया समेतम् ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

**सूत्रधारः** —

**द्रोणः** पृथिव्यर्जुनभीमदूतो यः **कर्ण**धारः **शकुनीश्वर**स्य ।
**दुर्योधनो भीष्मयुधिष्ठिरः** स पायाद् **विराडुत्तरगोऽभिमन्युः** ॥ १ ॥

---

वन्देऽहं विघ्नराजं च वाग्देवीं च पुनः पुनः ।
पूर्यन्ते यत्कृपालेशान्मङ्क्षु नम्रमनोरथाः ॥ १ ॥

श्रीभासरूपकस्तोमे व्याख्यां नानारसाश्रये ।
कुर्वे समवकारस्य पञ्चरात्रस्य साम्प्रतम् ॥ २ ॥

**अथ** श्रीवाल्मीकिव्यासदेश्यस्तत्रभवान् **श्रीभासः पञ्चरात्र**संज्ञं रङ्गप्रयोगप्रधानं रूपकं चिकीर्षुः तदारम्भे प्रयोगसम्यङ्निष्पत्त्यादिपरिपन्थिदुरितप्रशमौपयिकं पूर्वरङ्गप्रधानाङ्गं मङ्गलश्लोकपाठम् उपक्रम्यमाणप्रयोगस्य कथावस्त्वंशस्य निवेदनं च प्रयोगनिर्वाहधूर्वहेण सूत्रधारेण रङ्गे प्रथमसमाचरणीयं पश्यन् सूत्रधारस्य प्रवेशं तावदाह—**नान्द्यन्ते ततः प्रविशति सूत्रधार** इति । नान्द्यन्ते नन्दिरानन्दः, तस्या इयं नान्दी गीतवाद्यवादनादिरूपा क्रिया, तस्या अन्ते अवसाने । सा हि प्रयोगारम्भात् प्राग् देवतापरिषदानन्दार्थानुष्ठीयते । यद्यप्युक्तव्युत्पत्त्या देवस्तावकमङ्गलश्लोकपाठोऽपि नान्दी भवति, तथापि सा श्लोकनान्दी सत्काव्यरूपत्वाद् रङ्गप्रयोगयोग्या रङ्ग एव प्रयोक्ष्यत इति तदतिरिक्तैव नान्दीह ग्राह्या । ततः तदनन्तरं गीतवाद्यवादनादिक्रियापरिसमाप्त्यव्यवहितोत्तरकाले इत्यर्थः । सूत्रधारः सूत्रं प्रयोगानुष्ठानं धारयति निर्वाहयतीति सूत्रधारः । प्रविशति अर्थाद् रङ्गम् ॥

(परिक्रम्य) एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग! पश्यामि ।

---

प्रविष्टः सूत्रधारो मङ्गलमाचरति—द्रोण इति । द्रोणः कृष्णकाकसदृशः कृष्णवर्णसादृश्याद् द्रोणत्वरूपणम् । पृथिव्यर्जुनभीमदूतः पृथिव्या भूम्या हेतुना पृथिव्यां विषये वा अर्जुनभीमयोः धनञ्जयभीमसेनयोर्दूतः तयोर्दुर्योधनसकाशात् पृथिवीलाभार्थमङ्गीकृतदूत्य इत्यर्थः। 'अर्जुनभीष्म' इति ग्रन्थान्तरे पाठः। यः, शकुनीश्वरस्य पक्षिराजस्य वाहनभूतस्य गरुडस्य। कर्णधारः नियामकः। भवतीति शेषः। दुर्योधनः दुष्करं शत्रुभिः योधनं युद्धं यस्य स तथाभूतः। अप्रतिरथ इत्यर्थः। भीष्मयुधिष्ठिर इति पाठः। भीष्मश्च युधिष्ठिरश्चेति विशेषणोभयपदकर्मधारयः। भीष्मः दुर्जनभयङ्करः युधिष्ठिरः युद्धे स्थिरश्चेति तदर्थः। युधिष्ठिरशब्दस्य विशिष्टसंज्ञिवाचिन इह लक्षणयावयवार्थमात्रे वृत्तिः। 'भीमयुधिष्ठिरः' इति ग्रन्थान्तरे पाठः। उत्तरगः उत्तरं प्रशस्तं पन्थानं कार्यं वा गच्छति आश्रयति आचरति वा उत्तरगः। मन्युं यज्ञम् अभिगतः अभिमन्युः यज्ञकर्माराध्यत्वात्। सः विराट् आदिपूरुषः श्रीकृष्णः। पायाद् रक्षतात्। अर्थात् प्रेक्षकान् प्रयोक्तॄंश्च। रक्षणं चेह तेषामुभयेषामभीष्टार्थसिद्धया योजनम्। एतदेव मङ्गलं तन्त्रेण काव्यनिर्विघ्नपरिसमाप्त्यर्थमपि भवतीति सर्वविधमङ्गलसिद्धिः। अत्र द्रोणादिशब्दसंश्लेषणादेतद्रूपककथाविषयाणां द्रोणार्जुनभीमसेनकर्णशकुनिदुर्योधनभीष्मयुधिष्ठिरविराटोत्तरगोग्रहणाभिमन्यूनां सूचनं मुद्रालङ्कारभङ्ग्या कृतम्। तत्र विराडिति शब्दैकदेशलक्षणया विराटो बोद्धव्यः। दुर्योधन इत्यत्र दुष्करपदघटककरशब्दस्य 'प्रादिभ्यो धातुजस्य—' (वा० २.२.२४) इति लोपः। इयं द्वादशपदा नान्दी ॥ १ ॥

एवमाशिषाभिमुखीकृतान् सामाजिकान् प्रति उपक्रंस्यमानकथावस्त्वंशविज्ञापनं प्रतिजानीते—एवमित्यादि। एवम् अनेन बुद्धिस्थेन प्रकारेण। आर्यमिश्रान् पूज्यतमान्। विज्ञापनप्रतिज्ञाश्रवणसमनन्तरमेव सूत्रधारस्येङ्गितं गृहीत्वा तद्वर्ग्यैर्विज्ञाप्यवस्तुप्रयोगोपक्रमसूचकः शब्दो नेपथ्ये समुत्थापितः। सूत्रधारस्तु अस्यार्थस्याज्ञानाभिनयचमत्कारेण तटस्थ इव तं शब्दं गृह्णन्नाह—अये इत्यादि। अये इति विषादे कोपे वा। स च शब्दे विज्ञापनविघ्नत्वबुद्ध्यभिनयात्। किन्नुखलु किं कारणम्। मयि विज्ञापनव्यग्रे सति विज्ञापनव्यासक्तमात्रे सति। शब्द इव विशेषाकारेणानिश्चितः शब्दः, इवपदस्यानिश्चयार्थत्वात्। पश्यामि शब्दस्य विशेषाकारं निमित्तं च परीक्ष्य ज्ञास्यामि। अङ्गेति दर्शनविषयं सम्भ्रमं सूचयति ॥

(नेपथ्ये)

अहो कुरुराजस्य यज्ञसमृद्धिः ।

**सूत्रधारः**—भवतु, विज्ञातम् ।

सर्वैरन्तःपुरैः सार्धं प्रीत्या प्राप्तेषु राजसु ।
यज्ञो दुर्योधनस्यैष कुरुराजस्य वर्तते ॥ २ ॥

(निष्क्रान्तः ।)

**स्थापना ।**

---

शब्दस्य विशेषाकारनिश्चयाय श्रवणापेक्षायां तस्य नेपथ्ये प्रवृत्तिं कविः स्ववाक्येन सूचयति—**नेपथ्य** इति । वक्ष्यमाणाकारः शब्दो नेपथ्ये प्रवृत्त इत्यर्थः । शब्दस्याकारमाह—**अहो** इति । कुरुराजस्य दुर्योधनस्य । यज्ञसमृद्धिः यज्ञवैभवम् । अहो आश्चर्यं, न क्वचिदीदृशी यज्ञसमृद्धिर्दृष्टपूर्वेत्यर्थः ॥

**भवत्विति** । भवतु शब्दस्य भवनं प्राप्तावसरं, लोटः प्राप्तकालार्थत्वात् । प्राप्तावसरत्वोक्त्या च शब्दस्य विज्ञाप्यवस्तुसम्बद्धत्वं प्रत्यायितम् । विज्ञातम् अवगतम् अर्थाच्छब्दस्य निमित्तम् ।

तदेव विवृणोति—**सर्वैरिति** । राजसु, सर्वैः निरवशेषैः अवर्जितापत्यपरिजनपरिच्छदैरित्यर्थः । अथवा सर्वप्रकारैरभिषिक्तैर्भोगार्थैश्चेत्यर्थः । अन्तःपुरैः सार्धम् अवरोधवधूभिः सह । प्रीत्या यज्ञविषयया दुर्योधनविषयया च । प्राप्तेषु सत्सु । कुरुराजस्य कुरूणां तन्नामकजनपदविशेषस्य राज्ञः । दुर्योधनस्य, यज्ञः, वर्तते । एतदेव तच्छ्लाघापरस्यास्य शब्दस्योत्थाने कारणमिति तात्पर्यम् ॥ २ ॥

विज्ञाप्यविज्ञापनस्य तथाविधशब्दोत्थापकपात्रसन्निधानसूचनेन गतार्थतां मन्यमानस्य सूत्रधारस्य निष्क्रमणमाह—**निष्क्रान्त इति** । **स्थापनेति** । कुरुराजयज्ञसमृद्धिप्रेक्षकतच्छ्लाघापरपात्रप्रवेशरूपस्य कथावस्त्वंशस्य स्थापनात् प्रस्तावनात् स्थापना । स्थापना प्रस्तावनेति पर्यायौ । यद्यपि 'सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् । स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत् तदामुखम् ॥' इत्युक्तलक्षणस्यामुखस्यैव प्रस्तावना स्थापनेति प्रकारद्वयं वर्णयन्ति, यदाह रसार्णवसुधाकरः—'प्रस्तावना स्थापनेति द्विधा स्यादिदमामुखम् । विदूषकनटीपारिपार्श्विकैः सह सल्लँपन् । स्तोकवीथ्यादिसहितान्यामुखाङ्गानि सूत्रभृत् । योजयेद् यत्र नाट्यज्ञैरेषा प्रस्तावना

(ततः प्रविशन्ति ब्राह्मणास्त्रयः ।)

**सर्वे**—अहो कुरुराजस्य यज्ञसमृद्धिः ।

**प्रथमः**—इह हि,

द्विजोच्छिष्टैरन्नैः प्रकुसुमितकाशा इव दिशो
हविर्धूमैः सर्वे हृतकुसुमगन्धास्तरुगणाः ।
मृगैस्तुल्या व्याघ्रा वधनिभृतसिंहाश्च गिरयो
नृपे दीक्षां प्राप्ते जगदपि समं दीक्षितमिव ॥ ३ ॥

---

स्मृता । सर्वामुखाङ्गवीथ्यङ्गसमेतैर्वाक्यविस्तरैः । सूत्रधारो यत्र नटीविदूषकनटादिभिः । सल्लँपन् प्रस्तुतं चार्थमाक्षिपेत् स्थापना हि सा ॥' (विलासः २) इति, तथापि तयोर्भेदलक्षणाननुगमादामुखत्वाविशेषाच्चैक्यं बोद्धव्यम् ॥

स्थापनायां कविकाव्यनामानुत्कीर्तनं तदुत्कीर्तनसमुदाचारप्रवृत्तिकालादस्य रूपकस्य प्राचीनत्वं गमयति । अस्य नामधेयं **पञ्चरात्र**मिति, 'पञ्चरात्रमवसितम्' इत्यादर्शग्रन्थान्ते लेखनात् । इह पञ्चरात्रशब्देन पञ्चरात्रसाध्यं कार्यं लक्ष्यते । तच्चाज्ञातवासिपाण्डवप्रवृत्तेः पञ्चरात्रेणोपनयः । स खल्वाचार्येण द्रोणेन यज्ञदक्षिणात्वेन वृतस्य पाण्डवार्धराज्यसंविभागस्यानुष्ठानं प्रत्युपाधिर्दुर्योधनेन कल्पितो द्रोणेनाङ्गीकृतश्च विस्तरेण वक्ष्यते । तस्मिन्नेतस्मिन् रूपकेतिवृत्तफलांशस्य दुर्योधननिर्वर्तनीयस्य पाण्डवार्धराज्यसंविभागस्य परमसाधने द्रोणनिर्वाह्ये रात्रिपञ्चकात्मककालावधेः प्राधान्याद् युक्तस्तद्बोधकेन पञ्चरात्रशब्देनास्य रूपकस्य व्यपदेशः । अस्य प्रणेता तु **श्रीभास** इति **स्वप्नवासवदत्तो**पोद्घाते निरूपितम् । रसादिकं पुनर्ग्रन्थान्ते विवरीष्यामः ॥

अथ स्थापनानन्तरं वर्तिष्यमाणकथांशसूचनाय विष्कम्भस्यारम्भः । तत्र सूचितेषु यज्ञसमृद्धिश्लाघनपरेषु जनेषु प्रकृतोपयोगानुगुणं त्रीन् प्रवेशयति—**ततः प्रविशन्ती**त्यादि । ब्राह्मणा इत्यौचित्याद् वचनं, धर्मवैभवश्लाघारसिकतायास्तेषु स्वर्गसिद्धत्वात् ॥

**सर्वे** इत्यादि । सर्वे त्रयोऽपि । वदन्तीति शेषः ।

**इह हि द्विजे**ति । इह हि यज्ञभूमौ । दिशः, द्विजोच्छिष्टैः ब्राह्मणभुक्तशिष्टैः । अन्नैः, प्रकुसुमितकाशा इव प्रकुसुमिताः प्रकर्षेण पुष्पिताः काशास्तृणविशेषा यासु तास्तथाभूता इवेत्युत्प्रेक्षा । दृश्यन्त इति शेषः । एतेनान्नानां बाहुल्यं

द्वितीयः — सम्यग् भवानाह ।

तृप्तोऽग्निर्हविषामरोत्तममुखं तृप्ता द्विजेन्द्रा धनै-
स्तृप्ताः पक्षिगणाश्च गोगणयुतास्ते ते नराः सर्वशः ।
हृष्टं सम्प्रति सर्वतो जगदिदं गर्जन्नृपे सद्गुणै-
रेवं लोकमुदारुरोह सकलं देवालयं तद् गुणैः ॥ ४ ॥

---

दिशि दिशि राशीकृतत्वं च द्योतितम् । सर्वे तरुगणाः, हविर्धूमैः हुतहविर्दाहका-लभवैर्धूमैः । हृतकुसुमगन्धाः उपात्तपुष्पसौरभाः । दृश्यन्ते । एतेन द्विजभोज्यसमृद्धिवद् अग्निभोज्यसमृद्धिरुक्ता । व्याघ्राः, मृगैः हरिणैः । तुल्याः समानाः, अपेतहिंसारसतया हरिणवद् विस्रम्भणीया इत्यर्थः । चरन्तीति शेषः । गिरयश्च परिसर-पर्वतकाश्च । वधनिभृतासिंहाः वधे ताडनेऽपि परकृते निभृता निर्विकारा अकोपनाः सिंहा येषु ते तथाभूताः । अथवा वधे प्राणिहनने निभृता अचपलाः सिंहा येषु ते तथाभूताः । दृश्यन्ते । एतेन यज्ञभूमेः प्रशान्तसत्त्वाश्रयतया धर्मानुष्ठानयोग्यस्थानत्वमुक्तम् । हिंस्रेष्वपि जन्तुषु शान्तिगुणदर्शनादुत्प्रेक्षते—नृपे राज्ञि दुर्योधने । दीक्षां प्राप्ते सति कामक्रोधत्यागमितमेध्याशनोपवासादिविषयं नियमम् आस्थिते सति । दीक्षा हि कायक्लेशहेतुर्यज्ञकालेऽपेक्षिता, यदाहापस्तम्बः—'यदा वै दीक्षितः कृशो भवत्यथ मेध्यो भवति ......... यदास्य त्वचास्थि सन्धीयतेऽथ मेध्यो भवति, पीवा दीक्षेत कृशो यजेत' इति । समं सर्वम् अथवा युगपत् । जगदपि तत्स्था जन्तवोऽपीत्यर्थः । दीक्षितमिव संजातदीक्षमिव कामक्रोधादित्यागलक्षणं नियममास्थितमिवेत्यर्थः, पाल्यानां पालकचरितानुवर्तनौचित्यादिति भावः ॥ ३ ॥

सम्यगिति । भवान्, सम्यग् युक्तम् । आह ।

सम्यक्त्वमुपपादयति — तृप्त इति । अमरोत्तममुखम् अमरोत्तमानां देव-श्रेष्ठानाम् इन्द्रादीनां मुखं हविर्ग्रहणद्वारभूतः 'अग्निमुखा वै देवाः' इति श्रुतेः । अग्निः, हविषा, तृप्तः । द्विजेन्द्राः विप्रश्रेष्ठाः । धनैः यजमानदत्तैः हिरण्यवस्त्रा-दिभिः । तृप्ताः । गोगणयुताः गोगणेन पशुबृन्देन सहिताः । पक्षिगणाः । ते ते तत्तद्वर्णजातिप्रभवा अद्विजा अपीत्यर्थः । नराश्च मनुष्याश्च । सर्वशः सर्वैः अभ्यव-हार्यादिभिरिष्टवस्तुभिः करणैरित्यर्थः । तृप्ताः । नृपे राज्ञि । विद्यमानैरिति शेषः । सद्गुणैः प्रशस्तैर्गुणैः सर्वतृप्तिकरत्वलक्षणैः । गर्जत् स्वधन्यतागर्वमुखरं, नृपगतस-द्गुणकीर्तनमुखरं वा । इदं जगद् मनुष्यभुवनं । सम्प्रति वर्तमाने यज्ञसमये । सर्वतः

**तृतीयः** — इमेऽत्रभवन्तो द्विजातयः,

राज्ञां वेष्टनपट्टघृष्टचरणाः श्लाघ्यप्रभूतश्रवा
वार्द्धक्येऽप्यभिवर्धमाननियमाः स्वाध्यायशूरैर्मुखैः ।
विप्रा यान्ति वयःप्रकर्षशिथिला यष्टित्रिपादक्रमाः
शिष्यस्कन्धनिवेशिताञ्चितकरा जीर्णा गजेन्द्रा इव ॥ ५ ॥

**सर्वे** — भो भो माणवकाः! भो भो माणवकाः! अनवसितेऽवभृथस्नाने न खलु तावदग्निरुत्स्रष्टव्यो भवद्भिः ।

---

सर्वैः प्रकारैः । हृष्टं मुदितम् । एवम् इत्थं सर्वप्रकारानन्दलाभे सति । तद् मनुष्यभुवनं । देवालयं देवावासभूतं । सकलं, लोकं स्वर्गादिकं । गुणैः सर्वविधानन्दसाधनसम्पन्नत्वरूपैः । उदारुरोह अतिशिश्ये । अत्र पक्षिगणाश्चेत्यत्र चकारो भिन्नक्रमः नरैः सम्बध्यते । सर्वशः इति सर्वशब्दात् करणकारकवृत्तेः 'बह्वल्पार्थाद्—' (५-४-४२) इति शस्प्रत्ययः ॥ ४ ॥

इमे इति । इमे दृष्टिविषयाः । द्विजातयः ब्राह्मणाः । अत्रभवन्तः पूज्याः । इतराभ्योऽपि दृश्यन्ते' (५-३-१४) इति प्रथमान्ताद् भवच्छब्दयोगे त्रल् ।

पूज्यतामुपपादयति — राज्ञां यज्ञार्थमागतानां । वेष्टनपट्टघृष्टचरणाः वेष्टनपट्टेन उष्णीषकौशेयेन घृष्टौ चरणप्रणामसंरम्भवशात् संस्पृष्टौ चरणौ पादौ येषां ते तथाभूताः । श्लाघ्यप्रभूतश्रवाः श्लाघ्यः प्रशंसनीयः प्रभूतः बहलः श्रवः ख्यातिः शास्त्रश्रवणं वा येषां ते तथाभूताः । वार्द्धक्येऽपि वृद्धकभावेऽपि । नियमनिर्बन्धनिस्सहेऽपि वयसीत्यर्थः । अभिवर्धमाननियमाः, स्वाध्यायशूरैः मुखैः उपलक्षिताः, वृद्धभावेऽपि तारुण्यवदेषां वेदाध्ययनशूरत्वं नापेतमिति भावः । वयःप्रकर्षशिथिलाः वयःप्रकर्षेण जरया शिथिलाः जर्जरशरीराः । यष्टित्रिपादक्रमाः यष्ट्या लगुडेनावलम्बनार्थेन तृतीयपादस्थानीयेन त्रिपादक्रमाः त्रिचरणन्यासाः । शिष्यस्कन्धनिवेशिताञ्चितकराः शिष्यस्य स्कन्धे निवेशितः अञ्चितः पूजितः करो येषां ते तथाभूताः । विप्राः ब्राह्मणाः । जीर्णा गजेन्द्रा इव वृद्धा महागजा इव । यान्ति गच्छन्ति । महत्त्वबहुमान्यत्वादिना गजोपमा ॥ ५ ॥

समाप्ते यज्ञे कृतकार्यत्वाद् यज्ञशालाया अग्निना सन्दीपनं सामुदाचारिकम् । अवभृथस्नाने च निर्वृत्ते यज्ञसमाप्तिः । तदेतदवभृथस्नाने वर्तमान एवारभमाणान् बटूंस्तत्रापलाद् वारयन्ति — **भो भो** इत्यादि । माणवकाः! बटवः! । ब्राह्मणसं-

**प्रथमः** — हा धिग्, दर्शितमेव तावद् वटुचापलम्।

एषा भो! दीप्तयूपा कनकमयभुजेवाभाति वसुधा
चैत्याग्निर्लौकिकाग्निं द्विज इव वृषलं पार्श्वे न सहते।
नात्यर्थं प्लुष्टपृष्ठा हरितकुशतया वेदी परिवृता
प्राग्वंशं चैष धूमो गज इव नलिनीं फुल्लां प्रविशति ॥ ६ ॥

---

भ्रमाद् द्विरुक्तिः। अवभृथस्नाने अवभृथो यज्ञदीक्षान्तः तदङ्गे स्नाने। अनवसिते सति आरब्धेऽप्यपरिसमाप्ते सति। भवद्भिः, अग्निः, नखलु तावदुत्स्रष्टव्यः नैव दातव्यः, अर्थाद् यज्ञशालायां, द्वित्रैः क्षणैरवसिते तु तस्मिन् कामं स उत्सृज्यतामित्याशयः॥

करणसमकालमेव वटुभिरग्निमुत्सृष्टं दृष्ट्वाह — हेत्यादि। हाधिगिति निन्दायाम्। दर्शितमेव अर्थान्माणवकैः। वटुचापलं वटुसाधारणं चपलकर्म अप्राप्तकालाग्न्युत्सर्गलक्षणम्।

अग्निदाहं वर्णयति — एषेति। भोः! भो इति संबोधने। दीप्तयूपा दीप्तः ज्वलितः यूपः यज्ञस्तम्भः दीर्घाकारः पलाशादिदारुविकारः निखातो यस्यां सा तथाभूता। एषा वसुधा इयं यज्ञवाटभूमिः। कनकमयभुजेव कनकमयः सुवर्णमयः भुजः बाहुः यस्याः सा तथाभूतेव। आभाति प्रकाशते। यूपस्य दैर्घ्ययोगाद् ज्वलितत्वदशायां स्वर्णवर्णत्वाच्च सौवर्णभुजसाम्यं, तेन कनकमयभुजत्वोत्प्रेक्षोपपत्तिः। चैत्याग्निः चैत्यं यज्ञस्थानं, तद्गतोऽग्निः। यः हुतपूर्वसमिदाज्यादिसमेधमानज्वालः स इत्यर्थः। लौकिकाग्निं माणवकोत्सृष्टमसंस्कृतमग्निं। पार्श्वे न सहते तत्तद्दाह्यावलम्बक्रमेण स्वपार्श्वमागतं ज्वलन्तं न क्षमते, स्वीयेन्धनवैभवाल्लौकिकाग्निमभिभूय प्रज्वलतीत्यर्थः। तत्रोपमामाह — वृषलम् अधार्मिकं। द्विज इव ब्राह्मण इव। द्विजो हि अधार्मिकं स्वपार्श्वे वर्तमानं न सहते स्वशौचभङ्गभिया। हरितकुशतया हरितानि अशुष्कमेचकानि कुशानि यस्यां सा तथाभूता। तस्या भावस्तत्ता तया। परिवृता परिगता पर्यास्तीर्णार्द्रदर्भेत्यर्थः। वेदी यज्ञधिष्ण्यं। नात्यर्थम् अभृशं किञ्चित् किञ्चिदित्यर्थः। नञर्थकनशब्दस्यात्यर्थशब्देन समासः। प्लुष्टपृष्ठा दग्धतला। अथवा परितो वर्तत इति परिवृत्। कर्तरि क्विप्। परिवृता परितो वर्तमानया हरितकुशतया हेतुना नात्यर्थं प्लुष्टपृष्ठेति योजना। आर्द्रेष्वास्तीर्णेषु कुशेष्वग्नेरनतिविक्रमणान्नातिव वेदिपृष्ठदाहो जात इति भावः। एषः धूमश्च, फुल्लां विकसितपुष्पां। नलिनीं पद्मिनीं। गज इव। प्राग्वंशं हविर्गृहात् पूर्वभागस्थं यजमानादिस्थित्यर्थं गृहं। प्रवि-

**द्वितीयः** —— एवमेतद्,

अग्निरग्निभयादेष भीतैर्निर्वास्यते द्विजैः ।
कुले व्युत्क्रान्तचारित्रे ज्ञातिर्ज्ञातिभयादिव ॥ ७ ॥

**तृतीयः** —— इदमपरं पश्येतां भवन्तौ,

शकटी च घृतापूर्णा सिच्यमानापि वारिणा ।
नारीवोपरतापत्या बालस्नेहेन दह्यते ॥ ८ ॥

---

शति, अर्थान्नाशयितुं । धूमप्रवेशोक्त्या प्राग्वंशेऽग्न्याक्रमणारम्भ उक्तः । इहोपमानधर्मस्य फुल्लत्वस्य प्रतिबिम्बभूतः प्राग्वंशस्योपमेयस्य धर्मो विचित्रयज्ञोपकरणसमृद्धत्वरूपः प्रकरणावगत इति नोपात्तः । 'प्राग्वंशः प्राग्घविर्गेहाद्' इत्यमरः । 'एषा दीप्तकपा' इति ग्रन्थान्तरे पाठः । स तु 'दीप्तैकयूपा' इति पाठकल्पनया साधूकर्तव्यः ॥ ६ ॥

**एवमिति** । एतद् एवं त्वदुक्तं सत्यमित्यर्थः ।

अत एव प्राग्वंशादग्निहोत्राग्निर्बहिर्नीयत इत्याह—**अग्निरिति** । एषः अग्निः यज्ञस्य समाप्तप्रायत्वाद् यज्ञवेद्या उद्धृत्य प्राग्वंशे रक्ष्यमाणो गार्हपत्याग्निः । अग्निभयाद् लौकिकाग्निनिमित्ताद् भयात् । प्राग्वंशाक्रमणप्रवृत्तलौकिकाग्निसङ्करेण गार्हपत्यो दूषितो भवेदिति त्रासादित्यभिप्रायः । द्विजैः यजमानाग्निरक्षिभिर्ब्राह्मणैः । भीतैः सद्भिः स्वदेहदाहशङ्कितैः, दीप्ताग्निज्वालाभिघातः स्वदेहे यथा न भवेत् तथा प्राग्वंशप्रवेशनिर्गमावसरेषु गृहीतावधानैः सद्भिरित्यर्थः । निर्वास्यते बहिष्क्रियते, अर्थात् प्राग्वंशात् । अत्रोपमामाह — व्युत्क्रान्तचारित्रे उल्लङ्घितसाध्वाचारे । कुले गृहे वंशे वा । ज्ञातिभयाद् दुश्शीलबन्धुनिमित्ताद् भयात्, तत्संसर्गदोषसंक्रमत्रासादित्यर्थः । ज्ञातिरिव सुशीलो बन्धुरिव । स हि दुष्टबन्धुकुलान्निर्वास्यते ॥ ७ ॥

**इदमपरमित्यादि** ।

**शकटीति** । घृतापूर्णा घृतेन होमोपयुक्तातिरिक्तेन आज्येन आपूर्णा सम्भृता । **शकटी** यज्ञोपकरणवाहि शकटम् । उपरतापत्या प्रमीततनया । नारी स्त्रीव । वारिणा घृतकुम्भरक्षार्थमासारितेन जलेन, अथच शोकबाष्पजलेन । सिच्यमानापि, बालस्नेहेन बालोऽल्पः स्नेहः घृतरसलेपः बालस्नेहः तेन हेतुना, अथच उपरतस्वापत्यवात्सल्येन । दह्यते प्लुष्यते, अथच तप्यते । कृतेऽपि जलसेके पूर्वसिद्धं घृतरसलेपमाश्रित्य शकट्यामग्निर्निरङ्कुशं प्रसरतीति भावः । उपमालङ्कारः ॥ ८ ॥

**प्रथमः**—सम्यग् भवानाह,

एतां चक्रधरस्य धर्मशकटीं दग्धुं समभ्युद्यतो
दर्भे शुष्यति नीलशाद्वलतया वह्निः शनैर्वामनः ।
वातेनाकुलितः शिखापरिगतश्चक्रं क्रमेणागतो
नेमीमण्डलमण्डलीकृतवपुः सूर्यायते पावकः ॥ ९ ॥

**द्वितीयः**—इदमपरं पश्येतां भवन्तौ,

वल्मीकमूलाद् दहनेन भीतास्तत्कोटरैः पञ्च समं भुजङ्गाः ।
समं विपन्नस्य नरस्य देहाद् विनिःसृताः पञ्च यथेन्द्रियाणि ॥ १० ॥

---

उक्तस्य सम्यक्त्वमुपपादयति—**एतामिति** । वह्निः, नीलशाद्वलतया नीलः आर्द्रतया श्यामः शाद्वलः बालतृणवान् प्रदेश आश्रयभूतो यस्य स नीलशाद्वलः तस्य भावस्तत्ता तया, बालतृणवत्प्रदेशाश्रयतयेत्यर्थः । वामनः कुब्जज्वालः सन् । दर्भे तृणे । शनैः मन्दं । शुष्यति ऊष्मवशात् शोषं प्राप्नुवति सति । चक्रधरस्य राष्ट्रभर्तुः सुयोधनस्य । एतां धर्मशकटीं यज्ञार्थां शकटीं । दग्धुं समभ्युद्यतः सम्यगुद्युक्तः, भवतीति शेषः । अग्निः शाद्वलप्रदेशप्राप्त्या मन्दप्रसरः कुब्जज्वालश्च भूत्वा ऊष्मवशशुष्यद्दर्भानुसारेण धर्मशकटीमासाद्य दग्धुं प्रवृत्त इति अर्धार्थः । अथवा धर्मशकटीं शुष्यति दर्भे तत्स्थे दग्धुं समभ्युद्यतो वह्निः, नीलशाद्वलतया आर्द्रहरिततृणवत्तया हेतुना, शनैर्मन्दप्रसरो वामनो भवतीति योजना । दग्धुमभ्युद्यतस्यावस्थामुत्तरार्धेनाह— वातेन तत्कालोच्चलितेन वायुना आकुलितः सन्धुक्षितः परिकीर्णो वा । अत एव शिखापरिगतः शिखाभिः ज्वालाभिः परिगतः परितो युक्तः । क्रमेण तत्तच्छकटावयवदाहपरिपाट्या । चक्रम् अरिसंज्ञं शकटाङ्गम् । आगतः पावकः, नेमीमण्डलमण्डलीकृतवपुः नेम्याः चक्रप्रान्तस्य मण्डलेन वृत्ताकारेण मण्डलीकृतं वर्तुलाकारतया परिच्छिन्नं वपुः आकारो यस्य स तथाभूतः सन् । सूर्यायते सूर्य इवाचरति मण्डलाकारतया सूर्य इव भासते । 'कर्तुः क्यङ् सलोपश्च' (३-१-११) इति सूर्यशब्दादाचारे क्यङ् । इह नीलशाद्वलशब्दे नीलपदार्थस्य शादपदार्थेन सम्बन्धः शिवभागवते शिवपदार्थस्य भगवत्पदार्थेन सम्बन्धवद् बोद्धव्यः ॥ ९ ॥

**इदमित्यादि** ।

**वल्मीकेति** । पञ्च भुजङ्गाः सर्पाः । दहनेन अग्न्यूष्माभिघातजनितेनातितापेन हेतुना । भीताः प्राणापायशङ्किताः सन्तः । विपन्नस्य प्रमीतस्य । नरस्य पुरुषस्य ।

**तृतीयः** — इदमपरं पश्यतां भवन्तौ,

दह्यमानस्य वृक्षस्य सानिलेन मखाग्निना ।
कोटरान्तरदेहस्थाः खगाः प्राणा इवोद्गताः ॥ ११ ॥

**प्रथमः** — एवमेतत् ,

शुष्केणैकेन वृक्षेण वनं पुष्पितपादपम् ।
कुलं चारित्रहीनेन पुरुषेणेव दह्यते ॥ १२ ॥

**द्वितीयः** —

एते वातोद्धता वंशा दह्यमाना मखाग्निना ।
भाग्यानीव मनुष्याणामुन्नमन्ति नमन्ति च ॥ १३ ॥

---

देहात्, समं युगपत् । पञ्च चक्षुःश्रोत्रजिह्वाघ्राणत्वग्लक्षणानि । इन्द्रियाणि यथा इन्द्रियाणीव । वल्मीकमूलात् नाकुमूलभागात् । तत्कोटरैः वल्मीकविवरैः वल्मीकविवरमार्गेणेत्यर्थः । इदमुपमानपक्षेऽपि सुयोजं देहद्वारैरित्यर्थकं । समं युगपत् । विनिस्सृताः निष्क्रान्ताः । इह समं पञ्च इति पदयोर्द्विर्निर्देशः स्पष्टार्थः ॥

**इदमित्यादि ।**

**दह्यमानस्येति** । सानिलेन वायुसहितेन । मखाग्निना यज्ञाग्निना । दह्यमानस्य वृक्षस्य, कोटरान्तरदेहस्थाः कोटरं वृक्षबिलमेव अन्तरदेहः देहाभ्यन्तरं कोटरान्तरदेहः, तत्र तिष्ठन्तीति तथाभूताः । खगाः पक्षिणः । प्राणा इव, उद्गताः उत्क्रान्ताः । अत्र वृक्षकोटरस्थेषु तद्दाहकालोद्गतेषु खगेषु तद्देहोद्गतप्राणतादात्म्यम् उत्प्रेक्ष्यते , दह्यमानस्य देहात् प्राणोद्गमनौचित्यात् । कोटरे चान्तरदेहत्वरूपणम् उत्प्रेक्षाया अङ्गम् ॥ ११ ॥

**एवमित्यादि ।**

**शुष्केणेति** । पुष्पितपादपं पुष्पिताः पादपाः वृक्षा यस्मिंस्तत् तथाभूतं । वनं वृक्षसमूहः । शुष्केण एकेन वृक्षेण हेतुना, चारित्रहीनेन चारित्रं शीलं ततो हीनेन । एकेन पुरुषेण हेतुना । कुलमिव वंश इव । दह्यते प्लुष्यतेऽग्निना, अथच दूष्यते । उपमालङ्कारः ॥ १२ ॥

**एत इत्यादि** । वातोद्धताः वायुकम्पिताः । वंशाः वेणवः । उन्नमन्ति उपरि गच्छन्ति । नमन्ति अधो गच्छन्ति । उपमालङ्कारः ॥ १३ ॥

**तृतीयः**—सम्यग् भवानाह,

लतया सक्तया स्कन्धे शुष्कया वेष्टितस्तरुः ।
निविष्टो दुष्कुले साधुः स्त्रीदोषेणेव दह्यते ॥ १४ ॥

**प्रथमः**—इदमपरं पश्येतां भवन्तौ,

वनं सवृक्षक्षुपगुल्ममेतत् प्रकाममाहारमिवोपभुज्य ।
कुशानुसारेण हुताशनोऽसौ नदीमुपस्प्रष्टुमिवावतीर्णः ॥ १५ ॥

**द्वितीयः**—एष एषः,

गतो वृक्षाद् वृक्षं विततकुशचीरेण दहनः
कदल्या विप्लुष्टं पतति परिणामादिव फलम् ।

---

सम्यगित्यादि ।

लतयेत्यादि । निविष्टः संसृष्टः । दह्यते शुष्यते अथच दूष्यते । यथा दुष्टस्त्रीसंसर्गः सत्पुरुषस्य दोषाय भवति, तथा शुष्कलतासंसर्गो वृक्षस्य दोषाय भवतीत्युपमात्र ॥ १४ ॥

इदमित्यादि ।

वनमिति । हुताशनः अग्निः सवृक्षक्षुपगुल्मं वृक्षैः महातरुभिः क्षुपैः ह्रस्ववृक्षैः, गुल्मैः स्तम्बैश्च सह वर्तमानम् । आहारमिव आहारत्वेन सम्भाव्यमानम् । एतत् वनं, प्रकामं यावत्तृप्ति उपभुज्य भुक्त्वा । कुशानुसारेण नदीकूलप्ररूढदर्भाश्रयणक्रमेण । नदीम् अवतीर्णः नदीपरमसन्निकृष्टदेशं प्राप्त इत्यर्थः । नद्यवतरणस्य फलमुत्प्रेक्षते—उपस्प्रष्टुमिव आचमितुमिव । कृताहारस्य हि शौचार्थं नद्यवतरणं युक्तम् ॥ १५ ॥

अन्यतो दृष्टां दहनस्य चेष्टामाह—एष एष इति । इदं श्लोकान्वयि ।

गत इति । एष एष दहनः श्रोत्रोरवधानाकर्षणाय द्विरुक्तिः । वृक्षात् आश्रितात् । वृक्षं वृक्षान्तरं । विततकुशचीरेण कुशा दर्भाः चीराणि छिद्रवस्त्राणि अथवा वल्कलानि तेषां समाहारः कुशचीरं, विततं च तत् कुशचीरं च विततकुशचीरं, तेन । गतः प्राप्तः । कुतश्चिद् वृक्षमूलाद् वृक्षान्तरस्य मूलं भूतलान्वास्तीर्णकुशचीरानुसारेण प्राप्त इत्यर्थः । अथवा वृक्षद्वयबद्धाग्रलग्ननीलम्बितकुशासनवल्क-

असौ चाग्रे तालो मधुपटलचक्रेण महता
चिरं मूले दग्धः परशुरिव रुद्रस्य पतति ॥ १६ ॥

**तृतीयः**—हन्त सत्पुरुषरोष इव प्रशान्तो भगवान् हुताशनः।

एतदग्नेर्बलं नष्टमिन्धनानां परिक्षयात्।
दानशक्तिरिवार्यस्य विभवानां परिक्षयात् ॥ १७ ॥

**प्रथमः**—

स्रुग्भाण्डमरणीं दर्भानुपभुङ्क्ते हुताशनः।
व्यसनित्वान्नरः क्षीणः परिच्छदमिवात्मनः ॥ १८ ॥

---

लानुसारेण वृक्षादेकस्माद् वृक्षमन्यमुपसंक्रान्त इत्यर्थः। विप्लुष्टं दग्धं। कदल्याः, फलं, परिणामादिव पतति, यथा पाकवशात् फलं प्रशिथिलवृन्तं सत् पतति तथा पाकाभावेऽपि अग्निविप्लोषवशात् पततीत्यर्थः। अग्रे उपरिभागे। महता पीवरेण मधुपटलचक्रेण मधुगोलबृन्देन। उपलक्षित इति शेषः। असौ तालश्च हरितालवृक्षश्च। मूले चिरं दग्धः सन् चिरकालदाहाशिथिलमूलबन्धः सन्नित्यर्थः। रुद्रस्य परशुरिव प्रांशुभीषणत्वाद् हरकुठार इव। पतति ॥ १६ ॥

हन्तेत्यादि। हन्तेति हर्षे। सत्पुरुषरोष इव महापुरुषकोप इव, अग्नेः क्षिप्रकार्यकारित्वेनानतिचिरस्थायित्वेन च सत्पुरुषकोपसादृश्यम्।

एतदित्यादि। बलं शक्तिः अतिप्रवृद्धज्वालत्वम्। इन्धनानां यज्ञशालादिमहादारुवस्तूनाम्। परिक्षयात् भस्मीभावात्। आर्यस्य धार्मिकस्य। विभवानां हिरण्यादिदेयद्रव्याणां। परिक्षयात् कार्त्स्न्येन दाने विनियोगात्। उपमालङ्कारः ॥ १७ ॥

स्रुगिति। व्यसनित्वात् व्यसनं पानद्यूतादिव्यासङ्गः, तद्वत्त्वात्। क्षीणः विभवक्षयं प्राप्तः। नरः, आत्मनः, परिच्छदमिव आभरणवसनादिकं फल्गूपकरणमिव। हुताशनः अग्निः। स्रुग्भाण्डं स्रुक् हवनीसंज्ञं जुहूपभृदादिभेदभिन्नं दारुमयं होमसाधनं, तद्रूपं भाण्डं पात्रम्। अरणीम् अग्निमथनदारु। दर्भान् कुशांश्च, चार्थो गम्यः। उपभुङ्क्ते दहति, उपमानपक्षे विक्रीय जीवतीत्यर्थः। अत्र व्यसनित्वात् क्षीण इत्युपमानधर्मस्य प्रतिबिम्बभूत उपमेयस्य धर्मो मन्दज्वालत्वरूपः। स च प्रकरणावगतत्वान्नोपात्तः। उपमालङ्कारः ॥ १८ ॥

**द्वितीयः** —

अवनतविटपो नदीपलाशः पवनवशाच्चलितैकपर्णहस्तः ।
दवदहनविपन्नजीवितानामुदकमिवैष करोति पादपानाम् ॥ १९ ॥

**तृतीयः** — तदागम्यताम् । वयमपि तावदुपस्पृशामः ।

**उभौ** — बाढम् ।

(सर्वे उपस्पृश्य)

**प्रथमः** — अये अयमत्रभवता कुरुराजो दुर्योधनो भीष्मद्रोणपुरःसरः सर्वराजमण्डलेनानुगम्यमान इत एवाभिवर्तते । इमे हि,

---

**अवनतेति** । अवनतविटपः अवनताः जलपर्यन्तनम्रा विटपाः शाखाः यस्य स तथाभूतः । पवनवशात् वातानुरोधात् । चलितैकपर्णहस्तः चलितः जले चलनं प्राप्तः एकं पर्णं दलमेव हस्तो यस्य स तथाभूतः । नदीपलाशः नदीतीरप्रान्तस्थः पलाशवृक्षः । दवदहनविपन्नजीवितानां वनाग्निनष्टप्राणानां । पादपानां वृक्षाणाम् । उदकं प्रेतोदकदानक्रियां । करोतीव आचरतीव । ज्ञातिर्हि नदीतीरे नम्र उपविश्य दाक्षिणमेकं हस्तं जले व्यापारयन् परेतज्ञातिभ्य उदकं ददातीति युक्तम् । उत्प्रेक्षालङ्कारः । स च पर्णे हस्तत्वारोपरूपरूपकानुप्राणितः ॥ १९ ॥

**तदित्यादि** । तत् तस्मात् अग्नेः शान्तत्वेन तद्दाहाटोपशेषस्य प्रेक्षणीयस्याभावादित्यर्थः । उपस्पृशामः नद्यान्तिकगमने उपस्पर्शनौचित्यात् ॥

**बाढमिति** अङ्गीकारे ॥

**सर्वे** इति । सर्वे त्रयोऽपि । उपस्पृश्य, परिक्रामन्तीति शेषः । उपस्पृशन्तीति वा पाठः ॥

प्रसङ्गागते यज्ञशालादाहवर्णने परिसमाप्ते कृतावभृथस्य सुयोधनस्य वृत्तं प्रस्तोतव्यम् । तत्र नद्याम् अवभृथस्नानं निर्वर्त्याभिवर्तमानं सुयोधनं पश्यन्नाह— **अये** इत्यादि । अत्रभवता पूज्येन । इदं सर्वराजमण्डलस्य विशेषणम् । 'अत्रभवान्' इति ग्रन्थान्तरे पाठः । भीष्मद्रोणपुरस्सरः भीष्मः कुरुपितामहः, द्रोणो धर्मधनुराचार्यः, तौ पुरस्सरौ गुरुत्वादग्रगामिनौ यस्य स तथाभूतः । तयोश्च पुरस्करणं धर्मोपदेष्टृत्वप्रवर्तयितृत्वकृतात् प्राधान्याद् बोध्यम् । **इत एव** इहैव । **अभिवर्तते** अभिमुखमागच्छति ।

यज्ञेन भोजय महीं जय विक्रमेण
रोषं परित्यज भव स्वजने दयावान् ।
इत्येवमागतकथामधुरं ब्रुवन्तः
कुर्वन्ति पाण्डवपरिग्रहमेव पौराः ॥ २० ॥

तदागम्यताम् । वयमपि तावत् कुरुराजं सम्भावयामः ।

---

यज्ञानुष्ठानधन्यं कुरुराजं कालोचितैर्वाक्यैः सम्भावयतः पौरान् उपलभ्याह— इमे हि यज्ञेनेति । इमे पौराः पुरवासिनो जनाः । हे राजन्! इदं सम्बोधनं मध्यमपुरुषावगतयुष्मदर्थसामर्थ्यगम्यम् । यज्ञेन निमित्तेन । भोजय तर्पय । प्राणिसामान्यमिति योग्यकर्माध्याहारः । यथेदानीं देवमनुष्यपशुपक्ष्यादिकमभोजयः, तथोत्तरकालेऽपि वितेतेन यज्ञेन भोजयेत्यभिप्रायः । अनुष्ठितयज्ञाभिनन्दनसूचनपूर्वमायतौ राज्ञो यज्ञानुष्ठानप्रोत्साहनपरमिदं वाक्यम् । विक्रमेण पराक्रमेण । महीम् अस्वायत्तां भूमिं । जय स्वायत्तीकुरु । इदं राज्ञः समृद्ध्याशंसनम् । उक्तप्रियवाक्यद्वयश्रवणसंमुखे यज्ञनिष्पत्तिसन्तुष्टे राज्ञो मनसि गुणान्तरं सौहार्दादुपदिश्यमानं सुप्रतिष्ठितं भवेदिति बुद्ध्या द्वितीयपादेन तदुपदिश्यते — रोषं कोपं, यः स्वजनविषये प्ररूढस्तमित्यर्थः । परित्यज दूरीकुरु । स्वजने दयावान् भव, जतुगृहदाहाद्यज्ञातवासान्तविपदुत्पादसंक्लेशितान् पाण्डवान् राज्यसंविभागेनानुगृहाणेत्याशयः । इत्येवम् उक्तेनानेन प्रकारेण । आगतकथामधुरं ब्रुवन्तः सन्तः आगतस्य प्रसक्तस्य यज्ञस्य कथया प्रस्तावेन मधुरं दुर्योधनहृदयस्य प्रियं यथा भवति तथा भाषमाणाः सन्तः, अथवा आगतस्य प्राप्तकालस्य पाण्डवविषयरोषत्यागादेः कथाः प्रस्तावान् मधुरं सामान्यनोत्युपदेशभङ्गिमनोरमं यथा भवति तथा ब्रुवन्तः सन्त इति योजना । 'मधुराम्' इति ग्रन्थान्तरे पाठः, तदा 'आगतकथाम्' इति द्वितीयान्तं विशेष्यं कल्पनीयम् । पाण्डवपरिग्रहमेव पाण्डवानां पाण्डुपुत्राणां युधिष्ठिरादीनां दुर्योधनविप्रवासितानां परिग्रहमेव अनुग्राह्यत्वेन स्वीकारमेव । कुर्वन्ति न तूपेक्षामिति अहो अतिचिरविप्रोषितेष्वपि पाण्डवेषु पौरानुरागबन्धनो गुणसमृद्धिरिति भावः । तदेतद् इह दुर्योधनं प्रति पाण्डवानामनुग्राह्यत्वध्वननं द्रोणेन करिष्यमाणस्य पाण्डवार्धराज्यदानप्रार्थनस्यानुगुणं द्रष्टव्यम् । तेन च पाण्डवानुग्रहद्वारकः कुरुकुलसंग्रहो रूपकेतिवृत्तस्य यः साध्यांशः, सोऽप्यत्र सूचितः, स एव ग्रन्थान्ते 'प्रवृद्धकुलसंग्रहाः' इति सिद्धत्वेन कीर्तयिष्यते ॥ २० ॥

**उभौ** — बाढम् ।

**सर्वे** — जयतु भवान् जयतु ।

( निष्क्रान्ताः सर्वे । )

**विष्कम्भकः ।**

---

(ततः प्रविशतो भीष्मद्रोणौ ।)

**द्रोणः** — धर्ममालम्बमानेन दुर्योधनेनाहमेवानुगृहीतो नाम । कुतः,

अतीत्य बन्धूनवलङ्घ्य मित्राण्याचार्यमागच्छति शिष्यदोषः ।
बालं ह्यपत्यं गुरवे प्रदातुर्नैवापराधोऽस्ति पितुर्न मातुः ॥ २१ ॥

---

**तदि**त्यादि । वयमपि पौरसमुच्चायकोऽपिशब्दः । सम्भावयामः उचितसमुदाचारेण पूजयामः । 'सभाजयिष्यामः' इति पाठान्तरम् ॥

**बाढमि**ति ॥

**जयत्वि**त्यादि । जयतु महाराज इति ग्रन्थान्तरे पाठः ॥

**विष्कम्भक** इति । शुद्धविष्कम्भोऽयं, केवलमध्यपात्रप्रयोजितत्वात् ।

'वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ।'
'एकानेकगतः शुद्धः संकीर्णो नीचमध्ययोः । ' इति दशरूपकम् ॥

सुयोधनस्य पुरस्सरत्वेनोक्तयोर्भीष्मद्रोणयोः प्रवेशमाह—**तत** इत्यादि ॥

**धर्ममि**त्यादि । धर्मं यज्ञानुष्ठानलक्षणम् । आलम्बमानेन आश्रयता । अहमेव न त्वन्ये । एतेन प्रकृतधर्मस्य स्वोपदिष्टत्वं स्वानुष्ठापितत्वं च सूचितम् । अनुगृहीतो नाम बहुमानितो नाम । नामेत्यभ्युपगमे । ममानुगृहीतत्वमविप्रतिपन्नमित्यर्थः । अनेनापूर्वेण मच्छिष्यस्य दुर्योधनस्य धर्मालम्बनेन तद्गुरोर्ममैव सिद्धो मुख्यो बहुमानः, अमुख्य एव तु तद्बन्धुप्रभृतीनामित्यभिप्रायः । तत्र हेतुमाकाङ्क्षति—**कुत** इति ।

हेतुमाह—**अतीत्ये**ति । शिष्यदोषः शिष्यस्य दोषो धर्मानाश्रयणाधर्माश्रयणादिरूपोऽपराधः । बन्धून् बान्धवान् मातुलादीन् तद्विनयने किञ्चिदधिकारवतोऽपि । अतीत्य अतिक्रम्य । मित्राणि सुहृदः । अवलङ्घ्य परिहृत्य । आचार्यम् आगच्छति गुरुम् उपसीदति सर्वप्रकारशिष्यविनयनभारवाहित्वाद् गुरुरेव

**भीष्मः**—एष दुर्योधनः,

अवाप्य रूप्यग्रहणात् समुच्छ्र्यं रणप्रियत्वादयशो निपीतवान् ।
निषेव्य धर्मं सुकृतस्य भाजनं स एव रूपेण चिरस्य शोभते ॥ २२ ॥

(ततः प्रविशति दुर्योधनः कर्णः शकुनिश्च ।)

**दुर्योधनः**—

कृतश्रद्धो ह्यात्मा वहति परितोषं गुरुजनो
जगद् विश्वस्तं मे निवसति गुणो नष्टमयशः ।

---

शिष्यापराधेनापराधवान् भवतीत्यभिप्रायः । अस्तु शिष्यस्यापराधेन तत्पिता सापराधः तन्माता वा विनयनभारवाहित्वाविशेषादिति चेत्, तयोर्गुरुन्यस्त-समस्तात्मभारतया नापराध इत्याह—बालं शिक्षणार्हवयस्स्थितम् अपत्यं पुत्रं । गुरवे आचार्याय । प्रदातुः अयं मम पुत्रकः सर्वात्मना त्वय्यायत्तः शिक्षणीय इत्यु-क्त्वा समर्पयितुः । पितुः, अपराधः नैवास्ति नास्त्येव । मातुः जनन्याश्च अपराधो नास्ति । चार्थो गम्यः । यतः शिष्यदोषो गुर्वेकगामी, अतः शिष्यगुणवत्त्वप्रयुक्तस्य बहुमानस्य गुरुरेव मुख्यं भाजनमिति भावः ॥ २१ ॥

**एष दुर्योधन** इति श्लोकान्वयि ।

**अवाप्येति** । एषः सन्निहितः । दुर्योधनः, रूप्यग्रहणाद् रूप्यस्य आहतरू-पस्य स्वर्णस्य रजतस्य च निष्कादिरूपस्य ग्रहणाद् द्यूतेऽपहरणात् । समुच्छ्र्यं विभ-वोन्नतत्वम् । अवाप्य, रणप्रियत्वात् कलहकामुकत्वात् । पाण्डवैः सह कलहः कर्तव्य इत्यभिलाषादित्यर्थः । अयशः द्रौपदीकेशाकर्षणाद्यकार्यकरणजन्यामकीर्त्तिं । निपी-तवान् नितरामनुभूतवान् । स एव उक्ताकीर्त्तिदूषितो दुर्योधन एव । चिरस्य चिरकालापगमानन्तरम् इदानीमित्यर्थः । धर्मं यज्ञं । निषेव्य अनुष्ठाय । सुकृतस्य भाजनं सन् पुण्यस्य पात्रं सन् । रूपेण धार्मिकोचितेन वेषेण । शोभते प्रकाशते, अस्मद्दृष्टिप्रियो भवतीत्यर्थः । इह रूप्यशब्दो 'रूपादाहतप्रशंसयोर्यप्' (५-२-१२०) इति यप्प्रत्ययान्तः । 'रूप्यः स्यात् सुन्दरे त्रिषु । आहतस्वर्णरजते' इति मे-दिनी ॥ २२ ॥

**तत इत्यादि** ॥

शुभकर्मानुष्ठानजन्यां मनसः शान्तिं सन्तोषं चाविष्कुर्वन्नाह—**कृतेति** । **आत्मा** मम मनः । कृतश्रद्धो हि कृता श्रद्धा आस्तिक्यं विधिनिषेधशास्त्रेष्वादरो वा

मृतैः प्राप्यः स्वर्गो यदिह कथयत्येतदनृतं
परोक्षो न स्वर्गो बहुगुणमिहैवैष फलति ॥ २३ ॥

**कर्णः** — गान्धारीमातः! न्यायेनागतमर्थमतिसृजता न्याय्यमेव भवता कृतम् । कुतः,

---

येन स तथाभूत एव । हिशब्दोऽवधारणार्थः श्रद्धाशैथिल्यशङ्कामत्यन्तं व्यवच्छिनत्ति । अत एव गुरुजनः द्रोणादिः यः प्राचीनेषु मच्चरितेष्वपरितुष्टः स इत्यर्थः । परितोषं मच्चरितविषयां तृप्तिं । वहति । जगत् प्रजा इत्यर्थः । विश्वस्तं मयि सविश्वासं । भवतीति शेषः । मे गुणः दयौदार्यादिः । निवसति नितरां वसति मयि स्थिरवासं करोतीत्यर्थः । एतेन गुणस्याविचाल्यत्वविस्रम्भ आत्मनः सूचितः । अयशः अकीर्त्तिः दुर्वृत्तधनार्जनजन्या । नष्टं यज्ञे सर्वधनविनियोगेन कीर्त्त्युदयादपगतम् । अथ श्रद्धाद्यनुसन्धानवशाद् मनसि परिवर्तमानमात्मनः परमानन्दं स्वर्गलक्षणादानन्दादनतिरिक्तमभिमन्यमानः स्वानुभवप्रामाण्यात् स्वर्गानन्दस्य परलोकैकलभ्यताप्रवादप्रतिषेधपूर्वं मानुषलोकलभ्यतां समर्थयते — स्वर्गः दुःखासंभिन्नं सुखं । मृतैः त्यक्तमनुष्यदेहैरेव जनैः, न तु जीवद्भिः । प्राप्यः लभ्यः अर्थात् परलोके, न त्विहलोके । इतिशब्दोऽत्राध्याहार्यः । इति, यत् कथयति आचष्टे अर्थादागमः कर्ता । यदिति कथयन्तीति वा पाठः कल्प्यताम् । एतद् अनृतम् असत्यम् । किं तर्हि सत्यं, तदाह — स्वर्गः, न परोक्षः नाप्रत्यक्षः मानुषदेहाभोग्यो न भवति, किन्तु मानुषदेहिनोऽपि भोग्यो भवतीत्यर्थः । एष स्वर्गः । इहैव इहलोकेऽपि, अनियमार्थ एवकारः । बहुगुणं बहुप्रकारा गुणाः प्रयोजकभूता यस्मिन् कर्मणि तद् यथा भवति तथा । अथवा समृद्धं यथा भवति तथा । फलति सिध्यति । अत्र स्वर्गस्येहलोके मानुषलभ्यताया अप्रस्तुतायाः सामान्यरूपाया वर्णनेन मानुषविशेषस्य दुर्योधनस्येहैव स्वर्गानन्दसिद्धेः प्रस्तुताया द्योतनाद् अप्रस्तुतप्रशंसालङ्कारः । अन्या व्याख्या चतुर्थपादस्य—अनृतत्वे हेतुमाह—स्वर्गो न परोक्षः नाप्रत्यक्षः ममानुभवगोचर एवेदानीमित्यर्थः । मृतप्राप्यत्वे मदनुभवगोचरत्वं कथं घटेतेत्याशयः । स्वप्रयोजकगुणबाहुल्याच्चायम् इहलोकेऽपि निष्पद्यत इत्याह—एष इहैव बहुगुणः फलतीति पूर्ववत् ॥ २३ ॥

**गान्धारीत्यादि** । गान्धारीमातः! गान्धारी गन्धारराजपुत्री माता यस्य तस्य सम्बुद्धिः । 'मातन्मातृकमातृषु वा' (६-१-१३.) इति वार्त्तिके बहुव्रीहौ ष्यङः संप्रसारणविकल्पविधायके मातृकमातृशब्दयोर्निर्देशात् कपो वैकल्पिकत्वं

बाणाधीना क्षत्रियाणां समृद्धिः पुत्रापेक्षी वञ्च्यते सन्निधाता ।
विप्रोत्सङ्गे वित्तमावर्ज्य सर्वं राज्ञा देयं चापमात्रं सुतेभ्यः ॥ २४ ॥

**शकुनिः** —सम्यगाह गङ्गोपस्पर्शनाद् धौतकल्मषाङ्गोऽङ्गराजः ।

**कर्णः** —

इक्ष्वाकुशर्य्यातिययातिराममान्धातृनाभागनृगाम्बरीषाः ।
एते सकोशाः पुरुषाः सराष्ट्रा नष्टाः शरीरैः क्रतुभिर्धरन्ते ॥ २५ ॥

**सर्वे** —गान्धारीमातः! यज्ञसमाप्त्या दिष्ट्या भवान् वर्धते ।

---

बोद्धव्यम् । न्यायेन नीत्या । अतिसृजता सत्कर्मणि निश्शेषं विनियोजयता । न्याय्यमेव न्यायानपेतमेव । न्यायश्च वक्ष्यमाणश्लोके स्पष्टः ।

**बाणे**ति । क्षत्रियाणां, क्षत्रियसामान्यस्य । समृद्धिः धनसम्पत् । बाणाधीना बाणव्यापारायत्ता युद्धार्जनीया, न तु पितृसकाशाद् दायत्वेन प्राप्येत्यर्थः । पुत्रापेक्षी पुत्रापेक्षणशीलः पुत्र एव मदीयां समृद्धिं सर्वामुपभुङ्क्तामित्यभिलाषवानित्यर्थः । अत एव संनिधाता व्ययं विना धनस्य सम्यक् स्थापयिता क्षत्रियः। तन्निधातेति वा पाठः । तस्याः समृद्धेर्निधातेति तदार्थः । वञ्च्यते स्वार्जितायाः समृद्धेः सत्कर्मसु अविनियोगादकृतार्थः क्रियते, अर्थात् पुत्रस्नेहेन । अतः समृद्धिमता राज्ञा यत् कर्तव्यं, तदाह—राज्ञा, सर्वं, वित्तं धनं । विप्रोत्सङ्गे ब्राह्मणस्योत्सङ्गे । आवर्ज्य समर्प्य । सुतेभ्यः पुत्रेभ्यः । चापमात्रं चाप एव चापमात्रं, मयूरव्यंसकादित्वात् समासः । देयं दातुम् अर्हम् । यत एष राज्ञामाचारसामान्यन्यायः, अतो भवदाचरितं न्याय्यमेवेति पूर्ववाक्यार्थसमर्थना द्रष्टव्या ॥ २४ ॥

**सम्यगित्यादि** । सम्यग् आह विशुद्धं वक्ति । युज्यते हि कायविशुद्धस्य वाग्विशुद्धत्वमिति भावः । गङ्गोपस्पर्शनाद् गङ्गाजलाचमनाद् अवभृथस्नानप्रसङ्गकृतात् । अङ्गराजः दुर्योधनदत्ताङ्गदेशाधिपः ॥

धर्मोत्साहोद्दीप्तिसदृशमाह—**इक्ष्वाक्वित्यादि** । इक्ष्वाकुप्रभृतयः अष्टौ । एते प्रसिद्धाः । सकोशाः सधनाः । पुरुषा इत्यस्य स्थाने 'सपुरा' इति ग्रन्थान्तरे पाठः । सराष्ट्राः राष्ट्रं ग्रामसमूहः तत्सहिताः । शरीरैः देहैः । नष्टाः, क्रतुभिः यज्ञैः लक्षणया यज्ञजन्यैर्यशोभिः इतिहासश्लाघितैः । धरन्ते ध्रियन्ते जीवन्तीत्यर्थः । स्थितिवृत्तिरिह धातुः ॥ २५ ॥

**गान्धारीत्यादि** । **दिष्ट्येति हर्षे** । वर्धते **अभ्युदयं प्राप्नोति** ॥

**दुर्योधनः** — अनुगृहीतोऽस्मि । भो आचार्य ! अभिवादये ।

**द्रोणः** — एह्येहि पुत्र ! । अयमक्रमः ।

**दुर्योधनः** — अथ कः क्रमः ।

**द्रोणः** — किं न पश्यति भवान् ।

दैवतं मानुषीभूतमेष तावन्नमस्यताम् ।
अहं नाचरणं मन्ये भीष्ममुत्क्रम्य वन्दितुम् ॥ २६ ॥

---

दिष्टिवृद्धिकरणरूपं सर्वकृतं सत्कारं प्रतिपूजयति—**अन्वि**त्यादि । इह भवन्तमिति शेषः ॥

**एही**त्यादि । पुत्रेति वत्सलामन्त्रणम् । एह्येहि मदन्तिकमागच्छागच्छ मदुपदेशं श्रोतुं, मा तावन्मामभिवादयस्वेत्यर्थः । द्विरुक्तिरादरार्था । अयमक्रम इत्युपदेशः । अक्रमः अनुचिताचारः । आदौ मदभिवादनाध्यवसायस्तवायं न न्याय्य इत्यर्थः ॥

उचिताचारं पृच्छति—**अथे**त्यादि ।

**किमि**ति । भवान्, न पश्यति किं न जानाति किम् । अर्थादभिवादविषयं क्रमम् ।

तमुपदिशति—**दैवतमि**ति । मानुषीभूतं मनुष्यभावापन्नं । दैवतं द्युनामकवस्ववतारत्वात् । तच्च भारते आदिपर्वणि (१०६ अध्याये) स्पष्टम् । एषः भीष्मः समीपतरवर्तिनो भीष्मस्याङ्गुल्या निर्देशोऽयम् । तावद् आदौ । नमस्यताम् अभिवाद्यतामिति विधिः । पश्चात्तु मत्प्रभृतिरित्यार्थम् । अहं, भीष्मम्, उत्क्रम्य उल्लङ्घ्य । वन्दितुं वन्दनार्थं वन्दनानुकूलमित्यर्थः । वन्दतेः क्रियार्थक्रियोपपदकात् तुमुन् । आचरणं त्वच्चेष्टितं । न मन्ये नेच्छामि नानुजानामि वा । अथवा 'वन्दितुम् आचरणं न मन्ये' इत्यस्य वन्दनं शिष्टाचारतया नेच्छामीत्यर्थः, वन्दितुं न्यायं न जानामीत्यर्थो वा । केवले धात्वर्थे तुमुन् । अत्र दैवतमिति भीष्मविशेषणपदार्थस्य प्रथमपूजनीयत्वसमर्थकत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः । 'समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम् ' इति लक्षणात् । नमस्यतामिति नमश्शब्दाद् 'नमोवरिवश्चित्रङः—' (३-१-१९) इति क्यचि ततः कर्मणि लोट् ॥ २६ ॥

**भीष्मः**—मा मा भवानेवम्। बहुभिः कारणैरपकृष्टोऽहं भवतः। कुतः,

अहं हि मात्रा जनितो भवान् स्वयं ममायुधं वृत्तिरपह्नवस्तव।
द्विजो भवान् क्षत्रियवंशजा वयं गुरुर्भवान् शिष्यमहत्तरा वयम्॥ २७॥

**द्रोणः**—नोत्सहन्ते महात्मानो ह्यात्मानमपस्तोतुम्। एहि पुत्र! अभिवादयस्व माम्।

**दुर्योधनः**—आचार्य! अभिवादये।

**द्रोणः**—एह्येहि पुत्र! एवमेवावभृथस्नानेषु खेदमवाप्नुहि।

**दुर्योधनः**—अनुगृहीतोऽस्मि। पितामह! अभिवादये।

---

**मा मे**त्यादि। वदत्विति शेषः।

**अहं ही**ति। अहं हि हिशब्दः प्रसिद्धौ। मात्रा जनितः योनिजः। भवान् स्वयं जनितः अयोनिज इत्यर्थः। आयुधं लक्षणया तद्व्यापारः शत्रुहिंसनं। मम वृत्तिः सहजा जीविका। अपह्नवः स्नेहः यद्भावितचित्तस्य रागद्वेषौ न स्तः सा भूतमैत्रीत्यर्थः। तव वृत्तिः। भवान्, द्विजः ब्राह्मणो जात्या। वयम् अहं। क्षत्रियवंशजाः। भवान् गुरुः "सर्वेषामेव वर्णानां ब्राह्मणः परमो गुरुः" इति पाद्मवचनात् सर्ववर्णगुरुः। अथवा धर्मे धनुषि च शिक्षक आचार्यः। वयं शिष्यमहत्तराः तव शिष्येषु महत्सु महत्तराः सातिशयमहत्त्ववन्तः। एवञ्च स्फुट आवयोर्मिथो व्यतिरेक इति भावः। 'अपह्नवौ ह्नुतिस्नेहौ' इति वैजयन्ती। वयमित्यत्र 'अस्मदो द्वयोश्च' (१-२-५९) इत्येकत्वे बहुवचनम्॥ २७॥

**नोत्सहन्त** इति। महात्मानो हि महामनस्का नाम। हिः प्रसिद्धौ। आत्मानम्, अपस्तोतुम् अपश्लाघितुम् अपकृष्टमाख्यातुमित्यर्थः। नोत्सहन्ते अत्र काका उत्सहन्त एवेत्यर्थः। भूयः स्वगुणविशेषान् बोध्यमानोऽपि भीष्मः आत्मनोऽपकर्षमेव कथयिष्यति, न चाङ्गीकरिष्यति पूर्वाभिवादनयोग्यतामित्यभिप्रायः। अत एव स्वाभिवादनमनुजानाति—**एह्यी**त्यादि॥

**आचार्ये**त्यादि।

**एह्येही**त्यादि। भूयो भूयः क्रतूनाहरेति आशीर्वादस्यार्थः॥

**अनुगृहीत** इत्यादि॥

**भीष्मः**—एह्येहि पौत्र! एवमेव ते बुद्धिप्रशमनं भवतु।

**दुर्योधनः**—अनुगृहीतोऽस्मि। मातुल! अभिवादये।

**शकुनिः**—वत्स!

एवमेव क्रतून् सर्वान् समानीयाप्तदक्षिणान्।
राजसूये नृपाञ्जित्वा जरासन्ध इवानय॥ २८॥

**द्रोणः**—अहो! आशीर्वचनेऽपि शकुनिरुद्योगं जनयति। अहो प्रियविरोधः खल्वयं क्षत्रियकुमारः।

**दुर्योधनः**—वयस्य! कर्ण! गुरुजनप्रणामावसाने प्राप्तक्रममुपभुज्यतां वयस्यविस्रम्भः।

**कर्णः**—गान्धारीमातः!

क्रतुव्रतैस्ते तनु गात्रमेतत् सोढुं बलं शक्ष्यसि पीडयानि।
अन्तस्त्वनामन्त्र्य न धर्षयामि राजर्षिधीराद् वचनाद् भयं मे॥ २९॥

---

एह्येहीत्यादि। बुद्धिप्रशमनं मनसो रागद्वेषकलुषतानिवृत्तिः॥

अभिवादितः शकुनिराशिषमाशास्ते—वत्स! एवमित्यादि। समानीय अनुष्ठाय। आप्तदक्षिणान् आप्ता पर्याप्ता दक्षिणा आर्त्विज्यवेतनं येषु तान्। राजसूये सर्वनृपालजयानन्तरनिर्वर्त्ये क्रतुविशेषे। राजसूयवचनं दुर्योधनस्य तदनुष्ठातृयुधिष्ठिरसाम्यसिद्ध्यर्थम्। आनय बन्दीकुरु। जरासन्धसादृश्यवचनं युधिष्ठिरातिशयसिद्ध्यर्थं, युधिष्ठिरेण हि जितेभ्यो राजभ्यः करमात्रं गृहीतं, न तु ते बन्दीकृता इति॥ २८॥

अहो इत्यादि। अहो आश्चर्यं, शकुनेर्बुद्धिवाम्यमन्यादृशमित्यर्थः। उद्योगं युद्धोद्यमं। प्रियविरोधः वैराप्रियः॥

वयस्येति। प्राप्तक्रमं प्राप्तपर्यायं यथा भवति तथा। प्राप्तपर्याय इति वा पाठः। वयस्यविस्रम्भः सखिस्नेहः तत्कार्यभूत आलिङ्गनसमुदाचारः॥

क्रत्विति। एतत्, ते, गात्रम् अङ्गं। क्रतुव्रतैः यज्ञदीक्षानुष्ठितैरुपवासादिनियमैः। तनु कृशम्। अस्ति। पूतत्वमनेन ध्वनितम्। त्वं, बलं, मम शक्तिम् आलिङ्गनकाले मया विनियोक्ष्यमाणामित्यार्थम्। सोढुं मर्षयितुं। शक्ष्यसि, यद्यर्थ-

**दुर्योधनः** — एवमेव ते बुद्धिरस्तु ।

**द्रोणः** — पुत्र! दुर्योधन! एष महेन्द्रप्रियसखो भीष्मको नाम भवन्तं सभाजयति ।

**दुर्योधनः** — स्वागतमार्याय । अभिवादये ।

**भीष्मः** — पौत्र! दुर्योधन! एष दक्षिणापथपरिघभूतो भूरिश्रवा नाम भवन्तं सभाजयिष्यति ।

**दुर्योधनः** — स्वागतमार्याय ।

**द्रोणः** — पुत्र ! दुर्योधन! भवतो यज्ञं सभाजयता वासुभद्रेण प्रेषि-

---

पर्यवसायिनी काक्वाक्तिरियम् । शक्तो भविष्यसि चेदित्यर्थः । पीडयानि गाढमालिङ्गानि अर्थात् त्वद्गात्रम् । एतेन दुर्योधनं प्रत्यतिगाढपरिष्वङ्गाभिलाषस्तदीयापूर्वगुणसम्पद्दर्शनजनितपरितोषातिशयमूलः सूचितः । अत एव परितोषातिशयादाह— अन्तस्तु तव चित्तं तु । अनामन्त्र्य प्रीतिपूर्वमनाभाष्य । न धर्षयामि न पीडयामि । रागद्वेषादिकषायापगमश्लाघ्यायाः साम्प्रतिकस्थितेर्न भेदयामीत्यर्थः । अपूर्वगुणयोगावसरेऽस्मिन् प्रीतिभाषणबहुमाने तव चित्तस्य कर्तव्ये तमकृत्वा तद्विपरीतं भेदनमहं कथं करवाणीत्यभिप्रायः । अधर्षणाध्यवसाये कारणमाह—राजर्षिधीराद् इह वृत्तौ राजर्षिशब्दो राजर्षिवचनमाह । राजर्षिवचनमिव धीरं शान्तप्रगल्भं राजर्षिधीरं तथाभूताद् वचनात् 'कृतश्रद्धो ह्यात्मे'त्यादिरूपात् । मे भयं, जायत इति शेषः । ईदृशवचनसूचितायास्तव विशुद्धायाश्चित्तवृत्तेर्धर्षणं पापाय स्यादिति च भयम् । साम्प्रतिकीं ते चित्तवृत्तिमभेदयन्नभिनन्दाम्येवेति पार्यन्तिकोऽभिप्रायः ॥ २९ ॥

**कर्णोक्तिमभिनन्दति—एवमेवे**त्यादि ॥

**पुत्रे**त्यादि । महेन्द्रप्रियसखः इन्द्रस्य प्रियः सहायः । प्रियश्चासौ सखा च प्रियसख इति 'राजाहःसखिभ्यः—' (५-४-९१)इति टच् समासान्तः । सभाजयति प्रीणाति । 'सभाज प्रीतिसेवनयोः' इति धातुश्चुरादिः ॥

**स्वागतमि**त्यादि । स्वागतं शोभनागमनप्रश्नोपचारः ॥

**पौत्रे**त्यादि । दक्षिणापथपरिघभूतः दक्षिणापथस्य विन्ध्यदक्षिणदेशस्य परिघभूतः अर्गलत्वं प्राप्तः परप्रवेशनिरोधेन पालक इत्यर्थः ॥

**स्वागतमि**त्यादि ॥

**पुत्रे**त्यादि । सभाजयता बहुमन्यमानेन । वासुभद्रेण, वासुः श्रीकृष्णः, वा-

तोऽभिमन्युर्भवन्तं सभाजयति ।

**शकुनिः**—वत्स! दुर्योधन! एष जरासन्धपुत्रः सहदेवो भवन्तमभिवादयति ।

**दुर्योधनः**—एह्येहि वत्स! पितृसदृशपराक्रमो भव ।

**सर्वे**—एतत् सर्वराजमण्डलं भवन्तं सभाजयति ।

**दुर्योधनः**—अनुगृहीतोऽस्मि । भोः! किन्नुखलु समागते सर्वराजमण्डले विराटो नागच्छति ।

**शकुनिः**—प्रेषितोऽस्य मया दूतः । शङ्के पथि वर्तत इति ।

**दुर्योधनः**—भो आचार्य! धर्मे धनुषि चाचार्य! प्रतिगृह्यतां दक्षिणा ।

---

सुदेव इति नाम्न एकदेशग्रहणात् । स चासौ भद्रः मङ्गलरूपः वासुभद्रः रामभद्र इतिवत् । अभिमन्युः अर्जुनसूनुः । सभाजयति सेवते ॥

अभिमन्युप्रत्यभिवादनं विस्मारयितुं दुर्योधनस्यावधानमन्यत्र शकुनिराकर्षति—**वत्से**त्यादि । अस्य वाक्यस्य पुरस्ताद् अभिमन्यूद्देश्यकं दुर्योधनवाक्यम् 'एह्येहि वत्स !' इत्येवंरूपं मातृकान्तरे पठ्यते ॥

**एह्येही**त्यादि ॥

**एत**दित्यादि ॥

**अन्वि**त्यादि । किन्नुखलु नागच्छति केन कारणेन नागत इत्यर्थः । वर्तमानसामीप्यविवक्षया भूते लट् । विराटानागमनकारणजिज्ञासोपन्यासश्चायं तच्छामकत्वेन विराटदूतसंवादस्यौचित्यप्राप्तिमुपरिष्टाद् घटयितुम् ॥

**प्रेषित** इत्यादि । शङ्के सम्भावयामि । वर्तते, अर्थाद् विराटः ॥

क्रत्वनुष्ठानप्रभवे मनःप्रशमे दानोत्साहे च भीष्माद्यभिनन्दनवशाद् दूरमुद्रिक्ते स्वस्य धर्मोपदेशाचार्यम् उचितदक्षिणादानेन पूजयितुमिच्छन्नाह—**भो आचार्ये**त्यादि । धर्मे प्रकृते क्रतौ । धनुषीत्युक्तिरुभयाचार्यत्वेन पूज्यतातिशयप्रतिपादनाय । दक्षिणा प्रकृतयज्ञसंबद्धा । प्रतिगृह्यतां । दक्षिणाद्रव्यस्याकारविशेषमनिर्दिशंस्तन्निर्देशस्य द्रोणायत्तत्वं सूचयति । तेन यस्तवेप्सितोऽर्थः, स दक्षिणात्वेन स्वीक्रियतामित्यभिप्रायः । प्रार्थनायां लोट ॥

**द्रोणः** — दक्षिणेति । भवतु भवतु । व्यपश्रयिष्ये तावद् भवन्तम् ।

**दुर्योधनः** — कथमाचार्योऽपि व्यपश्रयिष्यते ।

**भीष्मः** — भोः ! किन्नुखलु प्रयोजनं, यदा —

पीतः सोमो बाल्यदत्तो नियोगाच्छत्रच्छाया सेव्यते ख्यातिरस्ति ।
किं तद् द्रव्यं किं फलं को विशेषः क्षत्राचार्यो यत्र विप्रो दरिद्रः ॥ ३० ॥

---

**दक्षिणेती**त्यादि । दक्षिणेति किं ब्रूषे इति शेषः । भवतुभवत्वित्यनास्थावादः । दक्षिणा दूरेऽस्त्विति तदर्थः । भवन्तं, व्यपश्रयिष्ये सेविष्ये प्रार्थयिष्य इति यावत् । अर्थात् कालान्तरे, नेदानीमिति लृट्प्रयोगाद् गम्यते । यद्यपि द्रोणस्य पाण्डवार्धराज्यदापनरूपमीप्सितं हृदि सर्वदा परिवर्तते, तच्च यदृच्छालब्धेऽस्मिन् दुर्योधनप्रतिग्रहप्रार्थनावसरे उपन्यसितुमर्हम् । तथापि तत् सद्यो नोपन्यस्तं द्रोणेन 'दुर्योधनस्तत् साधयिष्यती'ति विश्वासाभावात् । उपजाते तु विश्वासे तत् पश्चादुपन्यसिष्यते । 'व्यपश्रमिष्ये तावद् भवन्तम्' इति ग्रन्थान्तरे पाठोऽस्ति । स त्वपपाठः । 'व्यपश्रमयिष्ये' इति पाठं परिकल्प्य वा व्यपगतश्रमं करिष्यामीत्यर्थवर्णनेन कथञ्चित् समर्थनीयः ॥

**कथमि**त्यादि । व्यपश्रयिष्यते व्यपश्रयणं याचकादेर्दातृप्रभृतीन् प्रति धर्मः । अत आचार्येण 'व्यपश्रयिष्ये' इति मां प्रति न वक्तव्यं, किन्तु आदेक्ष्यामीत्येव वक्तव्यमिति भावः ॥

आत्मसमानकार्यत्वाद् द्रोणस्य हृदयं जानन्नेव भीष्मः कालोचिताचार्यपूजाकरणाभिनिवेशिनो दुर्योधनस्य दक्षिणाप्रतिग्रहप्रार्थनवैफल्योद्भावनं तत्साफल्यसंपादनविषयमुद्यममुद्रेचयिष्यतीति मत्वा तत्प्रार्थनवैफल्यमुद्भावयति—**भोः किन्नुखल्विति** । किन्नुखलु प्रयोजनं न किमपि प्रयोजनम्, अर्थाद् दक्षिणाप्रतिग्रहप्रार्थनस्य ।

कुत इत्याकाङ्क्षायामाह — **यदा, पीतः सोम** इति । यदा यस्मात् कारणादित्यर्थः बाल्यदत्तः बाल्यं तारुण्यं यज्ञश्रमसहं वयः, तेन दत्तः योग्ये वयसि अभिषुत इत्यर्थः । सोमः सोमाख्ययज्ञलतारसः । नियोगाद् विधितः । पीतः । अर्थात् क्षत्राचार्येण । छत्रच्छाया त्वत्साम्राज्यातपत्रच्छाया । सेव्यते अनुभूयते । ख्यातिः कीर्त्तिः । अस्ति । अर्थात् क्षत्राचार्यस्य । एवञ्च धर्मभोगख्यातिभिः सन्तुष्टस्याचार्यस्यार्थित्वमेव न सम्भावितमित्यभिप्रायः । तस्मात् किन्नुखलु प्रयोजनमिति पूर्व-

**दुर्योधनः** — आज्ञापयतु भवान्, किमिच्छति । किमनुतिष्ठामि ।

**द्रोणः** — पुत्र! दुर्योधन! कथयामि ।

**दुर्योधनः** — किमिदानीं भवता विचार्यते ।

प्राणाधिकोऽस्मि भवता च कृतोपदेशः
शूरेषु यामि गणनां कृतसाहसोऽस्मि ।
स्वच्छन्दतो वद किमिच्छसि किं ददानि
हस्ते स्थिता मम गदा भवतश्च सर्वम् ॥ ३१ ॥

---

वाक्येन संबन्धः । अथाचार्यस्यार्थित्वाभावेऽपि अपूर्वसिद्धं किमपि द्रव्यं पुण्यं महिमानं वा तस्मै समर्प्य कृती स्यामिति तव मनोरथः, सोऽपि निष्प्रयोजन एव, द्रव्यादेराचार्ये प्रत्यपूर्वत्वाभावादित्यभिप्रायेणाह — क्षत्राचार्यो विप्रः द्रोणः । यत्र यस्मिन् विषये दरिद्रः, तद् द्रव्यं किं, न किमप्यस्तीत्यर्थः । तत्, फलं पुण्यं भोगो वा । किं, न किमपीत्यर्थः । सः विशेषः गुणातिशयः । कः न कोऽपीत्यर्थः । एवञ्चावाप्तसमस्तेप्सितत्वादयं न कमपि स्वार्थमीप्सितं दक्षिणात्वयोग्यं निर्देष्टुं शक्ष्यतीति व्यर्थ एव ते दक्षिणाप्रतिग्राहणोद्यम इति तात्पर्यम् ॥ ३० ॥

भूयः सनिर्बन्धमाह — **आज्ञापयत्वित्यादि** ॥

इष्टकथनप्रार्थननिर्बन्धिनि दुर्योधने दाक्षिण्यमिव सूचयन्नाह — **पुत्रेत्यादि** । कथयामीति काकूक्तिः । तया कथनस्य साफल्यनैष्फल्यविमर्शसूचनम् ॥

**किमित्यादि** । किं विचार्यते विमृश्यते । इष्टं दुर्योधनो दास्यति न वेति विमर्शो मास्त्वित्यर्थः ।

**प्राणाधिकोऽस्मीत्यादि** । प्राणाधिकः प्राणेभ्योऽप्यधिकः तवातिप्रिय इत्यर्थः । आद्यं विशेषणद्वयमप्रतारकत्वसूचनाय । कृतसाहसःअस्मि कृतमनुष्ठितं साहसं शूरकर्म येन स तथाभूतः भवामि । इदं विशेषणं शूरमध्यगण्यत्वं च गुरुकार्यनिर्वहणशक्तत्वद्योतनाय । स्वच्छन्दतः विस्रब्धं । किं ददानि मत्स्वामिकेषु द्रव्येषु कतमत् ते प्रयच्छामीत्यर्थः । सर्वस्वेच्छां सम्भावयन्नाह — गदा मम हस्ते स्थिता । आयुधैकवृत्तित्वात् क्षत्रियस्य आयुधमेव केवलं मद्धस्ते यावज्जीवस्थायीत्यभिप्रायः । सर्वं गदातिरिक्तं मत्सर्वस्वं । भवतश्च भवतस्तु । हस्ते स्थितमिति विपरिणामेन सम्बन्धः । अकृतेऽपि दाने दानानन्तरभाविन्याः स्थितेः स्थितमिति भूतत्वाख्यानं दाने विश्वासजननार्थम् ॥ ३१ ॥

**द्रोणः**—पुत्र! ब्रवीमि खलु तावत्। बाष्पवेगस्तु मां बाधते।

**सर्वे**—कथमाचार्योऽपि बाष्पमुत्सृजति।

**भीष्मः**—पौत्र! दुर्योधन! अफलस्ते परिश्रमः।

**दुर्योधनः**—कोऽत्र।

(प्रविश्य)

**भटः**—जयतु महाराजः।

**दुर्योधनः**—आपस्तावत्।

**भटः**—यदाज्ञापयति महाराजः। (निष्क्रम्य प्रविश्य) जयतु महाराजः। इमा आपः।

**दुर्योधनः**—आनय। (कलशं गृहीत्वा) भो आचार्य! अश्रुपातोच्छिष्टस्य मुखस्य क्रियतां शौचम्।

---

**पुत्रे**ति। पुत्र! ब्रवीमि खलु तावत्, इष्टं वदाम्येव वदितुं यत्नं करोम्येवेत्यर्थः। किन्तु बाष्पवेगो बाष्पस्य झटित्युद्गमोन्मुखता। मां बाधते, वदन्तं नानुमन्यते, किं करोमीत्यर्थः। पाण्डवदुःखस्मरणजन्मा चायं बाष्पवेग इति व्यक्तीभविष्यति॥

**कथमित्यादि**। उत्सृजति निर्गमयति। आचार्योऽपीति अपिशब्देन धीरसत्त्वता ध्वन्यते। धीरसत्त्वोऽप्ययं बाष्पं धारयितुं यन्न क्षमते, तदस्य दुःखमतिमहदित्यभिप्रायः॥

आचार्येण ब्रवीमीति वदता स्वहृदये किञ्चिदिष्टमस्तीति दिष्ट्या सूचितम्। तत्तु तन्मुखेन व्याहारयितुमशक्यमस्मिंस्तद् दुःखावसर इत्याशयेनाह—**पौत्रेत्यादि**। परिश्रमः आचार्यमिष्टं व्याहारयितुं त्वया क्रियमाणः प्रयत्नः। अफलः अतिभूमिं गते दुःखे कथमप्ययं न व्याहरिष्यतीत्यर्थः॥

दुःखितं समाश्वास्य व्याहारयिष्यामीति बुद्ध्याह—**कोऽत्रेति**॥

**प्रविश्येत्यादि**। कर्तव्यमाज्ञाप्यतामिति वाक्यशेषः॥

**आप इति**। आपस्तावत्, आनीयन्तामिति योग्यक्रियाध्याहारः॥

**यदित्यादि**। इमा आपः, आनीता इति शेषः॥

**आनयेत्यादि**। आनय जलकलशं मम हस्तेऽर्पयेत्यर्थः। **अश्रुपातोच्छिष्टस्य** अश्रुपातेन यदुच्छिष्टम् अशुद्धिः तस्येत्यर्थः। अथवा बाष्पासारदूषितस्येत्यर्थः; मुखविशेषणं चेदम्॥

**द्रोणः** —भवतु भवतु । मम कार्यक्रियैव मुखोदकमस्तु ।

**दुर्योधनः** —हा धिक्,

यदि विमृशसि पूर्वजिह्मतां मे यदि च समर्थयसे न दास्यतीति ।
शरशतकठिनं प्रयच्छ हस्तं सलिलमिदं करणं प्रतिग्रहाणाम् ॥ ३२ ॥

**द्रोणः** —हन्त लब्धो मे हृदयविश्वासः । पुत्र! श्रूयतां,

येषां गतिः क्वापि निराश्रयाणां संवत्सरैर्द्वादशभिर्न दृष्टा ।
त्वं पाण्डवानां कुरु संविभागमेषा च भिक्षा मम दक्षिणा च ॥ ३३ ॥

---

**भवत्विति** । भवतुभवत्विति जलशौचेऽनास्थावचनम् । कार्यक्रियैव मदिष्टस्य विवक्षितस्य कार्यस्य संसाधनमेव, न त्विदं कलशजलम् । मुखोदकं मुखशौचार्थं जलम् । अस्तु, कार्यसिद्धिरेव मम दुःखप्रशमनद्वारेण मुखे बाष्पं मार्जिष्यतीत्यभिप्रायः ॥

आचार्यः कार्यक्रियां प्रति मयि अविश्वासादेव स्वहृदयस्थं कार्यं न वक्तीति जानन्नाह—**हेति** । हाधिगिति कष्टोक्तिः । इदानीन्तनं मे चित्तार्जवमाचार्यो न प्रत्येतीत्येतच्च कष्टम् ।

ताद्विश्वासार्थमाह—**यदीति** । मे मम । पूर्वजिह्मतां भूतपूर्वं कुटिलत्वं । विमृशसि यदि चिन्तयसि चेत् । अत एव, न दास्यतीति दुर्योधनो मदिष्टं न प्रतिपादयिष्यतीति । समर्थयसे च यदि निश्चिनोषि च चेत् । तर्हि, शरशतकठिनं शराणां मुञ्जाख्ययज्ञियतृणविशेषाणां शतेन यज्ञेषु बहुश उपयुक्तेन कठिनं पाटनवशात् कठोरतलं । हस्तं प्रयच्छ मदभिमुखं प्रसारय । किमर्थमित्याकाङ्क्षायामाह—प्रतिग्रहाणां दीयमानस्य वस्तुनः स्वत्वेन स्वीकरणानां । करणं साधकतमं दानप्रतिग्रहाणामुदकपूर्वत्वनियमात् । इदं सलिलं जलम् । उत्सृज्यत इति शेषः । अर्थात् तव हस्ते । यद्वा तद्वा वस्तु भवतु भवदिष्टं, तत्स्वरूपश्रवणात् प्रागेव तद्दानोदकं भवतो हस्ते विश्वासार्थमिदमुत्सृजामि, तदिदं प्रतिगृह्यतामिति भावः ॥ ३२ ॥

**हन्तेत्यादि** । हन्त हर्षे । हृदयविश्वासः हृदयस्य विश्वासः, सर्वराजसमक्षमुदकदानपूर्वं कृतां प्रतिज्ञां दुर्योधनो न व्यभिचरिष्यतीति प्रत्ययः ।

**येषामित्यादि** । गतिः शरणं । कुरु प्रार्थनायां लोट् । संविभागं राज्यांशदानम् । एषा मम भिक्षा च दक्षिणा च, भवति । अस्य मदीप्सितस्य करणे गुरुदक्षिणादानचारितार्थ्यं न केवलं, गुरुभिक्षादानपुण्यमपि ते सिद्धं भविष्यतीत्यभिप्रायः । 'एषा हि भिक्षा' इति पाठान्तरम् ॥ ३३ ॥

**शकुनिः** — (सोद्वेगम्) मा तावद् भोः !

उपन्यस्तस्य शिष्यस्य विश्वस्तस्य च गौरवे ।
यज्ञप्रस्तुतमुत्पाद्य युक्तेयं धर्मवञ्चना ॥ ३४ ॥

**द्रोणः** — कथं धर्मवञ्चनेति । मा तावद् भो गान्धारविषयविस्मित ! शकुने ! त्वदनार्यभावात् सर्वलोकमनार्यमिति मन्यसे । हन्त भोः !

---

**सोद्वेगमित्यादि** । उद्वेग आवेगः । मा तावदिति पाण्डवानुग्राहकद्रोणवाक्यप्रतिक्षेपः । भो इति द्रोणं प्रति कोपसूचनम् । 'आचार्य !' इत्यपि ग्रन्थान्तरे पठ्यते ।

**उपन्यस्तस्येति** । उपन्यस्तस्य 'प्रतिगृह्यतां दाक्षिणा' इति गुरुभक्तोचितमुपन्यस्तवतः । कर्तरि क्तः । गौरवे गुरुत्वे त्वदीये । विश्वस्तस्य अयं गुरुत्वान्मद्धितपरो ममाहितमर्थं दक्षिणात्वेन न निर्देक्ष्यतीति प्रत्ययमुपगतस्य । शिष्यस्य, यज्ञप्रस्तुतं यज्ञरूपं प्रस्तुतम् । अथवा यज्ञे प्रस्तुतम् ईप्सितदानप्रतिज्ञानं पूर्वोक्तमित्यर्थः । उत्पाद्य, इयं, धर्मवञ्चना धर्मो गुरुदक्षिणा तेन हेतुना वञ्चना अतिसन्धानम् ईप्सितदानप्रतिज्ञापनद्वारेण स्वकीयराज्यार्धहापनरूपमित्यर्थः । युक्ता न्याय्येति काकुः, अयुक्तेत्यर्थः । यथोक्तवञ्चनोद्देशेनैव भवता दुर्योधनोऽस्मिन् यज्ञे प्रवर्तित इति भावः ॥ ३४ ।

**कथमित्यादि** । मा तावदिति शकुनिवाक्यप्रतिक्षेपः । गान्धारविषयविस्मित! गान्धारविषयेण गान्धारदेशेन अर्थात् तदाधिपत्येन विस्मित ! गर्वित ! । त्वदनार्यभावात् तव अनार्यभावाद् अयुक्तकारित्वाद् द्यूतधर्मेण धर्मपुत्रवञ्चकत्वरूपात् । सर्वलोकं सर्वं जनं मादृशमार्यजनमपि । अनार्यमिति मन्यसे, अनार्यम् असाधुं जानीषे इत्यर्थः । इह इतिशब्दस्य कर्मत्वाभिधायिनो द्वितीययोक्तेऽपि कर्मत्वे सहप्रयोगः 'यं सन्न्यासमिति प्राहुः' (६।२) इति भगवद्गीताप्रयोगवद् 'उक्तार्थानामप्रयोग' इति न्यायस्य प्रायिकत्वाश्रयणात् समानार्थयोः सहप्रयुक्तयोः क्वचित् सम्भूयार्थबोधकत्वाश्रयणाच्च । अथवा इति अनार्यं मन्यसे, इति उक्तेन वञ्चकत्वेन प्रकारेण, अनार्यं मन्यसे, उक्तवञ्चकत्वरूपासाधुत्वविशिष्टं मन्यस इत्यर्थः । यद्वा इतिशब्दो हेतौ । ईप्सितदानप्रतिज्ञापनात् पाण्डवार्धराज्यदानवरणाद्वा हेतोरित्यर्थः । हन्तेति वाक्यारम्भे, हन्त ते कथयिष्यामि न्याय्यं वाक्यमित्यर्थः । 'विषयमात्रविस्मित' इति ग्रन्थान्तरे पाठः ॥

भ्रातॄणां पैतृकं राज्यं दीयतामिति वञ्चना ।
किं परं याचितैर्दत्तं बलात्कारेण तैर्हृतम् ॥ ३५ ॥

**सर्वे**—कथं बलात्कारेण नाम ।

**भीष्मः**—पौत्र ! दुर्योधन ! अवभृथस्नानमात्रमेव खलु तावत् । मित्रमुखस्य शत्रोः शकुनेर्वचनं न श्रोतव्यम् । पश्य पौत्र !,

यत् पाण्डवा द्रुपदराजसुतासहायाः
कान्ताररेणुपरुषाः पृथिवीं भ्रमन्ति ।
(त?य)त् त्वं च तेषु विमुखस्त्वयि ते च वामा-
स्तत् सर्वमेव शकुनेः परुषावलेपः ॥ ३६ ॥

---

**भ्रातॄणामिति** । भ्रातॄणां पाण्डवानां । पैतृकं तात्पितृसम्बन्धि, न तु दुर्योधनपितृसम्बन्धि । राज्यं, दीयतामिति, उपदेश इति शेषः । वञ्चना इयं काकूक्तिः, न वञ्चनेत्यर्थः । अयं चोपदेशो दुर्योधनमानरक्षणायैव कृतः, न तु पाण्डवानुग्रहायेत्यभिप्रायं गुणदोषप्रश्नभङ्ग्याविष्करोति—याचितैः अस्मत्प्रार्थनाभिः भावे क्तः । दत्तं दानम् । अर्थाद्राज्यस्य । किं परं किं प्रशस्तम् । वरमिति ग्रन्थान्तरे पाठः, तदा मनागिष्टमित्यर्थः । पक्षान्तरमाह—तैः भ्रातृभिः पाण्डवैः । बलात्कारेण शूरकर्मणा युद्धप्रसभेनेत्यर्थः । हृतं राज्यस्य हरणं । किं परं किं प्रशस्तम् । त्वमेव कार्यगुरुलघुभावं चिन्तयित्वा कथयेत्यर्थः । अस्मत्सान्त्वाननुसरणे हि दुर्योधनस्य मानहानिः स्यादिति भावः ॥ ३५ ॥

**कथमिति** । कथं बलात्कारेण नाम, हृतं भविष्यतीति शेषः । इयं भीष्मातिरिक्तानामीर्ष्योक्तिः । नामेति क्रोधे ॥

**पौत्रेत्यादि** । अवभृथस्नानमात्रमेव खलु तावद्, इदानीं वर्तते, न तु द्यूतं, यत्र शकुनिवचनं प्रमाणीकर्तव्यमित्यर्थः । मित्रमुखस्य मित्रं प्रियावेदकं मुखं वाग् यस्य स तथाभूतः तस्य, वाङ्मात्रमित्रस्येत्यर्थः । शत्रोः क्रियायाममित्रस्य । 'नखलु मित्रमुखस्य शत्रोः शकुनेर्वचनं श्रोतव्यम्' इति ग्रन्थान्तरे पाठः ।

शत्रुत्वमुपपादयति—**यदिति** । द्रुपदराजसुतासहायाः द्रौपदीसहिताः । पाण्डवाः, कान्ताररेणुपरुषाः सन्तः कान्तारे दुर्गमे मार्गे ये रेणवः पांसवः तैः परुषाः कर्बुरकायाः सन्तः । पृथिवीं भूमिं । भ्रमन्ति पर्यटन्ति । इति यत्, त्वं च,

**दुर्योधनः**—भवतु, एवं तावदाचार्य ! पृच्छामि ।

**द्रोणः**—पुत्र ! कथय ।

**दुर्योधनः**—

यत् पुरा ते सभामध्ये राज्ये माने च धर्षिताः ।
बलात्कारसमर्थैस्तैः किं रोषो धारितस्तदा ॥ ३७ ॥

**द्रोणः**—अत्रेदानीं धर्मच्छलेन वञ्चितो द्यूताश्रयवृत्तिर्युधिष्ठिरः प्रष्टव्यः,

---

तेषु पाण्डवेषु विषये । विमुखः विरुद्धवृत्तिः । ते च पाण्डवाश्च । त्वयि, वामाः विमुखाः । इति यत्, तत् सर्वमेव, अनर्थजातं । शकुनेः, परुषावलेपः परुषः तीक्ष्णः अवलेपः अक्षशौण्डत्वनिमित्तो गर्वः गर्वजनितमित्यर्थः । जन्यजनकयोरभेदोपचारः । 'परुषं कर्बुरे रूक्षे' इति मेदिनी ॥ ३६ ॥

भवत्वित्यादि । भवतु शकुनिदोषवर्णनमप्रस्तुतत्वाद् दूरेऽस्त्वित्यर्थः । एवं वक्ष्यमाणेन प्रकारेण । 'भवतु' इत्यतः प्राक् 'पितामह !' इति, 'आचार्य ! ' इत्यस्य स्थाने 'आचार्यम्' इति च ग्रन्थान्तरे पठ्यते ॥

पुत्रेत्यादि ॥

यदिति । पुरा द्यूतकाले । ते पाण्डवाः । सभामध्ये, राज्ये, माने चित्तसमुन्नतौ च । धर्षिताः अस्माभिराक्रान्ताः, द्यूतजयेन तेषां राज्यमपहृतं पत्नीवस्त्रापहारादिना मानभङ्गश्च कृत इत्यर्थः । इति यत्, तदा तस्मिन् उभयविधधर्षणकाले कोपसर्वस्वप्रकाशनयोग्ये । बलात्कारसमर्थैः, तैः पाण्डवैः । रोषः कोपः, किं धारितः कुतो नियन्त्रितः । बलात्कारप्रदर्शनार्हे तस्मिन्नपि काले तदप्रदर्शनं तेषां बलात्कारासमर्थत्वं हि गमयतीत्यभिप्रायः ॥ ३७ ॥

अत्रेत्यादि । अत्र रोषधारणविषये । धर्मच्छलेन धर्म इति छलं वस्तुतो न धर्मः धर्मच्छलं तेन द्यूतपराजयोपनतदासभावानतिक्रमणात्मना धर्माभासेनेत्यर्थः। वञ्चितः जनिततदनुरोधदुरभिनिवेशः प्रापितानर्थो वा । द्यूताश्रयवृत्तिः अक्षदेवनव्यसनी । युधिष्ठिरः । प्रष्टव्यः पर्यनुयोक्तव्यः अपराधीत्यर्थः । अपराधी खलु नाम प्रष्टव्यो भवति 'कुतोऽकार्यं कृतवानसी'ति । एतेन रोषधारणं धर्मानुरोधिनो युधिष्ठिरस्यापराधेन कारितं, न तु बलात्कारासामर्थ्येनेति ध्वनितम् ।

येन भीमः सभास्तम्भं तुलयन्नेव वारितः ।
यद्येकस्मिन् विमुक्तः स्यान्नास्माञ्छकुनिराक्षिपेत् ॥ ३८ ॥

भीष्मः—अन्यत् प्रस्तुतमन्यदापतितम् । भो आचार्य ! कार्यमत्र गुरुतरं, न कलहः ।

द्रोणः—मात्र कर्दनं कार्यं, कलह एव भवतु ।

भीष्मः—प्रसीदत्वाचार्यः । पश्य पौत्र !,

ये दुर्बलाश्च कृपणाश्च निराश्रयाश्च
त्वत्तश्च साम मृगयन्ति न गर्वयन्ति ।

---

अपराधं विशदयितुमाह—येनेति । येन, भीमः, सभास्तम्भं द्यूतशालास्थान् स्तम्भान् जातावेकवचनम् । तुलयन्नेव उन्मिमान एव । उन्मानमिह तारतम्यपरीक्षणं, 'किमनेन स्तम्भेन धर्षयितॄन् प्रहरेयं किममुना स्तम्भेने'ति तत्सारफल्गुतां दृष्ट्वा पर्यालोचयन्नेव सन्नित्यर्थः । वारितः 'मा कुरु संरम्भमि'ति प्रतिषिद्धः । स प्रष्टव्य इति पूर्ववाक्येन सम्बन्धः । भीमः, एकस्मिन् उक्ते कस्मिंश्चित् संरम्भे । विमुक्तश्चेद् धर्मपुत्रेणानिवारितोऽभविष्यच्चेत् । शकुनिः, अस्मान्, नाक्षिपेत् न निन्देद् इदानीम् । तस्य तदानीमेव द्यूतसभायां भीमहतत्वसम्भवादिति तात्पर्यम् । अत्र व्यङ्ग्यस्य शकुनिवधस्य शकुनिकर्तृकानाक्षेपं वाच्यं प्रत्युपपादकतया गुणीभावो वेदितव्यः ॥ ३८ ॥

अन्यदित्यादि । प्रस्तुतं वस्तु राज्यसंविभागार्थो दुर्योधनानुनयः, आपतितं तु कलहः ॥

मात्रेति । अत्र संविभागविषये कर्दनं कुत्सितः शब्दः 'एषा च भिक्षा मम दक्षिणा च' इत्येवंरूपो याच्ञादैन्यपरः शब्द इत्यर्थः । मा कार्यं न कर्तुमर्हम् । पूर्वं तत् दुर्योधनधर्मबुद्धिविस्रम्भिणा मया कृतम्; दुर्योधनस्य शकुनिदुर्बुद्धिनेयतायां त्विदानीमप्यनुवर्तमानायामस्थान एव तत् प्रयुक्तमित्यनुशय्यत एवेति भावः । कर्दनमित्यस्य स्थाने कदर्थनमिति वा पाठः । कुत्सितं याचनमिति तदर्थः । कलह एव भवतु विवाद एव काममस्तु । न्यायानुगृहीतेन कलहेनैव कार्यं साधयाम इति भावः । एतेन दुर्योधनवाक्यविषयोऽमर्षः प्रकाशितः ॥

रुष्टमाचार्यं कार्यहानिभिया शमयन् दुर्योधनं चोपच्छन्दयन्नाह—प्रसीदत्वित्यादि । हे पौत्र ! पश्य प्रतीक्षस्व । तान् इत्याक्षेपलभ्यं श्लोके यच्छब्दोपादानात् ।

ज्येष्ठो भवान् प्रणयिनस्त्वयि ते कुटुम्बे
तान् धारयिष्यसि मृगैः सह वर्तयन्तु ॥ ३९ ॥

**शकुनिः** — वर्तयन्तु वर्तयन्तु ।

**कर्णः** — भो आचार्य ! अलममर्षेण । दुर्योधनो हि नाम,
हितमपि परुषार्थं रुष्यति श्राव्यमाणो
वरपुरुषविशेषं नेच्छति स्तूयमानम् ।

---

**य इत्यादि** । ये पाण्डवाः । दुर्बलाश्च बलहीनाश्च । कृपणाश्च कुत्सिताश्च । निराश्रयाश्च अशरणाश्च । भवन्तीति शेषः । अत एव त्वत्तः त्वया सह । साम सान्त्वं । मृगयन्ति इच्छन्तीत्यर्थः । न गर्वयन्ति च गर्वं न भजन्ते च, त्वय्युच्चैश्शिरसो न भवन्तीत्यर्थः । तान् पश्येति पूर्वेण सम्बन्धः । भवान् ज्येष्ठः कनिष्ठपालनाधिकृत इत्यर्थः । भवति । ते पाण्डवाः । त्वयि, प्रणयिनः स्निग्धवृत्तयः । भवन्ति । इत्थं वस्तुस्थितौ सत्यां प्रतिपत्तिं द्विकोटिकं प्रश्नकाका पृच्छति — तान् पाण्डवान् । कुटुम्बे धारयिष्यसि स्वकुटुम्बे अन्तर्भाव्य भरिष्यसि किम् । मृगैः हरिणैः सह । वर्तयन्तु यावज्जीववनवासेनैव देहयात्रां कुर्वन्तु किम् । अर्थात् ते, हरिणसहवर्तनेन कार्यरूपेण कारणभूताया उपेक्षाया आक्षेपाद् 'अत्यन्तमेव तान् उपेक्षिष्यस एव किम्' इति पर्यवसितः प्रश्नार्थः । अनयोश्च धारणोपेक्षापक्षयोः कतरः श्रेयानिति त्वमेव विमृश्य कथयेत्यभिप्रायः । उपेक्षापक्षस्य तत्कार्यमुखेन कथनं दुष्टत्वादनुपादेय एव स इति बोधनार्थम् । इह कार्येण प्रस्तुतेन कारणस्य प्रस्तुतस्य द्योतनात् प्रस्तुताङ्कुरालङ्कारः । 'प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः' इति तल्लक्षणम् ॥ ३९ ॥

**वर्तयन्त्वित्यादि** । मृगसहवर्तनपक्ष एव स्वीकार्य इति दुर्योधनं प्रति दुरुपदेशोऽयं शकुनेस्तदनार्यत्वानुरूपः ॥

विगृह्यव्यवहारात् कार्यविपरीतादाचार्यं वारयन् कार्यसिद्ध्यनुकूलं व्यवहारमार्गं कर्णः कल्याणबुद्धित्वाद् बोधयति—**भो** इत्यादिना । अमर्षेण रोषेण 'भ्रातॄणां पैतृकम्' इत्यादित्वद्वाक्याद् दुर्योधनहृदयसन्दीपनात् प्रकाशितेन । अलं साध्यं नास्ति । दुर्योधन इत्यादि श्लोकान्वयि ।

कुत इति चेदाह—**हितमिति** । हि यतः । दुर्योधनो नाम । परुषार्थं निष्ठुरवाच्यं । हितमपि पथ्यवाक्यमपि । श्राव्यमाणः सन्, रुष्यति कुप्यति तेज-

गतमिदमवसानं रक्ष्यतां शिष्यकार्यं
गज इव बहुदोषो मार्दवेनैव वाह्यः ॥ ४० ॥

**द्रोणः**—वत्स ! कर्ण ! तेजस्वि ब्राह्मण्यम् । काले सम्बोधितोऽस्मि । एषोऽहं भवच्छन्दमनुवर्ते । पुत्र ! दुर्योधन ! अहं तव प्रभावी ननु ।

**भीष्मः**—एष इदानीं मार्गेणारब्धः । सान्त्वं हि नाम दुर्विनीतानामौषधम् ।

**दुर्योधनः**—न ममैव, कुलस्यापि मे भवान् प्रभुः ।

**द्रोणः**—एतत् तवैव युक्तम् । तत् पुत्र !

---

स्वित्वात् । वरपुरुषविशेषं श्रेष्ठपुरुषगतं गुणातिशयं । स्तूयमानं, नेच्छति न रोचयते मानित्वात् । ईदृशस्वभावता दुर्योधनस्य प्रसिद्धेति नामपदेन द्योत्यते । इदं यत् तव सामर्षं वचनं, यच्च तदनुरूपं दुर्योधनशकुन्योः प्रतिवचनम् एतद् उभयमपीत्यर्थः । अवसानं गतं समाप्तिं प्राप्तं, भूय ईदृशं न भवितुमर्हमिति भावः । शिष्यकार्यं पाण्डवकार्यं दुर्योधनकार्यं च । तत्राद्यं राज्यांशप्राप्तिरूपं, द्वितीयं गुरुदक्षिणादानप्रतिज्ञानरूपं । रक्ष्यतां परिपाल्यतां न तु कोपादिना हाप्यताम् । तदर्थं किं कर्तव्यमिति चेदाह—बहुदोषः बहवो दोषा अनर्था यस्मात् कुपितादुत्पद्यन्ते स बहुदोषः । अर्थाद् दुर्योधनः । गज इव, मार्दवेन मृदुकर्मणा सान्त्वेनैवेत्यर्थः । वाह्यः नेतव्यः कार्यसिद्धिकक्ष्याम् ॥ ४० ॥

**वत्सेत्यादि** । तेजस्वि ज्वलनस्वभावम् , अतः शकुनिवचनात् कोपेन ज्वलितं मे हृदयमासीदित्यभिप्रायः । काले बोधनयोग्येऽवसरे । सम्बोधितः कार्यसिद्ध्युपायं सम्यग् बोधितः । भवच्छन्दं भवदभिप्रायम् । प्रभावी ननु प्रभावो माहात्म्यम् अथवा अनुशासनस्वातन्त्र्यं तद्वान् किम् । प्रश्ने ननुशब्दः । 'प्रभावी' इत्यस्य स्थाने 'प्रभवामि' इति मातृकान्तरे पाठः ॥

**एष इत्यादि** । मार्गेण कार्यसाधकेन पथा । स च सान्त्वम् । आरब्धः आरब्धवान् व्यवहर्तुम् । भुक्ता ब्राह्मणा इतिवत् क्तः । दुर्विनीतानाम् अविधेयानाम् । औषधं दुर्विनयव्याधिभेषजं विधेयत्वापादकमित्यर्थः । वाक्यमिदमात्मगतं स्यात् ॥

**न ममैवेत्यादि** । प्रभुः अनुशासनस्वतन्त्रः ॥

**एतदित्यादि** । एतद् ईदृशं सर्वभावविश्वस्तत्वद्योतकं गुरुभक्तिपूतं वचनमित्यर्थः ।

त्वं वञ्च्यसे यदि मया न तवात्र दोष-
स्त्वां पीडयामि यदि वास्तु तवैष लाभः ।
भेदाः परस्परगता हि महाकुलानां
धर्माधिकारवचनेषु शमीभवन्ति ॥ ४१ ॥

**दुर्योधनः** — तेन हि समर्थयितुमिच्छामि ।

**द्रोणः** — पुत्र ! केन समर्थयितुमिच्छसि ।

---

तत् पुत्र ! त्वमिति । तत् मयि सर्वभावविश्वस्तत्वाद्धेतोः । हे पुत्र ! मया त्वं वञ्च्यसे यदि, अत्र तव दोषो न, अपि तु ममैव दोषः विश्वस्तशिष्यवञ्चकत्वापवादलक्षणो भविष्यति । अतस्त्वद्वञ्चनमयशस्यमात्मनः कथमहं कुर्यां, किन्तु हितमेव ते कुर्यामिति विश्वसिहीति भावः । वा अथवा । त्वां पीडयामि यदि प्रतिश्रुतदक्षिणादानं निर्बन्धेन कारयामि चेदित्यर्थः । एषः पीडनं, विधेयप्राधान्यात् पुंस्त्वम् । तव लाभोऽस्तु । स्वप्रतिज्ञानुपालनं गुरुदक्षिणासमर्पणं भ्रातृसंविभाग इत्येवंरूपबहुविधधर्मसिद्धिहेतुरित्यङ्गीक्रियतामित्यभिप्रायः । 'वास्तु' इत्यस्य स्थाने 'वा स' इति पाठान्तरम् । चिरप्ररूढे द्वेषे विद्यमाने कथमहं तेषां राज्यसंविभागं कुर्यामिति चेत्, मदनुशिष्टधर्मापेक्षया त्वया द्वेषस्त्यक्तव्य इति सामान्यन्यायेन द्योतयन्नाह—महाकुलानाम् उत्तमकुलप्रसूतानां पुरुषाणां । परस्परगताः अन्योन्यसंम्बद्धाः । भेदाः विद्वेषाः । धर्माधिकारवचनेषु धर्मोऽधिक्रियते एष्विति धर्माधिकाराणि धर्मनिरूपकाणि तथाभूतेषु वचनेषु गुरुजनवाक्येषु, अथवा धर्माधिकाराः धर्मोपदेशाधिकारिणो गुरुजनाः तेषां वचनेषु अनुशासनवाक्येष्वित्यर्थः । प्रवृत्तेष्विति शेषः । शमीभवन्ति शमाः सन्धयः शान्तिगुणा वा, अशमाः शमा भवन्ति शमीभवन्ति शमात्मना विक्रियां प्राप्नुवन्ति, मिथो भेदाः प्ररूढा अपि महाकुलानां गुरुजनोपदिष्टधर्मापेक्षागौरवात् स्वरूपतो नश्यन्ति, शमाश्चोत्पद्यन्त इति भावः । भेदविरुद्धेष्वपि शमेषु भेदस्वरूपनाशोत्तरकालभावित्वमात्रेण भेदविकारत्वोपचारः । अनेन सामान्यन्यायोपन्यासेन प्रस्तुतविशेषद्योतनादप्रस्तुतप्रशंसालङ्कारः । शमीभवन्तीति 'कृभ्वस्तियोगे—' (५-४-५०) इति च्विप्रत्ययः ॥ ४१ ॥

**तेन हीत्यादि** । तेन हि तर्हि । समर्थयितुं मन्त्रयित्वा निर्णेतुम् ॥

**पुत्रेत्यादि** ॥

भीष्मेण कर्णेन कृपेण केन किं सिन्धुराजेन जयद्रथेन ।
किं द्रौणिनाहो विदुरेण सार्धं पित्रा स्वमात्रा वद पुत्र ! केन ॥ ४२ ॥

**दुर्योधनः**—नहि नहि, मातुलेन ।

**द्रोणः**—किं शकुनिना । हन्त विपन्नं कार्यम् ।

**दुर्योधनः**—मातुल ! इतस्तावत् । वयस्य ! कर्ण ! इतस्तावत् ।

**द्रोणः**—(आत्मगतम्) भवतु, एवं तावत् करिष्ये । (प्रकाशम्) वत्स! गान्धारराज ! इतस्तावत् ।

**शकुनिः**—अयमस्मि ।

**द्रोणः**—वत्स !

क्रोधप्रायं वयो जीर्णे क्षन्तव्यं वटुचापलम् ।
अस्य रूक्षस्य वचसः परिष्वङ्गः शमीक्रिया ॥ ४३ ॥

---

**भीष्मेणे**त्यादि । द्रौणिना द्रोणपुत्रेण अश्वत्थाम्ना । आहो अथवा । इह कतिपयानां नामनिर्देशः शकुनिव्युदासं द्योतयितुम्, एष्वन्यतम एव तव मन्त्रणसहायो भवितुमर्हो, न तु शकुनिरिति ॥ ४२ ॥

**नही**त्यादि । मातुलेन मातृभ्रात्रा शकुनिना ॥

**किं शकुनिने**त्यादि । हन्तेत्यतः प्राक् स्वगतमिति पठनीयं, कार्यविपत्तिवचनस्य शकुन्यश्रव्यत्वात् । विपन्नं नष्टम् । शकुनिर्जैह्म्याद् मत्कृताक्रोशकोपाच्च कार्यविपरीतमेव कथयिष्यतीत्यभिप्रायः ॥

मिथोमन्त्रणार्थं परमाप्ताभिमतौ शकुनिकर्णावाह्वयति—**मातुले**त्यादि । इत इति मन्त्रणयोग्यदेशनिर्देशः ॥

दुर्योधने शकुनिदुर्मन्त्रितमपेक्षमाणे सति प्रतिपत्तिं मनसिकृत्याह—**भवत्वि**त्यादि ॥

**अयमि**त्यादि ॥

**वत्से**त्युपच्छन्दनार्थं वात्सल्यद्योतकम् ।

शकुनिं प्रसादयति—**क्रोधे**त्यादि । क्रोधप्रायं कोपबहुलं । वटुचापलं । बालोचितं मादृशानुचितं चपलकर्म रूक्षभाषणलक्षणम् । अस्य 'नास्माञ्छकुनिराक्षिपेदि'ति पूर्वोक्तस्य । परिष्वङ्गः वात्सल्यालिङ्गनं । शमीक्रिया शान्तीकरणं प्रायश्चित्तमित्यर्थः । शमशब्दाच्छमवद्वृत्तेश्च्विप्रत्ययः, तद्युक्ताच्च कृञः शप्रत्ययः ॥ ४३ ॥

**भीष्मः**—(आत्मगतम्)

एष शिष्यस्य वात्सल्याच्छकुनिं याचते गुरुः ।
एवं सान्त्वीकृतोऽप्येष नैव मुञ्चति जिह्मताम् ॥ ४४ ॥

**शकुनिः**—(आत्मगतम्) अहो शठः खल्वाचार्यः, स्वकार्यलोभान्मां सान्त्वयति ।

(सर्वे परिक्रम्योपविशन्ति ।)

**दुर्योधनः**—मातुल ! पाण्डवानां राज्यार्धं प्रति को निश्चयः ।

**शकुनिः**—न दातव्यमिति मे निश्चयः ।

**दुर्योधनः**—दातव्यमिति वक्तुमर्हति मातुलः ।

**शकुनिः**—यदि दातव्ये राज्ये किमस्माभिः सह मन्त्रयसे । ननु सर्वमेव प्रदीयताम् ।

---

**एष** इत्यादि । सान्त्वीकृतोऽपि अनुनीतोऽपि । जिह्मतां कुटिलत्वम् । 'सान्त्वीकृतो हि' इति ग्रन्थान्तरे पाठः ॥ ४४ ॥

**अहो** इत्यादि । शठः वञ्चकः ॥

उपविष्टेषु सर्वेषु पृच्छति—**मातुले**त्यादि । को निश्चयः किं तव मतम् ।

**न दातव्यमि**त्यादि । मामपृष्ट्वैवाचार्यस्य राज्यार्धयाच्ञावसरोत्पादनं त्वया पूर्वं कृतमयुक्तमित्याशयः ॥

**दातव्यमि**त्यादि । इति वक्तुमर्हति, अनिच्छतापि भवता एवमिदानीं वक्तव्यमापतितं मम दानप्रतिज्ञारभसदोषादिति भावः ॥

**यदी**त्यादि । राज्ये यदि दातव्ये राज्यं दातव्यं चेत् तर्हीत्यर्थः । सत्सप्तमीमात्रप्रयोगेण पर्याप्तौ यदिशब्दस्य सहप्रयोगो व्यवहारवैचित्र्यात् । अथवा, सप्तमीमात्रप्रयोगे यद्यर्थाक्षेपी तर्ह्यर्थः सप्तमीवाच्यः, यदि दातव्यं राज्यं तर्हीति तदार्थप्रतीतेः । तत्राक्षेपलभ्योऽपि यद्यर्थः स्पष्टतरप्रतिपत्तये यदिशब्दप्रयोगेण वाच्यतां नीयते । यथा 'यदि दातव्यं राज्यं तर्हि किमस्माभिः सह मन्त्रयसे' इति प्रयोगे तर्ह्यर्थः सामर्थ्यगम्योऽपि तर्हिपदप्रयोगेण वाच्यतां नीयते, तद्वत् । ननु सर्वमेव प्रदीयतामित्यमर्षसर्वस्वाविष्करणम् ॥

**दुर्योधनः**—वयस्य ! अङ्गराज ! भवानिदानीं न किञ्चिदाह ।

**कर्णः**—इदानीं किमभिधास्यामि,

रामेण भुक्तां परिपालितां च सुभ्रातृतां न प्रतिषेधयामि ।
क्षमाक्षमत्वे तु भवान् प्रमाणं सङ्ग्रामकालेषु वयं सहायाः ॥ ४५ ॥

**दुर्योधनः**—मातुल! बलवत्प्रत्यमित्रोऽनुपजीव्यश्च कश्चित् कुदेशश्चिन्त्यताम् । तत्र वसेयुः पाण्डवाः ।

---

मातुलाभिप्रायेऽवगते कर्णं पृच्छति—**वयस्येत्यादि** । न किञ्चिदाह, आवयोरेवमभिप्रायविसंवादे समापतिते तव तूष्णीम्भावो न युक्त इत्यर्थः ॥

**इदानीमिति** । इदानीं युवयोर्विसंवादावसरेऽस्मिन् । किमभिधास्यामि निर्णायकं न किञ्चिद् वक्ष्यामि ।

कुत इति चेदाह — **रामेणेति** । रामेण दाशरथिना । भुक्तां फलतोऽनुभूताम् , अत एव परिपालितां च, सुभ्रातृतां प्रशस्तो भ्राता यस्य स सुभ्राता तस्य भावः सुभ्रातृता ताम् । न प्रतिषेधयामि न प्रतिषेधामि । स्वार्थे णिच् । राज्यार्धदाने त्वया क्रियमाणे सत्यवश्यम्भाविनं तव पाण्डवानां च सौभ्रात्रलक्षणं महागुणं स्वयं घटयितुं योग्यमघटयन्नपि कथमहं विघटयेयमिति भावः । एवं तावत् सुभ्रातृत्वाप्रतिषेधभङ्ग्या सुभ्रातृत्वकारणस्य राज्यार्धदानस्य प्रस्तुतस्याप्रतिषेधो द्योतितः । तर्हि राज्यार्धदानं युक्तमित्येव स्पष्टमुच्यतामिति चेत् तत्राह—क्षमाक्षमत्वे तु राज्यार्धदानस्य युक्तत्वायुक्तत्वविमर्शविषये पुनः । भवान् प्रमाणं त्वमेव निर्णयप्रभविष्णुः न त्वहं, युक्तत्वोक्तौ युद्धाप्रसङ्गेन मय्यर्जुनवधप्रतिज्ञानिर्वहणकातरत्वशङ्कोदयाद् , अयुक्तत्वोक्तौ च धर्महापनदोषप्रसङ्गादिति भावः । इदानीं ममास्मिन् कार्यसङ्कटे त्वत्सौहार्दमुदासीनं चेत्, तत् कुत्रोपयोक्ष्यत इत्याशङ्कायामाह—वयम् अहं मद्वर्ग्याश्च । संग्रामकालेषु अक्षमत्वपक्षाश्रयेण त्वया पाण्डवैः सह यदा युद्धं प्रवर्त्यते तेषु समयेष्वित्यर्थः । सहायाः, अर्थात् तव । भविष्याम इति शेषः । इह सुभ्रातृशब्दे 'वन्दिते भ्रातुः' (५-४-१५७) इति कपः प्रतिषेधः ॥ ४५ ॥

**मातुलेत्यादि** । बलवत्प्रत्यमित्रः बलवन्तः प्रत्यमित्राः शत्रवो येषु स तथाभूतः । अनुपजीव्यश्च असस्यप्रसवतयोपजीवितुमयोग्यश्च । कुदेशः कुत्सितो देशः । चिन्त्यतां चिन्तयित्वा कथ्यताम् । पाण्डवाः, तत्र वसेयुः तथाविधं कुदेशं पाण्डवेभ्यो दद्याम् । तावता न काचिदस्माकं हानिः, प्रतिज्ञा च सत्या भविष्यतीत्यभिप्रायः ॥

**शकुनिः**—हन्त भोः!

शून्यमित्यभिधास्यामि कः पार्थाद् बलवत्तरः ।
ऊषरेष्वपि सस्यं स्याद् यत्र राजा युधिष्ठिरः ॥ ४६ ॥

**दुर्योधनः**—अथेदानीं,

गुरुकरतलमध्ये तोयमावर्जितं मे
श्रुतमिह कुलवृद्धैर्यत् प्रमाणं पृथिव्याम् ।
तदिदमपनयो वा वञ्चना वा यथा वा
भवतु नृप! जलं तत् सत्यमिच्छामि कर्तुम् ॥ ४७ ॥

---

**हन्तेति** । हन्तभो इति विषादे । स च वक्ष्यमाणमर्थमनुसन्धाय ।

**शून्यमिति** । शून्यं तुच्छं, त्वदुक्तो विशेषणद्वयविशिष्टो देशः शशशृङ्गादिवदप्रसिद्ध इत्यर्थः । इति, अभिधास्यामि कथयिष्यामि । अप्रसिद्धत्वं विशेषणाप्रसिद्धिद्वारेण साधयति—पार्थाद् अर्जुनात् । बलवत्तरः, कः, न कोऽपि । अतो बलवत्प्रत्यमित्रत्वमप्रसिद्धम् । यत्र येषु । युधिष्ठिरो राजा भवति, तेषु ऊषरेष्वपि क्षारमृत्तिकात्मकेष्वपि देशेषु । सस्यं, स्यात् उत्पद्येत । अतोऽनुपजीव्यत्वमप्यप्रसिद्धम् । कुदेशदानेऽपि पाण्डवानां वृद्धिरेव भविष्यतीति कुदेशोऽपि तेभ्यो न दातव्य इति भावः ॥ ४६ ॥

**अथेदानीमिति** श्लोकान्वयि ।

**गुर्विति** । अथेति उक्तपक्षाक्षेपे । इदानीं, यत्, इह पृथिव्यां लोके । प्रमाणं देयस्य स्वत्वनिवृत्तिपूर्वकपरस्वत्वाभिनिर्वर्तकं दानप्रतिग्रहमुख्यसाधकं । कुलवृद्धैः भीष्मादिभिर्निमित्तभूतैः । श्रुतम् अधीतं, मया कुलवृद्धमुखादवगतमित्यर्थः । तत्, तोयं दानाङ्गं जलं । मे मया । गुरुकरतलमध्ये, आवर्जितम् अर्पितम् । अतो दानप्रतिग्रहौ प्रागेव निष्पन्नाविति भावः । तदिदं दानजलार्पणम् । अपनयो वा अनीतिनिमित्तकं वा । वञ्चना वा वञ्चनामूलकं वा । यथा वा प्रकारान्तरेण वा । भवतु । हे नृप! प्रजापाल! प्रजापालनाधिकृतस्य धर्मतत्त्वं तवापि विदितमेवेति सम्बोधनेन द्योत्यते । तद् जलं । सत्यं तथ्यं । कर्तुम् इच्छामि न तु व्यवस्यामि । इच्छा ममास्ति व्यवसायस्तु भवदनुमत्यधीन इति भावः । अत्र मे इति मयेत्यर्थे निपातः ॥ ४७ ॥

**शकुनिः** — अनृतवचनान्मोचयितव्यो भवान् ननु।

**दुर्योधनः** — अथकिम्।

**शकुनिः** — तेनहीतस्तावत्। (उपसृत्य) भो आचार्य! इहात्रभवान् कुरुराजो भवन्तं विज्ञापयति।

**द्रोणः** — वत्स! गान्धारराज! अभिधीयताम्।

**शकुनिः** — यदि पञ्चरात्रेण पाण्डवानां प्रवृत्तिरुपनेतव्या, राज्यस्यार्धं प्रदास्यति किल। समानयतु भवानिदानीम्।

**द्रोणः** — मा तावद् भोः!

(यैः?ये) कर्तुकामैश्छलनं भवद्भिः संवत्सरैर्द्वादशभिर्न दृष्टाः।
त पञ्चरात्रेण मयोपनेया वरं ह्यदत्तं विशदाक्षरेण ॥ ४८ ॥

---

**अनृते**त्यादि। नन्विति प्रश्ने। राज्यदानातिरिक्तेन केनाप्युपायेनात्मनोऽनृतवचनान्मोचनमनुमन्यसे किमित्यभिप्रायः॥

**अथकिमिति**। अङ्गीकरोमि॥

**तेने**त्यादि। इतस्तावत्, इह मया सहागच्छेत्यर्थः॥

**वत्से**त्यादि। अभिधीयतां त्वयैव। त्वमेव मत्कार्ये प्रभुरिति वत्सलामन्त्रणेन सूच्यते॥

**यदी**त्यादि। पञ्चरात्रेण पञ्चानां रात्रीणां समाहारः पञ्चरात्रं तेन। पाण्डवानाम् अज्ञातवासिनाम्। प्रवृत्तिः वार्ता। उपनेतव्या उपनेतुं शक्या। समानयतु उपनयतु अर्थात् पाण्डवानां प्रवृत्तिम्॥

**मेति**। मा तावत् त्वदुक्तः समयो मास्त्वित्यर्थः। भो इति कोपे।

**य इति**। ये, इदानीमज्ञातवासिन इत्यार्थम्। द्वादशभिः वर्षैः 'अज्ञातवासकाले पाण्डवा दृष्टाश्चेत् पुनरपि द्वादश वर्षाणि वने वसेयुरि'ति पूर्वसमयानुसारेण दर्शने सत्यरण्यवासनेयतया सम्भावितपुनरावर्तनैर्द्वादशसंवत्सरैः करणभूतैरित्यर्थः। छलनं वञ्चनं। कर्तुकामैः कर्तुं कामो येषां तैस्तथाभूतैः। एतेन दर्शनविषयप्रयत्नातिशयवत्त्वं सूचितम्। अथवा द्वादशभिः संवत्सरैश्छलनं कर्तुकामैरित्यस्यायमर्थः— अज्ञातवासकाले दर्शनेन पाण्डवानां पुनर्द्वादशवर्षवनवासक्लेशप्रापणरूपं वञ्चनं कर्तुमभ्युपायम् अतीतवर्षद्वादशकेन मृगयमाणैरिति। भवद्भिः, न दृष्टाः अमुकदेशेऽमुकावस्था वसन्तीति नोपलब्धाः। ते पाण्डवाः। पञ्चरात्रेण, मया उपनेयाः

**भीष्मः**—पौत्र! दुर्योधन! अच्छलो धर्मः। वयमपि तावदस्मिन्नर्थे प्रीताः स्मः। पश्य पौत्र!

वर्षेण वा वर्षशतेन तेषां त्वं पाण्डवानां कुरु संविभागम्।
तस्मात् प्रतिज्ञां कुरु वीर! सत्यां सत्या प्रतिज्ञा हि सदा कुरूणाम्॥

**दुर्योधनः**—एष एव मे निश्चयः।

**द्रोणः**—(आत्मगतम्)

अद्य मे कार्यलोभेन हनूमत्त्वं गता स्पृहा।
लङ्घयित्वार्णवं येन नष्टा सीता निवेदिता॥ ५०॥

---

उपनेतुमानेतुं शक्याः इति काकुः। नोपनेया इत्यर्थः। अशक्यार्थविषयेयं वः समयकल्पनेति भावः। अनया च प्रतिश्रुतार्थस्यादानमेवार्थात् फलितं भवति; ईदृशसमयच्छलेनादानस्य सूचनमपेक्ष्य स्वाक्षरैरेव वचनं ज्याय इत्याह—विशदाक्षरेण स्पष्टवर्णेन वचनेन। अदत्तम् अदानं, भावे क्तः। वरं हि ज्याय एव। वरमिति हीनोत्कर्षेऽव्ययम्। कर्तुकामैरित्यत्र 'तुंकाममनसोरपि' इति तुमुनो मलोपः॥ ४८॥

**पौत्रे**त्यादि। अच्छलः धर्मः छलास्पृष्टत्वमेव धर्मस्य लक्षणम्। अतो गुरुदक्षिणादानरूपे धर्मे छलसम्बन्धं मा कृथा इति भावः। अस्मिन्नर्थे गुरुप्रार्थितेऽर्थे।

**वर्षेणे**त्यादि। वर्षेण अज्ञातवासवर्षे वर्तमानेऽतीते सतीत्यर्थः। वर्षशतेन वा अज्ञातवासानन्तरमपि बहुषु वर्षेष्वतीतेषु सत्सु वा। न तु पञ्चषदिनाभ्यन्तर एवेत्यभिप्रायः। तस्मात् संविभागशीघ्रकरणेऽस्मत्तात्पर्याभावादित्यर्थः। प्रतिज्ञां, सत्यां कुरु फलवतीं कुरु, अशक्यानुष्ठानपञ्चरात्रसमयकल्पनया निष्फलां मा कुर्विति भावः। अत्र 'वीर' इत्यस्य स्थाने 'वत्स' इति पाठान्तरम्॥ ४९॥

**एष** इत्यादि। एष एवेत्येवकारेण शकुन्युपन्यस्तस्य समयबन्धस्याविचाल्यत्वमाह॥

**अद्ये**त्यादि। कार्यलोभेन अतिदूरदेशलङ्घनपूर्वकप्रियजनवार्ताशीघ्रानयनरूपे कार्ये तर्षेण। मे स्पृहा, हनूमत्त्वं गता आञ्जनेयतादात्म्यमहं कामये इत्यर्थः। हनूमत्त्वस्पृहानिमित्तं हनूमद्गतं कार्यसाधनशक्तत्वमुत्तरार्धे निदर्श्यते—येन हनूमता। तद्धितवृत्तौ गुणीभूतस्यापि हनूमत्पदार्थस्य बुद्ध्या प्रविभागाद् येनेति सर्वनाम्ना परामर्शः॥ ५०॥

तत् कुतोनुखलु पाण्डवानां प्रवृत्तिरुपनेतव्या ।

(प्रविश्य)

**भटः** — जयतु महाराजः । विराटनगराद् दूतः प्राप्तः ।

**सर्वे** — शीघ्रं प्रवेश्यताम् ।

**भटः** — यदाज्ञापयथ । (निष्क्रान्तः ।)

(प्रविश्य)

**दूतः** — जयतु महाराजः ।

**सर्वे** — किमागतो विराटेश्वरः ।

**दूतः** — विषादेनावृतो नोपगच्छति ।

**सर्वे** — कस्तस्य विषादः ।

**दूतः** — श्रोतुमर्हति महाराजः । यत् तत्संबन्धि सन्निकृष्टं कीचकानां भ्रातृशतं,

---

**तदित्यादि** । कुतोनुखलु कस्माद् देशात् ॥

इत्थं द्रोणस्य पाण्डवप्रवृत्त्युपलब्धियोग्यदेशाकाङ्क्षायां पाण्डवाध्युष्यमाणं विराटनगरं प्रस्तोतुमुचितमिति तदानुगुण्येन भटप्रवेशः । **प्रविश्येत्यादि** । विराटनगरात् विराटस्य तन्नामकस्य मत्स्यदेशाधिपस्य नगरात् । दूतः सन्देशहरः ॥

**शीघ्रमित्यादि** ॥

**यदित्यादि** ॥

**जयत्वित्यादि** ॥

**किमित्यादि** । विराटशब्दो जनपदेऽपि । तेन तदीश्वरो विराटेश्वरः ॥

**विषादेनेत्यादि** ॥

**क इत्यादि** ॥

**श्रोतुमित्यादि** । यदित्यादि श्लोकान्वयि । यद् यस्मात् कारणात् । **सन्निकृष्टम्** अन्तरङ्गं विराटस्यालत्वात् । तत्सम्बन्धि विराटसम्बन्धि ।

रात्रौ छन्नेन केनापि बाहुभ्यामेव हिंसितम् ।
दृश्यते हि शरीराणामशस्त्रजनितो वधः ॥ ५१ ॥

**सर्वे** — कथमशस्त्रजनितो वध इति ।

**भीष्मः** — कथमशस्त्रेणेति । (अपवार्य) भो आचार्य! अभ्युपगम्यतां पञ्चरात्रम् ।

**द्रोणः** — (अपवार्य) किमर्थम् ।

**भीष्मः** —

भीमसेनस्य लीलैषा सुव्यक्तं बाहुशालिनः ।
योऽस्मिन् भ्रातृशते रोषः स तस्मिन् फलितः शते ॥ ५२ ॥

**द्रोणः** — कथं भवान् जानाति ।

**भीष्मः** —

---

**रात्राविल्यादि** । बाहुभ्यामेव हिंसितमित्यत्रानुमापकमाह — अशस्त्रजनितो वधः हस्तमुष्ट्याद्युत्पादितोऽभिघातः । विराटदूतेन दैवादुपहृतोऽयं कीचकच्छन्नवधवृत्तान्तः पाण्डवच्छन्नवासाद्यभ्यूहस्थानतया भीष्मद्रोणौ प्रति यथा सप्रयोजनः, तथा व्यक्तीभविष्यति ॥ ५१ ॥

**कथमित्यादि** । कथम्, उपपद्यत इति शेषः ॥

**कथमित्यादि** । अशस्त्रेणेति शस्त्रेण कीचकशतहननं केनापि वीरेण कामं कृतं भवेत् । अशस्त्रेण तु तत् कथं सम्भूतमिति चिन्तैषा । अशस्त्रवधस्य प्रच्छन्नकृतस्य महाबलैकसाध्यस्य प्रच्छन्नवासिभीमसेनकृतत्वं तेन विराटपुरे पाण्डवानामुपलब्धुं शक्यत्वं च विवरीष्यमाणं मनसि निधाय पञ्चरात्रसमयस्याङ्गीकार्यतामाह— **भो** इत्यादि । इयमपवार्योक्तिर्दुर्योधनादिभिर्मा श्रावीति ॥

**किमर्थमिति** ॥

**भीमेति** । एषा कीचकशतहिंसनं, विधेयप्राधान्यविवक्षया स्त्रीलिङ्गनिर्देशः । **बाहुशालिनः** महाबलस्य । भीमसेनस्य, लीला क्रीडा । सुव्यक्तं सुष्ठु स्फुटम् । अत्र सन्देहो नास्ति । तत्रोपपत्तिमाह—**अस्मिन्** दुर्योधनादौ । **भ्रातृशते** । **यो रोषः** कोपः भीमसेनस्य । **सः**, **तस्मिन् शते** कीचकशते । **फलितः** फलवान् जातः ॥ ५२ ॥

**कथमित्यादि** । जानाति, अर्थाद् भीमसेनलीलेति । कथमित्यतः प्राग् 'अत्र पाण्डवा इति' इति मातृकान्तरे पाठः । स तु नातीव श्लिष्टार्थः ॥

कथं पण्डित! कूलेषु भ्रान्तानां बालचापलम् ।
नाभिजानन्ति वत्सानां शृङ्गस्थानानि गोवृषाः ॥ ५३ ॥

**द्रोणः**—गोवृषा इति । हन्त सिद्धं कार्यम् । (प्रकाशम्) पुत्र! दुर्योधन! अस्तु पञ्चरात्रम् ।

**दुर्योधनः**—अथकिम् । अस्तु पञ्चरात्रम् ।

**द्रोणः**—भो भो यज्ञमनुभवितुमागता राजानः! शृण्वन्तु शृण्वन्तु भवन्तः । इहात्रभवान् कुरुराजो दुर्योधनः, न, न, न, मातुलसहितः यदि पाण्डवानां प्रवृत्तिरुपनेतव्या, राज्यस्यार्धं प्रदास्यति किल । ननु पुत्र! ।

---

**कथं पण्डितेति** । हे पण्डित! ऊहनिपुण! गोवृषाः गोबलीवर्दाः महोक्षाः । कूलेषु नदीतटेषु । भ्रान्तानां तृणादिखादनार्थं सहचरितानां । वत्सानां बालवृषभानां । बालचापलं बाल्यनिमित्तं चपलकर्म, अथवा बालस्य पुच्छस्य चापलम् उत्क्षेपादिकं चपलकर्म । शृङ्गस्थानानि शृङ्गाणां विषाणानां स्थानानि कूलतिर्यक्प्रहारकौतुकजनितानि पदानि च । चार्थो गम्यः । कथं, नाभिजानन्ति न विदन्ति । नित्यसंस्तुतस्य स्वजनस्य चेष्टितशैली स्वजनेन ज्ञायत एवेति भावः । सम्बोधनेन त्वमप्यभिज्ञातुं निपुण इति द्योत्यते । अत्र गोवृषाणां वत्सचापलादिज्ञानेनाप्रस्तुतेन वर्ण्यमानेन भीष्मगतस्य भीमसेनचेष्टितज्ञानस्य प्रस्तुतस्य द्योतनादप्रस्तुतप्रशंसालङ्कारः ॥ ५३ ॥

**गोवृषा** इत्यादि । गोवृषा इति गोवृषा अभिजानन्तीत्येतद्, युक्तमेवेति शेषः । अतो 'भीमसेनस्य लीलैषे'ति भीष्मोक्तिरुपपद्यत इति भावः । हन्तेति हर्षे । स च पाण्डवाज्ञातवासदेशस्यावगतत्वात् तत्र तत्प्रवृत्त्युपलम्भस्य सुकरतां मत्वा । सिद्धं सिद्धप्रायम् । इत्थं भीष्मेण मिथः सम्मन्त्र्य प्रकाशं पञ्चरात्रमङ्गीकरोति—पुत्रेत्यादि ॥

**अथकिमिति** । दुर्योधनकृतमङ्गीकारं साक्षिमत्त्वेन द्रढयितुं सर्वान् राज्ञः श्रावयति—**भो भो** इत्यादि । किलेति सम्भावनायाम् । दुर्योधन इति केवलोक्त्या तस्य क्रियास्वातन्त्र्यं शकुनिनिरपेक्षमिव भासमानं शकुनिकोपभयात् प्रतिषेद्धव्यं मत्वाह—न न न केवलो दुर्योधनो नैव । किं तर्हि मातुलसहितः मातुलेन शकुनिना सहितः । ननु पुत्र! ननुशब्दोऽनुज्ञायां श्रावणमनुजानीहीत्यर्थः ॥

**दुर्योधनः** — अथकिम् ।

**द्रोणः** — एतद् द्विस्त्रिः सम्प्रधार्यताम् ।

**शकुनिः** — काले ज्ञास्यामि ।

**द्रोणः** — ननु गाङ्गेय ! ।

**भीष्मः** — (आत्मगतम्)

आचार्यस्य यदा हर्षो धैर्यमुत्क्रम्य सूचितः ।
शङ्के दुर्योधनेनैष वञ्च्यमानेन वञ्चितः ॥ ५४ ॥

---

**अथेति** । अथकिं सर्वराजश्रावणमङ्गीकृतमित्यर्थः ॥

**एतदित्यादि** । संप्रधार्यताम् इदानीमेव विमृश्य निर्धार्यताम् । न तावत् पाण्डवप्रवृत्त्युपनयोत्तरकाले विसंवादितव्यमित्यभिप्रायः ॥

**काल इति** । काले पञ्चरात्रावसाने । ज्ञास्यामि पाण्डवप्रवृत्त्युपनयशक्तत्वमवगमिष्यामि । सर्वथा पाण्डवप्रवृत्तिमुपनेतुं नैव शक्ष्यसीत्यभिप्रायः । इदमत्र बोद्धव्यं—भीष्मद्रोणाभ्यां भीमशौर्यबहुमानात् कीचकवधस्य भीमकृतत्वमूहितम् । दुर्योधनेन तु बलैश्वर्यदर्पान्धीकृतचेतसा पाण्डवावहेलिना शकुनिना च तदनुयायिना भीमशौर्ये बहुमानाभावान्न तदूहितमिति । अत्र 'काले' इत्यतः प्राग् 'भवतु भवतु' इति ग्रन्थान्तरे पाठः ॥

**नन्विति** । अनुज्ञाने ननुशब्दः । गाङ्गेय ! गङ्गापुत्र ! । आवाभ्यामभ्युपगतं समयमनुष्ठीयमानमनुजानीहीत्यर्थः ॥

विराटनगरे पाण्डववास ऊहित एव केवलं, न तु निश्चितः । ऊहश्च विसंवदेदपि । उषिता अपि तत्र पूर्वे पाण्डवा इयता कालेनान्यत्र गता भवेयुरपि । तदिदमनालोचयन्नाचार्यः सिद्धमिव स्वार्थे मन्यमानो यदिदानीमतिमात्रं हृष्यति, तन्मन्ये, वञ्चित एव पर्यवसाने भविष्यति, अतिहर्षस्य प्रायेण दुःखपर्यवसायित्वादित्यभिप्रायेण भीष्मो मनसि चिन्तयति—**आचार्यस्येत्यादि** । यदा यस्मात् कारणादित्यर्थः । वञ्च्यमानेन दक्षिणाछद्मना पाण्डवराज्यसंविभागाङ्गीकारसंकटे पात्यमानेन । अथवा यज्ञप्रस्तुतोत्पादनपूर्वं यज्ञदक्षिणाप्रतिग्रहप्रार्थनं कार्यमाणेनेत्यर्थः । वञ्चितः समयच्छलेन विफलमनोरथः कृतः ॥ ५४ ॥

(प्रकाशम्) पौत्र! दुर्योधन! अस्ति मम विराटेनाप्रकाशं वैरम्, अथ भवतो यज्ञमनुभवितुमनागत इति । तस्मात् क्रियतां तस्य गोग्रहणम् ।

**द्रोणः** —(अपवार्य) भो गाङ्गेय! प्रियशिष्यः खलु मे तत्रभवान् विराटेश्वरः । किमर्थं तस्य गोग्रहणम् ।

**भीष्मः** —(अपवार्य) ब्राह्मणार्जवबुद्धे!

धर्षिता रथशब्देन रोषमेष्यन्ति पाण्डवाः ।
अस्ति तेषां कृतज्ञत्वमिष्टं गोग्रहणे स्थितम् ॥ ५५ ॥

(प्रविश्य)

**भटः** —जयतु महाराजः । सज्जाः खलु रथा नगरप्रवेशाभिमुखाय ।

**दुर्योधनः** —

---

सर्वथा पाण्डवप्रवृत्त्युपलम्भार्थं यत्ने कर्तव्ये विराटं प्रति अभियानं तदभ्युपायत्वबुद्ध्या कर्तव्यमिति मन्यमान आह—**पौत्रे**त्यादि । अप्रकाशं गूढं । वैरं विरोधः । तस्मात् पूर्वसिद्धाद् वैराद् यज्ञानागमनापराधाच्च हेतोः । गोग्रहणं गोग्रहणरूपोऽपकारः । विराटो हि गोधनसंपन्नः प्रियगोधनश्चेति गोग्रहणं तस्यापकारो भवति ॥

**भो गाङ्गेये**त्यादि ॥

गोग्रहणमेव भवदिष्टसिद्धेरभ्युपाय इत्याशयवानाह—**ब्राह्मणे**ति । ब्राह्मण! अत एव आर्जवबुद्धे! आर्जवे ऋजुकर्मणि ऋजुत्वे वा बुद्धिर्यस्य तस्य सम्बुद्धिः । कपटानभिज्ञेत्यर्थः । इष्टसिद्ध्युपायाविमर्शिन्निति वा ।

**धर्षिता** इत्यादि । धर्षिताः अभिहतश्रोत्राः । रोषम् एष्यन्ति, रुष्टाश्चात्मानं पराक्रमेण प्रकाशयिष्यन्तीत्यभिप्रायः । विराटेऽपक्रियमाणे किमेषामिति चेत्, तत्राह—तेषां कृतज्ञत्वम् अस्ति । विराटभूम्युपजीवनजनितेन विराटविषयेण कृतज्ञत्वेन तच्छत्रुनिग्रहे यावच्छक्ति ते यतिष्यन्त एवेति भावः । एवञ्च यत् फलितं तदाह—इष्टं पाण्डवोपलम्भनरूपं । गोग्रहणे स्थितम् आयत्तम् । हितमिति पाठे आहितं न्यस्तमित्यर्थः । शब्देनेत्यस्य स्थाने घोषेणेति पाठान्तरम् ॥ ५५ ॥

**प्रविश्ये**त्यादि । नगरप्रवेशाभिमुखाय नगरप्रवेशे अवभृथानन्तरकरणीये हास्तिनपुरप्रवेशे अभिमुखाय । नगरेत्यस्य स्थाने 'वाह्याः' इति ग्रन्थान्तरे पाठः ॥

एभिरेव रथैः शीघ्रं क्रियतां तस्य गोग्रहः ।
गदा यज्ञप्रशान्ता च पुनर्मे करमेष्यति ॥ ५६ ॥

**द्रोणः** —

तस्मान्मे रथमानयन्तु पुरुषाः,

**शकुनिः** —

हस्ती ममानीयतां,

**कर्णः** —

भारार्थं भृशमुद्यतैरिह हयैर्युक्तो रथः स्थाप्यताम् ।

**भीष्मः** —

बुद्धिर्मे त्वरते विराटनगरं गन्तुं धनुस्त्वर्यतां

**सर्वे** —

मुक्त्वा चापमिहैव तिष्ठतु भवानाज्ञाविधेया वयम् ॥ ५७ ॥

**द्रोणः** — पुत्र ! दुर्योधन ! आवां तव युद्धे पराक्रमं द्रष्टुमिच्छावः ।

**दुर्योधनः** — यदभिरुचितं भवते ।

---

**एभिरेवे**त्यादि । एभिरेव अन्यार्थं सज्जीकृतैरेव, न तु विराटाभियानार्थं पार्थक्येन सज्जीकर्तव्यैरित्यर्थः । शीघ्रं क्रियतामिति क्रियाया अभ्युपगमनं त्वरणं च युद्धकामुकत्वप्रयुक्तम् । यज्ञप्रशान्ता यज्ञकाले व्यापाराभावाद् विश्रान्ता । गदा च गदा तु । पुनः पश्चात् प्रस्थानानन्तरकाले ॥ ५६ ॥

**तस्मादि**त्यादि । पुरुषाः कर्मकराः । भारार्थम् भारः युद्धे प्रदर्शनीयं महच्छूरकर्म, तदर्थम् । त्वर्यतां त्वरितमानीयताम् । इहैव हास्तिनपुर एव । तिष्ठतु विराटनगरं प्रति गमनं ते मा भूदित्यर्थः । आज्ञाविधेयाः किङ्कराः । भवतो भारं वोढुमस्मासु सन्नद्धेषु मास्तु ते विराटनगराभियानक्लेश इति तात्पर्यम् ॥ ५७ ॥

**पुत्रे**त्यादि । आवां भीष्मः अहं च । युद्धे गोग्रहणनिमित्ते । तव पराक्रमं शौर्यं । द्रष्टुम् इच्छावः, अत आवामपि त्वामनुगच्छाव इत्यर्थः ॥

**यदि**त्यादि । भवते इत्यत्र 'रुच्यर्थानां प्रीयमाणः' (१–४–३३) इति सम्प्रदानत्वाच्चतुर्थी ॥

**द्रोणः** — वत्स ! गान्धारराज ! अस्मिन् गोग्रहणे तव खलु प्रथमरथः ।

**शकुनिः** — बाढम् । प्रथमः कल्पः ।

(निष्क्रान्ताः सर्वे ।)

**प्रथमोऽङ्कः ।**

---

**वत्सेत्यादि** । तव खलु प्रथमरथः तवैवाग्रिमो रथः तवैवास्मिन् गोग्रहणोद्योगे प्राधान्यमित्यर्थः । एतच्च प्रकृतिजिह्मस्य शकुनेर्विराटाभिषेणनप्रतिबन्धे बुद्धिर्मोत्पद्यतामित्येतदर्थं तत्पुरस्कारवचनम् ॥

**बाढमित्यादि** । प्रथमः मुख्यः ॥

**निष्क्रान्ताः सर्वे** इति प्रथमाङ्कपरिसमाप्तिः ॥

## अथ द्वितीयोऽङ्कः ।

(ततः प्रविशति वृद्धगोपालकः ।)

**वृद्धगोपालकः**—(क) गावो मे अहीणवच्छा होन्तु । अविहवा अ गोवजुवदीओ होन्तु । णो ळाआ विळाडो एक्कच्छत्तप्पुहुवीपदी होदु । महाळाअष्ष विळाडष्ष वष्षवड्ढणगोप्पदाणणिमित्तं इमष्षिं णअळोववणवीहीए आअन्तुं गोधणं षव्वे अ किदमङ्गळामोदा गोवदाळआ दाळिआ अ दाव । एषु ज्जेष्ठं गच्छिअ अणुभविष्षम् । (विलोक्य) किण्णुहु एषो वाअषो षुक्खळुक्खं आळुहिअ षुक्खषाखाणिघट्टिअतुण्डं आदिच्चाहिमुहं विष्षळं विळवदि । षन्ती होदु षन्ती होदु अह्माणं गोधणष्ष अ । जाव एषु

---

(क) गावो मेऽहीनवत्सा भवन्तु । अविधवाश्च गोपयुवतयो भवन्तु । अस्माकं राजा विराट एकच्छत्रपृथिवीपतिर्भवतु । महाराजस्य विराटस्य वर्षवर्धनगोप्रदाननिमित्तमस्यां नगरोपवनवीथ्यामागन्तुं गोधनं सर्वे च कृतमङ्गलामोदा गोपदारका दारिकाश्च तावत् । एषु ज्यैष्ठ्यं गत्वानुभविष्यामि । किंनुखल्वेष वायसः शुष्कवृक्षमारुह्य शुष्कशाखानिघट्टिततुण्डमादित्याभिमुखं

---

### अथ द्वितीयोऽङ्कः ।

अथ विराटनगरे गोग्रहणं, तद्वशाद् विराटसूनोरुत्तरस्य बृहन्नलासारथेः कौरवाणां च युद्धारम्भाः, कर्णादीनां पराजयः, विराटसूदेन भीमसेनेनाभिमन्योः कौरवानुयायिनो ग्रहणं, विराटाय ब्राह्मणवेषयुधिष्ठिरसहितायोत्तरेण बृहन्नलाया जयतत्त्वनिवेदनम्, अर्जुनेन युधिष्ठिरभीमसेनयोस्तत्त्वाख्यानं, ततोऽर्जुनेन परितुष्टविराटदत्ताया उत्तरायाः स्वपुत्रार्थे प्रतिग्रहणं च द्वितीयाङ्के वस्तु । तत्र गोग्रहणविषयकौरवसंरम्भसूचनार्थमादौ प्रवेशकं रचयितुमौचित्याद् वृद्धगोपालकं प्रवेशयति—**ततः प्रविशतीत्यादि** ॥

**गावो** इत्यादि । अहीनवत्साः अहीना स्वस्तिमन्तः वत्सा यासां तास्तथाभूताः, अनपेतवत्सा वा । अविधवाः भर्तृमत्यः । एकच्छत्रपृथिवीपतिः एकं छत्रम् आधिपत्यचिह्नभूतं श्वेतातपत्रं यस्याः सा एकच्छत्रा एकस्वामिकेत्यर्थः । एकच्छत्रायाः पृथिव्याः पतिः सार्वभौम इति यावत् । वर्षवर्धनगोप्रदाननिमित्तं वर्षवर्धने वा-

जेष्ठं गच्छिअ गोवदाळआणं दाळिआणं वाहळामि । (परिक्रम्य) अळे गोमित्तअ ! गोमित्तअ ! ।

(प्रविश्य)

**गोमित्रकः**—(क) मादुळ ! वन्दामि ।

**वृद्धगोपालकः**—(ख) षन्ती होदु षन्ती होदु अह्माअं गोधणष्ष अ । अळे गोमित्तअ! महाळाजष्ष विळाडश्श वष्षवड्ढणगोप्पदाणणिमित्तं इमष्षिं णअळोववणवीहीए आअन्तुं गोधणं षव्वे च किदमङ्गळामो-

---

विस्वरं विलपति । शान्तिर्भवतु शान्तिर्भवतु अस्माकं गोधनस्य च । यावदेषु ज्यैष्ठ्यं गत्वा गोपदारकाणां दारिकाणां व्याहरामि । अरे गोमित्रक ! गोमित्रक ! ।

(क) मातुल ! वन्दे ।

(ख) शान्तिर्भवतु शान्तिर्भवतु अस्माकं गोधनस्य च । अरे गोमित्रक ! महाराजस्य विराटस्य वर्षवर्धनगोप्रदाननिमित्तमस्यां नगरोपवनवीथ्या-

---

र्षिकजन्मनक्षत्रमङ्गले यद् गोप्रदानं तद् निमित्तं प्रयोजकं यस्मिन् कर्मणि तद् यथा भवति तथा । आगमनक्रियाविशेषणमिदम् । आगन्तुं सज्जीकृतमिति शेषः । कृतमङ्गलामोदाः कृतं मङ्गलं नववस्त्राभरणधारणलक्षणम् आमोदः स्रक्चन्दनादिः प्रीतिर्वा यैस्ते तथाभूताः । दारिकाः गोपबालिकाः । एषु गोपदारिकादारकेषु मध्ये । ज्यैष्ठ्यं नायकत्वं प्राधान्यम् । 'दाव एषु जेष्ठं' इत्यस्य स्थाने 'जाव हेष्ठं तेषुं' इति ग्रन्थान्तरे पाठः । एवं चिन्तयन्नेवाग्रतो दुर्निमित्तमुपलभ्याह—किण्णुहु इत्यादि । वायसः काकः । शुष्कशाखानिघट्टिततुण्डं शुष्कायां शाखायां निघट्टितं नितरां घट्टनं प्राप्तं तुण्डं मुखं यस्मिन् कर्मणि तद् यथा भवति तथा । विस्वरं विकृतस्वरं विलपति शब्दायते । अस्य दुर्निमित्तस्य गोपगोधनानर्थसूचकतां मत्वा तच्छान्तिमाशास्ते—षन्ती इत्यादि । यावदित्यादि । यावद् व्याहरामि व्याहरिष्यामि शब्दापयिष्यामि । 'यावत्पुरानिपातयोः'—(३-३-४) इति भविष्यति लट् । गोपदारकाणामिति षष्ठी कर्मणः शेषत्वविवक्षया ॥

**मादुळेत्यादि** ॥

पुनःशान्त्याशंसनपूर्वं कर्तव्यमादिशति—**षन्तीत्यादि** ॥

दआ गोवदाळआ दाळिआ अ। अळे गोमित्तअ! गोवदाळआणं दाळिआणं वाहळ।

**गोमित्रकः**—(क) जं मादुळो आणवेदि। गोळक्खिणिए! घिदपिण्ड! षामिणि! वषभदत्त! कुम्भदत्त! महिषदत्त! आअच्छह आअच्छह सिग्घं।

(ततः प्रविशन्ति सर्वे।)

**सर्वे**—(ख) मादुळ! वन्दामो।

**वृद्धगोपालकः**—(ग) षन्ती होदु षन्ती होदु अह्माणं गोधणष्ष अ गोवदाळआणं दाळिआणं (अ)। महाळाअष्ष विळाडष्ष वष्षवड्ढण-गोप्पदाणणिमित्तं इमष्षिं णअळोववणवीहीए आअन्तुं गोधणं। तत्तअं वेळं गाअन्तो णच्चन्तो होम।

**सर्वे**—(घ) जं मादुळो आणवेदि। (सर्वे नृत्यन्ति।)

---

मागन्तुं गोधनं सर्वे च कृतमङ्गलामोदा गोपदारका दारिकाश्च। अरे गोमित्रक! गोपदारकाणां दारिकाणां व्याहर।

(क) यन्मातुल आज्ञापयति। गोरक्षिणिके! घृतपिण्ड! स्वामिनि! वृषभदत्त! कुम्भदत्त! महिषदत्त! आगच्छतागच्छत शीघ्रम्।

(ख) मातुल! वन्दामहे।

(ग) शान्तिर्भवतु शान्तिर्भवतु अस्माकं गोधनस्य च गोपदारकाणां दारिकाणां च। महाराजस्य विराटस्य वर्षवर्धनगोप्रदाननिमित्तमस्यां नगरोपवनवीथ्यामागन्तुं गोधनम्। तावतीं वेलां गायन्तो नृत्यन्तो भवामः।

(घ) यन्मातुल आज्ञापयति।

---

**जमित्यादि**॥

**मादुळेत्यादि**॥

**षन्तीत्यादि**। आगन्तुं सज्जीकृतमिति शेषः। तावतीं वेलां यावद् गोधनमिहागच्छति तावन्तं कालम्। अत्यन्तसंयोगे द्वितीया॥

**जमित्यादि**॥

**वृद्धगोपालकः** --(क) हीही सुट्ठु णच्चिदम्, सुट्ठु गाइदं । जाव अहं पि णच्चेमि । (नृत्यति ।)

**सर्वे** ---(ख) हाहा मादुळ ! अदिमहन्तं ळेणुं उप्पदिदो ।

**वृद्धगोपालकः** ---(ग) ण हु ळेणुं एव्व, षंक्खुदुन्दुभिघोषं उप्पदिदो ।

**सर्वे** ---(घ) हाहा मादुळ ! दिवाचन्दप्पभापण्डुळजोवगुण्ठिदमण्डळुं षुय्यो अत्थि अ णत्थि अ ।

**गोमित्रकः** ---(ङ) हाहा मादुळ ! एदे के वि मणुष्षा दहिपिण्डपण्डरेहि छत्तेहि घोडअषअडिअं आळुहिअ षव्वं घोषुं विद्दवन्ति चोळा ।

---

(क) हीही सुष्ठु नर्तितं, सुष्ठु गीतम् । यावदहमपि नृत्यामि ।

(ख) हाहा मातुल ! अतिमहान् रेणुरुत्पतितः ।

(ग) न खलु रेणुरेव, शङ्खदुन्दुभिघोष उत्पतितः ।

(घ) हाहा मातुल ! दिवाचन्द्रप्रभापाण्डुरजोवगुण्ठितमण्डलः सूर्योऽस्ति च नास्ति च ।

(ङ) हाहा मातुल ! एते केऽपि मनुष्या दधिपिण्डपाण्डरैश्छत्रैर्घोटकशकटिकामारुह्य सर्वं घोषं विद्रवन्ति चोराः ।

---

हीहीत्यादि । हीशब्दो विस्मये । स च सुष्ठुगाननर्तनजः ॥

अथ विराटनगरं प्रयातानां कौरवाणां गोपालाभिमुखमर पानमन्यच्च चेष्टितं दर्शनक्रमेण वक्तुमुपक्रमः । तत्र सैन्यरजस्समुद्गमं प्रथमं पुरःपर्श्ववतामुक्तिः---हाहेत्यादि । हाहेति कष्टे ॥

णहु इत्यादि । न खलु रेणुरेव रजः केवलं नोत्पतितमित्यर्थः ॥

हाहामादुळेत्यादि । दिवाचन्द्रप्रभापाण्डुरजोवगुण्ठितमण्डलः दिवाचन्द्रस्य प्रभेव पाण्डु धवलं यद् रजः धूलिः तेन अवगुण्ठित आच्छन्नः मण्डलो यस्य स तथाभूतः । इह 'पण्डुळजोह्लावगुण्ठिदो षुदमण्डळुं' इति ग्रन्थान्तरे पाठो न हृद्यः । सूर्यः अस्ति च नास्ति च विरलरजसि क्वचिदाकाशस्य देशे लक्ष्यो भवति, सान्द्ररजसि क्वचिदलक्ष्यो भवतीत्यर्थः ॥

हाहेत्यादि । दधिपिण्डपाण्डुरैः दधिघनधवलैः । घोटकशकटिकाम् अश्वशकटम् । घोषं गोपालपल्लीम् ॥

**वृद्धगोपालकः** —(क) हीही षरसंपादा उट्ठिदा । दारआ! दालिआ! षिग्घं पक्कणं पविषह ।

**सर्वे** —(ख) जं मादुळो आणवेदि । (निष्क्रान्ताः।)

**वृद्धगोपालकः** —(ग) हाहा चिट्ठह चिट्ठह । पहरह पहरह । गह्णह गह्णह । इमं वुत्तन्तं महाळाअविळाडश्श णिवेदइष्षामो ।

(निष्क्रान्तः ।)

**प्रवेशकः ।**

---

( ततः प्रविशति भटः । )

**भटः** —भो भो निवेद्यतां निवेद्यतां महाराजाय विराटेश्वराय —एता हि दस्युकर्मप्रच्छन्नविक्रमैर्धार्तराष्ट्रैर्ह्रियन्ते गाव इति । तत्र हि,

---

(क) हीही शरसंपाता उत्थिताः । दारकाः ! दारिकाः ! शीघ्रं पक्कणं प्रविशत ।

(ख) यन्मातुल आज्ञापयति ।

(ग) हाहा तिष्ठत तिष्ठत । प्रहरत प्रहरत । गृह्णीत गृह्णीत । इमं वृत्तान्तं महाराज[illegible]ाय निवेदयिष्यामः ।

---

**हीहीत्य**[illegible]ब्दो विषादे । उत्थिताः अर्थाच्चौरेभ्यः । पक्कणम् आलयम् । यद्यपि पक्कणः श[illegible]लयः, तथापि शबरसम्बन्धस्यात्राविवक्षा । अवरजातिगृहत्वसाम्याद् गोपालगृहे [illegible]बरगृहत्वारोपो वा ॥

**जमित्यादि** ॥

**हाहेत्यादि** । इह गोधनं प्रहरणग्रहणक्रिययोः कर्म गम्यम् ॥

**प्रवेशक** इति । नीचपात्रप्रयोजितत्वात् ॥

अथ वृद्धगोपालमुखाद् विदितवृत्तान्तस्य भटस्य प्रवेशः—**तत** इत्यादि । **दस्युकर्मप्रच्छन्नविक्रमैः** दस्युकर्म चोरकर्म गोहरणं विराटाविदितमारभ्यमाणं, तेन **प्रच्छन्नविक्रमैः** । विवृतविक्रमत्वे विराटराजसमक्षं तदारब्धुमुचितमित्यर्थः । **धार्तराष्ट्रैः** धृतराष्ट्रपुत्रैः दुर्योधनादिभिः ।

द्रुतैश्च वत्सैर्व्यथितैश्च गोगणैर्निरीक्षणत्रस्तमुखैश्च गोवृषैः ।
कृतार्तनादाकुलितं समन्ततो गवां कुलं शोच्यमिहाकुलाकुलम् ॥ १ ॥

इति ।

(नेपथ्ये)

किं धार्तराष्ट्रैरिति ।

**भटः** — आर्य ! अथकिम् ।

(प्रविश्य)

**काञ्चुकीयः** — सदृशमेतद् भ्रातृजनेष्वपि द्रोहिणाम् । एते हि,

सज्जैश्चापैर्बद्धगोधाङ्गुलित्रा वर्मच्छन्नाः कल्पितस्यन्दनस्थाः ।
वीर्योत्सिक्ता युद्धसज्जाः कृतास्त्रा राज्ञो वैरं गोषु निर्यातयन्ति ॥ २ ॥

जयसेन ! जन्मनक्षत्रक्रियाव्यापृतस्य महाराजस्य तावदकालनिवेदनं मन्युमुत्पादयति । तस्मात् पुण्याहावसाने निवेदयिष्ये ।

---

द्रुतैरित्यादि । गवां कुलं गोत्वजातिविशिष्टानां पशूनां वृन्दं वत्सधेनुवृषभसमवायात्मकम् । आकुलाकुलम् अत्यन्तोद्विग्नम् ॥ १ ॥

**नेपथ्य** इति । नेपथ्यगतस्य रङ्गमप्रविष्टस्योक्तिरित्यर्थः ।

**किमित्यादि** । अत्र उच्यत इति शेषः ॥

**आर्येत्यादि** । अत्र 'अथकिं धार्तराष्ट्रैः' इति ग्रन्थान्तरे पाठः ॥

**काञ्चुकीय** इत्यादि । काञ्चुकीयः कञ्चुकी, येन नेपथ्ये व्याहृतं सोऽयम् । कञ्चुकशब्दान्निर्वृत्तार्थे छणि काञ्चुकीयशब्दः । एतद् गवां हरणं । भ्रातृजनेष्वपि अपिशब्दो द्रोहायोग्यत्वद्योतकः ।

**सज्जैरित्यादि** । सज्जैः आरोपितज्यैः । उपलक्षणे तृतीया । बद्धगोधाङ्गुलित्राः गोधा ज्याघातवारणं अङ्गुलित्रम् अङ्गुलित्राणं च बद्धं यैस्ते तथाभूताः । 'गोधा तला च न नरौ हस्तघ्नो ज्यानिवारणे' इति यादवः । कल्पितस्यन्दनस्थाः कल्पितेषु उपकरणवत्तया सज्जितेषु रथेषु तिष्ठन्तीति तथाभूताः । राज्ञः विराटस्य । निर्यातयन्ति प्रतिकुर्वन्ति । एतेन निर्लज्जत्वं धार्तराष्ट्राणामुक्तम् ॥ २ ॥

**जयसेनेत्यादि** । मन्युं कोपं । पुण्याहावसाने पुण्यमहः पुण्याहं पुण्यदिनकार्यं स्वस्तिवाचनाख्यं माङ्गलिककर्म तस्यावसाने समाप्तौ ॥

**भटः** —आर्य अतिपाति कार्यमिदं, शीघ्रं निवेद्यताम् ।

**काञ्चुकीयः** —इदं निवेद्यते ।

(ततः प्रविशति राजा ।)

**राजा**—

मा तावद् व्यथितविकीर्णबालवत्सा गावो मे रथरवशङ्कया ह्रियन्ते ।
पीनांसश्चलवलयः सचन्दनार्द्रो निर्लज्जो मम च करः कराणि भुङ्क्ते ॥

जयसेन ! जयसेन !

(प्रविश्य)

**भटः** —जयतु जयतु महाराजः ।

**राजा** —अलं महाराजशब्देन । अवधूतं मे क्षत्रियत्वम् । उच्यतां रणविस्तरः ।

**भटः** —महाराज ! न विस्तरार्हाणि विप्रियाणि । एष समासः,

---

**आर्येत्यादि** । अतिपाति विलम्बासहम् ॥

**इदमित्यादि** ॥

**तत इत्यादि** ।

**मेति** । मातावदिति गर्हायाम् । सा च वक्ष्यमाणस्वीयनिर्लज्जव्यापारविषया । रथरवशङ्कया रथध्वनिभिया । व्यथितविकीर्णबालवत्साः व्यथिता उद्विग्नाः विकीर्णाः तत इतो विक्षिप्ताः बालवत्साः, अथवा विकीर्णबालाः विक्षिप्तपुच्छाः वत्साः यासां तास्तथाभूताः । मे गावः ह्रियन्ते अर्थाद् दस्युभिः । पीनांसः मांसलस्कन्धः । चलवलयः चञ्चलकटकः । सचन्दनार्द्रः सचन्दनः अत एवार्द्रः । मम करश्च पाणिस्तु । निर्लज्जः सन्, कराणि अन्नविशेषान् । "भिस्सा स्त्री दीदिविर्ने षण् । पुन्नपुंसकयोश्चोरं करमाहार्यमित्यपि ।" इति वैजयन्ती । भुङ्क्ते । तदिदं गर्हितं कर्मेति मातावदिति निषेधेन द्योत्यते ॥ ३ ॥

**जयत्वित्यादि** ॥

**अलमित्यादि** । अवधूतं निरस्तम् ॥

**महाराजेत्यादि** । न विस्तरार्हाणि न प्रपञ्चनीयानि । **एषः** वक्ष्यमाणः । **समासः** निवेद्यवस्तुसंक्षेपः ।

एकवर्णेषु गात्रेषु गवां स्यन्दनरेणुना ।
कशापातेषु दृश्यन्ते नानावर्णविभक्तयः ॥ ४ ॥

**राजा**—तेन हि,

धनुरुपनय शीघ्रं कल्प्यतां स्यन्दनो मे
मम गतिमनुयातुच्छन्दतो यस्य भक्तिः ।
रणशिरसि गवार्थे नास्ति मोघः प्रयत्नो
निधनमपि यशः स्यान्मोक्षयित्वा तु धर्मः ॥ ५ ॥

**भटः**—यदाज्ञापयति महाराजः । (निष्क्रान्तः ।)

**राजा**—भोः ! किन्नुखलु दुर्योधनस्य मामन्तरेण वैरम् । आ यज्ञमनुभवितुमनागत इति । कथमनुभवामि । कीचकानां विनाशेन वयमुन्नीतसन्तापाः संवृत्ताः । अथवा परोक्षमपि पाण्डवानां स्निग्ध इति । सर्वथा योद्धव्यम् । हास्तिनपुरनिवासाच्छीलज्ञो भगवान् दुर्योधनस्य । अथवा,

---

**एकेति** । गवां गात्रेषु अङ्गेषु । स्यन्दनरेणुना रथरजसा हेतुना । एकवर्णेषु रजोरूपणेन सहजशुक्लत्वादितत्तद्वर्णानिह्नवात् कपिशस्वरूपमेकमेव रजोवर्णमविशेषात् प्राप्तेषु । गवां, गात्रेषु अङ्गेषु । कशापातेषु प्रतोदाभिघातस्थानेषु । नानावर्णविभक्तयः नानावर्णानां स्वतस्सिद्धानां शुक्लनीलादिवर्णानां विभक्तयः विभागरेखाः। दृश्यन्ते । एतेन रथिनां बाहुल्यं गोविषयः कशाभिघातद्रोहश्च प्रकाशितः ॥ ४ ॥

**तेन हि धनुरित्यादि** । कल्प्यतां सज्जीक्रियताम् । अनुयातु अनुगच्छतु । स इति कर्तुराक्षेपः, यस्य भक्तिरिति यत्पदनिर्देशात् । रणशिरसि युद्धान्ते । मोघो नास्ति व्यर्थो न भवति । प्रयोजनमाह—निधनं मरणमपि । यशः कीर्त्तिकरं स्यात् । मोक्षयित्वा तु गाः शत्रुहस्तान्मोचयित्वा पुनः । धर्मः गोरक्षणरूपः, लभ्यत इति शेषः ॥ ५ ॥

**यदित्यादि** ॥

**भो इत्यादि** । माम् अन्तरेण माम् उद्दिश्य । आ इति वैरकारणस्य स्मरणं द्योतयति । उन्नीतसन्तापाः उन्नीत उपचितः सन्तापो येषां ते तथाभूताः संवृत्ताः । 'उपनीतसन्तापा' इति ग्रन्थान्तरे पाठः । वैरस्य कारणान्तरमप्यूहते—**अथवेत्यादि** । पाण्डवानां, परोक्षम् अप्रत्यक्षं । स्निग्धोऽपीति, प्रत्यक्षं भार्तराष्ट्रेष्वपि-

कामं दुर्योधनस्यैष न दोषमभिधास्यति ।
अर्थित्वादपरिश्रान्तः पृच्छत्येव हि कार्यवान् ॥ ६ ॥

कोऽत्र ।

(प्रविश्य)

**भटः**—जयतु महाराजः ।

**राजा**—भगवांस्तावदाहूयताम् ।

**भटः**—यदाज्ञापयति महाराजः । (निष्क्रान्तः । )

(ततः प्रविशति भगवान् । )

**भगवान्**—(सर्वतो विलोक्य) भोः! किन्नुखल्विदम् ।

गजेन्द्राः कल्प्यन्ते तुरगपतयो वर्मरचिता
रथाः सानूकर्षाः कृतपरिकरा योधपुरुषाः ।

---

रुद्धं व्यवहरन्नपि प्रच्छन्नं पाण्डवेषु स्निग्धं व्यवहरामीत्येतदपि वैरस्य कारणं स्यादित्यर्थः । भगवान् कपटमस्करिवेषेण विराटपार्श्वे वसन् धर्मपुत्रः । हास्तिनपुरनिवासाद् भूतपूर्वात् । स च भगवन्मुखादेव विराटेन विदितचर इत्यूह्यम् । शीलज्ञः वृत्तज्ञः बलाबलज्ञ इत्यर्थः । अतस्तं पृष्ट्वा प्रत्यभियोज्यस्य शीलं ज्ञास्यामीत्यभिप्रायः ।

पृष्टो भगवान् कल्याणबुद्धित्वात् परस्य दोषं न कथयिष्यतीति शङ्कते—**अथवा काममित्यादि** । कामं यद्यपि । दोषं रन्ध्रं पराजयस्थानम् । कार्यवता मया सोऽकथयन्नपि भूयो भूयः प्रष्टव्य एवेत्यभिप्रायं सामान्यन्यायेन सूचयति—कार्यवान् साध्यवान् जनः । अर्थित्वात् कार्यसिद्ध्युपायप्रेप्सुत्वाद्धेतोः । अपरिश्रान्तः इष्टोत्तरागमनं यावदखिन्नः सन् । पृच्छत्येव, न तु प्रश्नवैफल्यभिया तूष्णीमास्ते इत्यर्थः । हिः प्रसिद्धौ, ईदृशो हि लोकसमुदाचार इत्यर्थः । अप्रस्तुतप्रशंसालङ्कारः ॥ ६ ॥

**जयत्वित्यादि** ॥

**भगवानित्यादि** ॥

**यदित्यादि** ॥

**तत इत्यादि** । भो इति विषादे । इदं वक्ष्यमाणम् ।

**गजेन्द्रा इति** । गजेन्द्राः गजश्रेष्ठाः । कल्प्यन्ते सज्जीक्रियन्ते, युद्धार्हवेषसम्पादनमिह कल्पना । तुरगपतयः अश्वश्रेष्ठाः सादिनो वा । **वर्मरचिताः**

समुद्योगं दृष्ट्वा भयमननुभूतं स्पृशति मां
न खल्वात्मन्यस्तं कृतमतिरहं ते तु चपलाः ॥ ७ ॥

(उपगम्य) जयतु भवान् जयतु ।

**राजा** — विराटो भगवन्! अभिवादये ।

**भगवान्** — स्वस्ति ।

**राजा** — अनुगृहीतोऽस्मि । भगवन्! एतदासनम् । आस्यताम् ।

**भगवान्** — बाढम् । (उपविश्य) भो राजन्!

उद्योगः प्रस्तुतः कस्माच्छ्रीर्न सन्तोषमिच्छति ।
पीडयिष्यति सोत्सेकान् पीडितान् मोक्षयिष्यति ॥ ८ ॥

---

कवचिताः । भवन्तीति शेषः । रथाः, सानूकर्षाः अनूकर्षोऽनुकर्षाख्यं रथस्याधोधरणदारु, 'उपसर्गस्य—'(६-३-१२२) इति दीर्घः । तेन सहिताः । योधपुरुषाः युद्धभटाः । कृतपरिकराः कृतसन्नाहाः । समुद्योगम् उक्तं युद्धोद्यमं । दृष्ट्वा, अननुभूतं, भयं, मां स्पृशति युद्धकालावश्यकरणीये विराटसाहाय्येऽस्माभिः क्रियमाणे अज्ञातवासविपरीतमस्माकमात्मप्रकाशनं कथमपि स्यादित्येवंरूपं भयं मे जायत इति भावः । तर्हि साहाय्यकरणदशायामपि धैर्यमवलम्ब्यात्मा निह्नूयतामिति चेत्, तदेतन्मम सुकरं न तु मद्भ्रातृणामित्यभिप्रायेणाह — आत्मन्यस्तम् आत्मगतम् आत्मविषयकम् । अर्थाद् भयं, न खलु नैव विद्यते अहमात्मानं यत्नान्निह्नुवीयैवेत्यर्थः । कुतस्तत्राह—अहं कृतमतिः निश्चितबुद्धिः धीर इत्यर्थः । तु किन्तु, ते वक्तृवाच्यादिवैशिष्ट्याद् भीमादयो मद्भ्रातर इत्यर्थः । चपला अधीराः । अतस्ते युद्धकण्डूलत्वात् कदाचिदतिपराक्रमप्रदर्शनेन स्वात्मानं प्रकाशयेयुरिति तन्निमित्तं मे भयमस्तीति भावः । एवं वदता युधिष्ठिरेणाज्ञातवासवर्षपूर्तिर्जातापि प्रमादान्न स्मृतेदानीमिति बोद्धव्यम् । भीष्मसम्प्राप्तिप्रयोजनपर्यालोचनवशात्तु सा पश्चात् स्मरिष्यते 'किमर्थं खलु सम्प्राप्तः' (श्लो० १२) इत्यादि वदता ॥ ७ ॥

**विराट** इत्यादि ॥

**स्वस्तीति** मङ्गलाशंसनम् ॥

**अन्वित्यादि** ॥

**बाढमित्यादि** । बाढमित्यङ्गीकारे ।

**उद्योग इति** । कस्मात् केन हेतुना । उद्योगः, प्रस्तुतः प्रक्रान्तः । तत्र

**राजा** — भगवन्! गोग्रहणादवमानितोऽस्मि ।

**भगवान्** — केन कारणेन ।

**राजा** — धार्तराष्ट्रैः ।

**भगवान्** — धार्तराष्ट्रैरिति । (आत्मगतम्) भोः! कष्टम्,

एकोदकत्वं खलु नाम लोके मनस्विनां कम्पयते मनांसि ।
वैरप्रियैस्तैर्हि कृतेऽपराधे यत्सत्यमस्माभिरिवापराद्धम् ॥ ९ ॥

**राजा** — भगवन्! किमिदानीं विचार्यते ।

---

त्रीन् सम्भाव्यमानान् हेतूनुल्लिख्य पृच्छति—श्रीः राज्यलक्ष्मीः । सन्तोषं तृप्तिं । नेच्छति । भूयो वृद्धिमिच्छन्ती नवनवराज्यसाधनाय त्वां प्रोत्साहयति किमित्यर्थः । 'नहि नहि महिमानं प्राप्य तृप्यन्ति भूपाः' इति हि न्याय इति भावः । सोत्सेकान् गर्वितान् । पीडयिष्यति दमयिष्यति किम् । पीडितान् शत्रुणा केनापि अवरुद्धान् । मोक्षयिष्यति किम् । अत्र सर्वत्र प्रश्नकाकुः ॥ ८ ॥

**भगवन्नित्यादि** ॥

**केनेति** । केन कारणेन निमित्तेन कर्त्रेत्यर्थः । मातृकान्तरे तु 'कारणेन' इति न पठ्यते ॥

**धार्तराष्ट्रैरिति** । दुर्योधनादिभिः ॥

ज्ञातिकृतस्य गोग्रहणापराधस्य श्रवणेन लज्जित आत्मनि चिन्तयति— **आत्मगतमित्यादि** ।

**एकोदकत्वमिति** । लोके, एकोदकत्वं ज्ञातित्वं खलु, अर्थाद् अनार्यजनगतं तथाविधस्यैव कम्पनकर्तृत्वौचित्यात् । मनस्विनां सुशिक्षितहृदयानाम् आर्याणां तज्ज्ञातीनामित्यर्थः । मनांसि, कम्पयते उद्वेजयति दुनोति वा । अस्य सामान्यन्यायस्य समर्थकं प्रकृतमर्थमाह—हि यतः । वैरप्रियैः, तैः अस्मद्ज्ञातिभिर्धार्तराष्ट्रैः । अपराधे निर्दोषविराटगोधनापहाररूपे । कृते सति । अस्माभिः, अपराद्धमिव अपराधः कृत इत्यध्यवस्यामि । इवशब्द इहाध्यवसायार्थः । यत्सत्यमिति वाक्यसत्यत्वावधारणे, तदिदमात्मन्यपराधित्वाध्यवसानवचनं सत्यमेवेत्यर्थः ॥ ९ ॥

**भगवन्नित्यादि** । किं विचार्यते चिन्त्यते भवता, न तु प्रकृतानुगुणं किञ्चिदुच्यत इत्यर्थः ॥

**भगवान्**—न खलु किञ्चित् । तेषामुत्सुकः ।

**राजा**—अद्यप्रभृति निभृता भविष्यन्ति । यदि शक्तोऽपि युधिष्ठिरो मर्षयति, अहं न मर्षयामि ।

**भगवान्**—एवमेतत् । (आत्मगतम्)

अद्येदानीं पर्णशय्या च भूमौ राज्यभ्रंशो द्रौपदीधर्षणं वा ।
वेषान्यत्वं संश्रितानां निवासः सर्वं श्लाघ्यं यत् क्षमा ज्ञायते मे ॥ १० ॥

(प्रविश्य)

**भटः**—जयतु महाराजः ।

**राजा**—अथ किं चेष्टते दुर्योधनः ।

**भटः**—न खलु दुर्योधन एव, पृथिव्यां राजानः सर्वे प्राप्ताः ।

---

**नेति** । न खलु किञ्चिद् अप्रकृतं न किञ्चिच्चिन्त्यते, किन्तु प्रकृतमेवेत्यर्थः । किं प्रकृतं, तदाह—तेषाम् उत्सुकः तेषु विषये दुःखितोऽहम् । दुश्चेष्टमानेषु धार्तराष्ट्रेषु कारुण्याद् विषीदामीत्यर्थः ॥

**अद्येत्यादि** । निभृताः निश्चेष्टाः शान्तावलेपा इत्यर्थः । सद्य एव तान् दमयिष्यामीति भावः । मर्षयति यदि तितिक्षते चेत्, तान् सापराधानित्यार्थम् ॥

**एवमेतदिति** ।

**अद्येदानीमित्यादि** । अत्र प्रथमपादो नवमवर्णविकल एव मातृकायां क्वचिद् दृश्यते । तत्र नवमवर्णं विशब्दं प्रक्षेप्तुमुचितं मन्यामहे । विभूमौ विरुद्धायां शयनानर्हायां वनभूमावित्यर्थः । मातृकान्तरे तु नवमवर्णः चशब्द एव पठ्यते । द्रौपदीधर्षणं द्रौपद्यवमाननं । वेषान्यत्वं रूपभेदं मस्करिसूदषण्डमन्दुरापतिगवाधिकृतसैरन्ध्रीलक्षणम् । सर्वम् उक्तम् अनुक्तं चास्माभिरनुभूतमखिलं क्लेशजातमित्यर्थः । श्लाघ्यमित्यत्र अद्येदानीमिति सम्बध्यते, अद्यैव इदानीमेव 'शक्तोऽपि युधिष्ठिरो मर्षयती'ति विराटवाक्यश्रवणसमय एव न तु प्रागित्यर्थः । श्लाघ्यं श्लाघार्हं । जातमिति शेषः । तत्र कारणमाह—यत् यस्मात् कारणात् । मे क्षमा, ज्ञायते, अर्थात् विराटप्रभृतिना साधुलोकेन ॥ १० ॥

**जयत्वित्यादि** ॥

**अथेत्यादि** ॥

**न खल्वित्यादि** ।

द्रोणश्च भीष्मश्च जयद्रथश्च शल्योऽङ्गराजः शकुनिः कृपश्च ।
तेषां रथोत्कम्पचलत्पताकैर्भग्ना ध्वजैरेव वयं न बाणैः ॥ ११ ॥

**राजा** —(उत्थाय कृताञ्जलिः) कथं तत्रभवान् गाङ्गेयोऽपि प्राप्तः ।

**भगवान्** —(आत्मगतम्) साधु धर्षितेनापि नातिक्रान्तः समुदाचारः । भोः !

किमर्थं खलु सम्प्राप्तः कुरूणां गुरुरुत्तमः ।
शङ्के तीर्णा प्रतिज्ञेति स्मारणं क्रियते मम ॥ १२ ॥

**राजा** —कोऽत्र ।

(प्रविश्य)

**भटः** —जयतु महाराजः ।

---

प्राप्तानाह—**द्रोणश्चे**त्यादि । रथोत्कम्पचलत्पताकैः रथानामुत्कम्पेन उच्चलनेन चलन्त्यः पताकाः केतुपटाः येषां तैस्तथाभूतैः । ध्वजैरेव, भग्नाः, ध्वजदर्शनमात्रमपि तावदस्माकं परिभवावहमित्यर्थः । बाणैः न भग्नाः बाणपातनं तु अद्यापि तैर्नारब्धमिति भावः ॥ ११ ॥

**उत्थाये**त्यादि । अमर्षकालेऽपि पूज्यपूजाया अव्यतिक्रमोऽनेन सूचितः ॥

**साध्वि**त्यादि । साधु युक्तम् । अर्थात् समुदाचारानतिक्रमणम् । समुदाचारः उचिताचरणम् ।

**किमर्थ**मिति । कुरूणां कुरुवंश्यानाम् । उत्तमो गुरुः पितामहो भीष्मः । किमर्थं कस्मै प्रयोजनाय संप्राप्तः । गोग्रहणं तु भीष्मसंप्राप्तेः प्रयोजनं न भवितुमर्हत्यनार्यकर्मत्वादित्यभिप्रायः । प्रयोजनमूहते—प्रतिज्ञा तीर्णा अज्ञातवाससंवित् सम्यगनुष्ठानेन परिसमापिता, अज्ञातवासवर्षे नैकोऽपि दिवसोऽतिवाह्यतयेदानीं परिशिष्यत इत्यर्थः । इति एवं । मम, स्मारणम् अभिज्ञापनं । क्रियते, अर्थाद् गुरुणा । स्मारणं हि अस्मद्वत्सलेन, भीमसेने कीचकवधकर्तृत्वबुद्ध्या विराटनगरेऽस्मदज्ञातवासमनुमिलवता, पितामहेन मम पाक्षिकास्मरणपरिहारायावश्यं कर्तुमुचितं; स्मरणं चास्मदुपजाव्यीवरीटद्रोहिष्वस्माकमात्मप्रकाशनभयत्यागेन प्रतापाविष्करणार्थमवश्यमपेक्षितमिति भावः । शङ्के इत्थं मे तर्कः ॥ १२ ॥

**कोऽत्रे**ति ॥

**जयत्वि**त्यादि ॥

**राजा** — सूतस्तावदाहूयताम् ।

**भटः** — यदाज्ञापयति महाराजः । (निष्क्रान्तः ।)

(प्रविश्य)

**सूतः** — जयत्वायुष्मान् ।

**राजा** —

रथमानय शीघ्रं मे श्लाघ्यः प्राप्तो रणातिथिः ।
तोषयिष्ये शरैर्भीष्मं जेष्यामीत्यमनोरथः ॥ १३ ॥

**सूतः** — यदाज्ञापयत्यायुष्मान् । आयुष्मन् !

रिपूणां सैन्यभेदेषु यस्ते परिचितो रथः ।
रथचर्यां बहिष्कर्तुं तमास्थायोत्तरो गतः ॥ १४ ॥

**राजा** — कथं निर्यातः कुमारः ।

**भगवान्** — भो राजन्! संवार्यतां संवार्यतां कुमारः ।

अगणितगुणदोषो युद्धतीक्ष्णश्च बाल्या-
न्न च दहति न कश्चित् सन्निकृष्टो रणाग्निः ।

---

**सूत** इत्यादि ॥

**यदि**त्यादि ॥

**जयत्वि**त्यादि । आयुष्मानिति सूतस्य राजानं प्रति समुदाचारः ॥

**रथमि**त्यादि । रणातिथिः रणेन तर्पणीयोऽतिथिः । भीष्मं, शरैः मदीयधनुर्मुक्तैर्बाणैः ; तोषयिष्ये प्रीणायिष्यामि, रणातिथिर्हि कथञ्चित् तोषणीय इति कृत्वा; न तु जेष्यामीत्यर्थः । तज्जयो हि मनोरथस्याप्यविषय इत्याह—जेष्यामीत्यादिना ॥ १३ ॥

**यदि**त्यादि ।

**रिपूणामि**त्यादि । सैन्यभेदेषु सैन्यव्यूहविदारणेषु । परिचितः शिक्षितचर्यः न तु दर्शितचर्य इत्यर्थः । अत एवाह—रथचर्यां बहिष्कर्तुम् अभ्यस्तां रथचर्यां युद्धरङ्गे प्रकाशयितुमित्यर्थः ॥ १४ ॥

**कथमि**त्यादि ॥

**भो राजन्निति** । संवार्यतामित्यादि श्लोकान्वयि ।

अथच परिहरन्ते धार्तराष्ट्रा न किञ्चि-
न्न खलु परिभवात् ते युद्धदोषान् ब्रवीमि ॥ १५ ॥

**राजा** — तेन हि शीघ्रमन्यो रथः कल्प्यताम् ।

**सूतः** — यदाज्ञापयत्यायुष्मान् ।

**राजा** — अथवा एहि तावत् ।

**सूतः** — आयुष्मन्! अयमस्मि ।

**राजा** —

त्वमिदानीं कुमारस्य किं न वाहितवान् रथम् ।
अनुज्ञातोऽसि किं तेन न राज्ञां सारथिर्भवान् ॥ १६ ॥

---

**अगणितेति** । बाल्याद् अगणितगुणदोषः अगणितौ अचिन्तितौ गुणदोषौ युद्धसम्भावितौ येन स तथाभूतः । युद्धतीक्ष्णः युद्धे तीक्ष्णः आत्मत्यागी च । कुमारः युवराज उत्तरः । संवार्यतां सम्यङ् निवर्त्यतां, युद्धात् । सन्निकृष्टः सन्निहितः । कश्चित् रणाग्निः । न च न दहति दहत्येव । जनमुपस्थितमिति कर्म गम्यम् । कश्चिदिति वा पाठः । बालमबालं वा कञ्चिदप्यदहन्न मुञ्चतीत्यर्थः । रणस्वभावमुक्त्वा प्राप्तशत्रुस्वभावमाह—अथच किञ्च । धार्तराष्ट्राः, किञ्चित् किमपि । न परिहरन्ते नोपेक्षन्ते, सर्वविधमपि प्रत्यनीकमविशेषान्मारयन्तीति भावः । युद्धदोषान् प्रकृतयुद्धसम्भावितान् अनर्थान् । परिभवात् ते न खलु ब्रवीमि परिभवं त्वत्पुत्रावमाननमभिसन्धाय तुभ्यं नैव वच्मि, किन्तु त्वद्विषयात् सौहार्दाद् वच्मीत्यर्थः । परिभवादिति ल्यब्लोपे पञ्चमी । 'तीक्ष्णा त्रिर्निशितोष्णयोः । आत्मत्यजि च' इति केशवः ॥ १५ ॥

**तेन हीत्यादि** । कल्प्यतां सज्जीक्रियतां । तमधिरुह्याहमेव युद्धार्थे यास्यामि उत्तरं च वारयिष्यामीत्यभिप्रायः ॥

**यदित्यादि** ॥

गन्तुं प्रवृत्ते सूते जिज्ञासितमन्यत् प्रष्टुकामस्तमाह्वयति—**अथवेत्यादि** ॥

**आयुष्मन्नित्यादि** ॥

पृच्छति—**त्वमित्यादि** । किं न वाहितवान् न प्राजितवान् । त्वया हि निपुणेनेदृशेऽवसरे रथो वाहयितव्य इत्याभिप्रायः । अवाहनं ते किं कुमारानुज्ञाकृतम्, आहोस्वित् स्वेच्छाकृतमिति पृच्छति—**अनुज्ञात इत्यादि** । अनुज्ञातः 'मम

**सूतः** —— प्रसीदत्वायुष्मान् । रथं संकल्पयित्वा तु सूतसमुदाचारेणोपस्थितः खल्वहम् । कुमारेण,

किन्नु तत् परिहासार्थं किन्नु तत्रास्ति कौशलम् ।
मामतिक्रम्य सारथ्ये विनियुक्ता बृहन्नला ॥ १७ ॥

**राजा** —— कथं बृहन्नलेति ।

**भगवान्** —— राजन् ! अलमलं सम्भ्रमेण ।

यदि स्वचक्रोद्धतरेणुदुर्दिनं रथं समास्थाय गता बृहन्नला ।
परान् क्षणैर्नेमिरवैर्निवारयन् विनापि बाणान् रथ एव जेष्यति ॥ १८ ॥

---

रथमन्यो वाहयतु, मा त्वं वाहये'ति दत्ताभ्यनुज्ञः । सारथिः न किं त्यक्तसारथ्याधिकारः किमित्यर्थः । एतेन स्वेच्छाकृतत्वमवाहनस्य पृष्टं भवति ॥ १६ ॥

असारथित्वप्रश्नसूचितकोपं राजानं प्रसादयन्नाह—**प्रसीदत्वित्यादि** । संकल्पयित्वा सम्यक् सज्जयित्वा । इह ल्यबकरणमार्षम् । कुमारेणेति श्लोकान्वयि । 'कुमारेण तु' इति ग्रन्थान्तरे पाठः ।

**किन्न्विति** । कुमारेण, माम्, अतिक्रम्य परिहृत्य । बृहन्नला या विराटकन्याया उत्तरायास्तौर्यत्रिकाचार्या रूपान्तरमर्जुनस्य सा बृहन्नलाख्या षण्डप्रकृतिः । सारथ्ये सारथिकर्मणि । विनियुक्ता कल्पिता । तद् बृहन्नलासारथ्यविनियोजनं । परिहासार्थं किन्नु परिहासो बाललीला मत्सारथ्यविडम्बना वा, तदर्थं किन्नु । तत्र बृहन्नलायां । कौशलं सारथिकर्मविनियोजनक्षमं सामर्थ्यम् अस्ति किन्नु । अथवा तत्र सारथ्यविनियोजने विषये । कौशलं कुशलकर्म, इतरदुर्लक्षोऽभिसन्धिरिति यावत् । अर्थात् कुमारस्य । अस्ति किन्नु ॥ १७ ॥

**कथमित्यादि** । इतिशब्दादनन्तरम् 'आत्थे'ति पूरणीयम् । हन्त महान् प्रमादः कुमारस्येत्यभिप्रायः ॥

**राजन्नित्यादि** । सम्भ्रमेण आवेगेन ।

**यदीत्यादि** । स्वचक्रोद्धतरेणुदुर्दिनं स्वचक्रैः उद्धतम् उत्थापितं रेणुदुर्दिनं पांसुवर्षं येन तं तथाभूतं । समास्थाय अधिष्ठाय । क्षणैः क्षणैरेव द्वित्रैः, न तु चिरकालापेक्षेत्यर्थः । 'क्षणाद्' इति मातृकान्तरे पाठः, एकेनैव क्षणेनेत्यर्थः । नेमिरवैः चक्रप्रान्तध्वनिभिः । बाणान् विनापि उत्तरबाणमोचनाभावेऽपि रथ एव यो

**राजा** — तेन हि शीघ्रमन्यो रथः कल्प्यताम् ।

**सूतः** — यदाज्ञापयत्यायुष्मान् । (निष्क्रान्तः ।)

(प्रविश्य)

**भटः** — भग्नः खलु कुमारस्य रथः ।

**राजा** — कथं भग्नो नाम ।

**भगवान्** — कथमिदानीं भग्नो नाम ।

**भटः** — श्रोतुमर्हति महाराजः ।

बहुभिः समराभिज्ञैराच्छिन्नाश्वपथः परैः ।
भग्नो गहनलोभेन श्मशानाभिमुखो रथः ॥ १९ ॥

---

बृहन्नलाधिष्ठितः स एव रथः । जेष्यति शत्रून् पराभविष्यति । एतेन बृहन्नलाया रथचर्यानिपुणत्वमाविष्कृतम् । "यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥" इत्यागमोऽप्यत्रानुसन्धातुमुचितः ॥१८॥

जिज्ञासितेऽर्थेऽवगते पूर्वाज्ञां स्मारयति—**तेन हीत्यादि** ॥

**यदित्यादि** ॥

स्वयं योद्धुकामया बृहन्नलया श्मशानगहनस्थापितनिजगाण्डीवाहरणाय युद्धभूमेर्निवर्त्य कुमारस्य रथे श्मशानगहनाभिमुखं वाहिते तत्त्वानभिज्ञतया तद्भङ्गं मन्यमानस्य भटस्य तद्वृत्तान्तनिवेदनार्थं प्रवेशः—**प्रविश्य भट** इत्यादि । भग्नः शत्रुभिः परिभूतः ॥

**कथमित्यादि** ॥

**कथमिदानीमित्यादि** ॥

**श्रोतुमित्यादि** ।

**बहुभिरिति** । बहुभिः, समराभिज्ञैः युद्धनिपुणैः । परैः शत्रुभिः । आच्छिन्नाश्वपथः आच्छिन्नः हठाक्रान्तः अश्वपथः अश्वगमनमार्गो यस्य स तथाभूतः । अत एव भग्नः युद्धभुवि प्रतिरुद्धगतिः प्राप्तपरिभवो वा । रथः, गहनलोभेन गहनस्य काननस्य लोभेन आशया । श्मशानाभिमुखः, जात इति शेषः, श्मशाने हि परिभूतभीरुनिलयनयोग्यं काननं सुलभमिति काननप्रत्याशया तत् प्रविष्ट इति भावः ॥ १९ ॥

**भगवान्**—(आत्मगतम्) आ अत्र खलु गाण्डीवम् । (प्रकाशम्) भो राजन्!

निमित्तं किञ्चिदुत्पन्नं श्मशानाभिमुखे रथे ।
धार्तराष्ट्राः स्थिता यत्र श्मशानं तद् भविष्यति ॥ २० ॥

**राजा**—भगवन्! अकाले स्वस्थवाक्यं मन्युमुत्पादयति ।

**भगवान्**—अलं मन्युना । कदाचिदनृतं नोक्तपूर्वम् ।

**राजा**—आ अस्त्येतत् । गच्छ भूयो ज्ञायतां वृत्तान्तः ।

**भटः**—यदाज्ञापयति महाराजः । (निष्क्रान्तः)

---

**आ** इत्यादि । आ इति स्मरणे । स्मरणविषयमाह—अत्र खलु श्मशान एव । गाण्डीवम् अर्जुनधनुः । वर्तत इति शेषः । एतेन रथस्य तदाभिमुख्यं गाण्डीवग्रहणार्थमिति सूचितम् ।

तदिदं वस्तुतत्त्वं मनसिकृत्य शुभनिमित्तोदयवाचोयुक्त्या विराटमाश्वासयति—**निमित्तमित्यादि** । निमित्तं भाविशुभसूचकं । भाविनं सूच्यार्थमाह—धार्तराष्ट्रा इत्यादि । तद् युद्धरङ्गं । श्मशानं प्रेतस्थानं । भविष्यति, उत्तरः शत्रून् प्रेतान् करिष्यतीत्ययमर्थो रथस्य श्मशानाभिमुखीभावेन सूच्यत इति स्वस्थो भवेति भावः ॥ २० ॥

**भगवन्निति** । अकाले स्वस्थवाक्यानर्हे काले, परमोद्वेगकाले इत्यर्थः । स्वस्थवाक्यं स्वस्थस्यानुद्विग्नस्य वाक्यं शुभनिमित्तवाचोयुक्तिः । मन्युं कोपं शोकं वा । उत्पादयति । अयं भावः—वस्तुतो मत्परिभवनिमित्तेऽप्यर्थे शुभनिमित्तत्वं पाण्डित्यादारोप्य व्याचक्षाणस्य तव कालोचित उद्वेगो मनागपि न लक्ष्यते, तदेतन्मय्यतिमात्रोद्विग्ने मत्समसुखदुःखस्य तवात्यन्तानर्हमिति ॥

आत्मकृते शुभनिमित्तव्याख्याने राज्ञो विश्वासं जनयितुमाह—**अलमित्यादि** । अनृतम् असत्यम् । उक्तपूर्वं पूर्वम् उक्तम् उक्तपूर्वम् ॥

**आ इति** । एतद् अनृतस्यानुक्तपूर्वत्वम् अथवा सत्यवाक्यत्वम् । अस्ति विद्यते । आ इत्यनुभूतस्य सत्यवाक्यत्वस्य स्मरणे । मनस्स्वास्थ्यसदृशमाह—**गच्छेत्यादि** । भूयः पुनः ॥

**यदित्यादि** ॥

**राजा**—

को नु खल्वेष सहसा कम्पयन्निव मेदिनीम् ।
नदीस्रोत इवाविद्धः क्षणात् संवर्तते ध्वनिः ॥ २१ ॥

ज्ञायतां शब्दः ।

(प्रविश्य)

**भटः**—जयतु महाराजः । श्मशानान्मुहूर्तविश्रान्ततुरगेण कुमारेण तु,

**भगवान्**—एष मामनृतवादिनं न कुर्यात् ।

**राजा**—किं कृतं कुमारेण ।

**भटः**—

कृता नीला नागाः शरशतनिपातेन कपिला
हयो वा योधो वा न वहति न कश्चिच्छरशतम् ।
शरैः स्तम्भीभूताः शरपरिकराः स्यन्दनवराः
शरैश्छन्ना मार्गाः स्रवति धनुरुग्रां शरनदीम् ॥ २२ ॥

---

**कोन्वित्यादि** । नदीस्रोत इव नद्याः स्रोतः जलसन्तान इव । आविद्धः वक्रः । वक्रत्वं च शरगतिवक्रत्वकृतं, ध्वनेः शरगतिजन्यताया बोधयिष्यमाणत्वात् । इदमुपात्तं गम्यमविच्छिन्नवाहित्वं च नदीस्रोतस्साहश्यप्रयोजकं बोद्धव्यम् । संवर्तते जायते ॥ २१ ॥

**जयत्वित्यादि** । श्मशानात् श्मशानं प्राप्य । ल्यब्लोपे पञ्चमी । मुहूर्तविश्रान्ततुरगेण मुहूर्तं विश्रान्ताः तुरगाः रथाश्वाः यस्य तेन । कुमारेण तु, इदं वक्ष्यमाणश्लोकान्वयि । तुशब्दो विशेषद्योतकः ॥

अर्धोक्ते भटवचनशेषस्य स्वीयनिमित्तवाचोयुक्त्यनुगुणतामौत्सुक्यात् सम्भावयति—**एष** इत्यादि ॥

**किमित्यादि** ॥

**कृता** इत्यादि । नागाः गजाः । कपिलाः रक्तवर्णाः शरक्षतासृक्परिलेपवशादिति भावः । हयः अश्वः । शरशतं न न वहति प्रतिहयं प्रतियोधं च बहवो बाणा अङ्गेषु लग्ना इत्यर्थः । शरपरिकराः बाणपरिवाराः बाणमया इत्यर्थः । छ-

**भगवान्** —(आत्मगतम्)

एतदक्षयतूणित्वं येन शक्रस्य खाण्डवे ।
यावत्यः पतिता धारास्तावन्तः प्रेषिताः शराः ॥ २३ ॥

**राजा** —अथ परेष्विदानीं को वृत्तान्तः ।

**भटः** —अप्रत्यक्षं हि तत्र मे । प्रवृत्तिपुरुषाः कथयन्ति—

धनुर्घोषं द्रोणस्तदिदमिति बुद्ध्वा प्रतिगतो
ध्वजे बाणं दृष्ट्वा कृतमिति न भीष्मः प्रहरति ।
शरैर्भग्नः कर्णः किमिदमिति चान्ये नृपतयो
भयेऽप्येको बाल्यान्न भयमभिमन्युर्गणयति ॥ २४ ॥

---

न्नाः रुद्धाः । स्रवति स्रावयति, स्रुधातुरन्तर्भावितण्यर्थः । उग्रां भीषणां । शरनदीं बाणप्रवाहम् । एतेन बाणप्रवाहसमुत्थत्वमुक्तध्वनेरावेदितम् ॥ २२ ॥

**एतदिति** । एतद् धनुष उग्रशरनदीस्राविंत्वम । अक्षयतूणित्वम् अक्षये बाणक्षयरहिते तूण्यौ निषङ्गौ यस्यार्जुनस्य धनुषो वा सोऽक्षयतूणिः, तस्य भावस्तत्त्वम् । कार्यहेत्वोरभेदोपचाराद् अक्षयतूणित्वहेतुकमित्यर्थः । अक्षयतूणित्वं क्रियान्तरे दृष्टप्रभावमित्याह—खाण्डवे खाण्डवाख्ये वने । दह्यमाने सतीति शेषः । यावत्यः यत्परिमाणाः । शक्रस्य धाराः खाण्डवदाहशमनार्थमिन्द्रेण प्रवर्तिता मेघवृष्टिधाराः । पतिताः प्रवृत्ताः । तावन्तः तत्परिमाणाः, वृष्टिधारावदविच्छिन्ना असङ्ख्याश्चेत्यर्थः । शराः, येन अक्षयतूणित्वेन हेतुना । प्रेषिताः अर्थादर्जुनेन । इह अक्षयतूणित्वमित्यत्र कबभाव आर्षः । अथवा निषङ्गार्थस्तूणिशब्दो ह्रस्वान्तोऽप्यस्ति—'तूणी चाक्षयसायके' (श्लो० ६१) इति यथा ॥ २३ ॥

**अथेत्यादि** । परेषु शत्रुषु ॥

**अप्रत्यक्षमित्यादि** । तत्र परवृत्तान्तविषये । अप्रत्यक्षं साक्षाद्दर्शनाभावः । प्रवृत्तिपुरुषाः वृत्तान्तोपलम्भनियुक्ताः पुरुषाः ।

कथ्यमानमाह—**धनुरित्यादि** । द्रोणः, धनुर्घोषं चापध्वनिम् अर्थादुत्तररथादुत्पन्नम् । तदिदमिति बुद्ध्वा अमुकसम्बन्धिनोऽमुकचापस्यायं घोष इति प्रत्यभिज्ञायेत्यर्थः । प्रत्यभिज्ञा हि तदिदमिति बुद्धिरित्युच्यते । प्रतिगतः युद्धान्निवृत्त इत्यर्थः । भीष्मः, ध्वजे स्वकीये केतौ । बाणं, परकीयं, दृष्ट्वा, कृतमिति युद्धेनाल-

**भगवान्**— कथमभिमन्युः प्राप्तः । भो राजन् !

युध्यते यदि सौभद्रस्तेजोऽग्निर्वंशयोर्द्वयोः ।
सारथिः प्रेष्यतामन्यो विक्लबात्र बृहन्नला ॥ २५ ॥

**राजा**— मा मा भवानेवम् ।

भीष्मं रामशरैरभिन्नकवचं द्रोणं च मन्त्रायुधं
कृत्वा कर्णजयद्रथौ च विमुखौ शेषांश्च तांस्तान् नृपान् ।

---

मिति । मत्वेति शेषः । न प्रहरति, अर्थाच्छत्रुम् । कर्णः, शरैः, भग्नः पीडितः परिभूतो वा । अन्ये नृपतयश्च, किमिदमिति इदं द्रोणभीष्मादिभङ्गनिमित्तं प्रत्यर्थिपराक्रमणं । किमिति लोकातिशायीति, चिन्तयन्तीति शेषः । किमित्यतिशयार्थेऽव्ययम् । भयेऽपि इत्थं भयस्थानेऽपि । अभिमन्युः, एकः एक एव, बाल्याद् , भयम् अपायं । न गणयति अगणयन् युध्यत इत्यर्थः । यज्ञानुभवार्थमागतोऽभिमन्युर्गोग्रहणेऽस्मिन् सहायत्वेनानीतो द्रष्टव्यः ॥ २४ ॥

**कथमि**त्यादि ।

**युध्यत** इति । द्वयोः वंशयोः पाण्डवकौरववंशयोः पाण्डवयादववंशयोर्वा । तेजोग्निः तेजसि प्रतापे अग्निः अग्निसदृशः । सुभद्राया अपत्यं पुमान् सौभद्रः अभिमन्युः । युध्यते यदि, अन्यः सारथिः, प्रेष्यताम् उत्तररथवाहनार्थम् । कुत इत्यत्राह—बृहन्नला, अत्र सौभद्रे विक्लबा अशक्ता । कामं भीष्मादिविषये शक्ता, तथापि सौभद्रविषये न शक्तेत्यर्थः । भीष्मादिधर्षिणापि बृहन्नलासारथ्येन सौभद्रशौर्यमधृष्यमिति विराटग्राह्योऽभिप्रायः, विक्लबत्वं पुत्रवात्सल्यप्रयुक्तमिति तु वक्तृहृदयनिगूढोऽभिप्रायः ॥ २५ ॥

**मामेति** । भवान्, एवं 'विक्लबात्र बृहन्नला' इत्यनेन प्रकारेण । मा मा, वदत्विति शेषः । बृहन्नलायाः सौभद्रविषये वैक्लब्यं, तदन्यविषये प्रागल्भ्यं वा न कार्यकारि, अपि तु मत्पुत्रशौर्यमेवेति सौभद्रधर्षणं प्रति सन्देहस्ते मा भूदिति भावः ।

तदिदमुपपादयति—**भीष्ममिति** । रामशरैः परशुरामबाणैः । अभिन्नकवचम् अविदारितकञ्चुकम् । एतेन रामाजय्यत्वमम्बोपाख्यानप्रसिद्धमुक्तम् । भीष्मं । मन्त्रायुधं मन्त्रः आयुधं प्रहरणं यस्य तं तथाभूतम् । एतेन शौर्यातिरिक्तं तपोबलशालित्वं सूचितम् । द्रोणं च, कर्णजयद्रथौ च, शेषान् अवशिष्टान् । तां-

सौभद्रं स्वशरैर्न धर्षयति किं भीतः पितुः प्रत्ययात्
संसृष्टोऽपि वयस्यभावसदृशं तुल्यं वयो रक्षति ॥ २६ ॥

**भटः** — एष खलु कुमारस्य रथः,

आलम्बितो भ्रमति धावति तेन मुक्तो
न प्राप्य धर्षयति नेच्छति विप्रकर्तुम् ।
आसन्नभूमिश्चपलः परिवर्तमानो
योग्योपदेशमिव तस्य रथः करोति ॥ २७ ॥

---

स्तान्, नृपांश्च, विमुखानिति युक्तः पाठः । विमुखान् युद्धपराङ्मुखान् । विमुखाविति द्विवचनान्तपाठे यथास्थिते वचनविपरिणामेन भीष्मादिषु प्रत्येकमन्वयः कल्पनीयः । कृत्वा, सौभद्रम् अभिमन्युं । किं न धर्षयति धर्षयिष्यत्येव । अर्थात् कुमारः कर्ता । भीष्मादीन् विमुखीकृतवतो वीरस्य सौभद्रधर्षणं नातिभार इति भावः । अथार्जुनभयादभिमन्युमधर्षयन्नेव कुमारस्तेन सह सख्यं यदि कुर्वीत, तदपि नानुचितमित्यभिप्रायेणाह—पितुः प्रत्ययात् भीतः पितुः सौभद्रजनकस्यार्जुनस्य । प्रत्ययात् जगदेकवीरत्वख्यातेः । भीतः भयात्, भीशब्दात् तसिः । भीत इति क्तान्तं वा, शङ्कितः सन्नित्यर्थः । संसृष्टोऽपि संसर्गं सखित्वरूपं प्राप्तोऽपि । संसर्गो हि परेण मनोवाक्कायकर्मभिर्मिश्रणम् । तच्च सखिकमैव भवतीति संसृष्टः सखोच्यते । अपिशब्दः पाक्षिकाभ्युपगमे । वयस्यभावसदृशं सखित्वानुरूपं । तुल्यं सौभद्रवयसा समानं । वयः, रक्षति पालयति । समानवयसाभिजातेन सह संसर्गकरणं हि वयस्समुचित आचारः; तं रक्षन्नर्थाद् वय एव रक्षतीति भावः । 'भीतः पितुः प्रत्ययाद' इत्यस्य पूर्ववाक्येन वा सम्बन्धः । तदा संसृष्टत्वस्य निमित्तं समानबलत्वं वक्तव्यम् । 'प्रत्ययस्तु ख्यातिरन्ध्रविश्वासाधीनहेतुषु' इति केशवः ॥ २६ ॥

एष इत्यादि । श्लोकान्वयि ।

आलम्बित इति । कुमारस्य एष रथः, तेन सारथिना जनेन । आलम्बितः अश्वप्रग्रहेषु गृहीतः सन् स्थित्यर्थे । भ्रमति न तु तिष्ठति । मुक्तः गमनार्थे मुक्ताश्वप्रग्रहः सन् । धावति, न तु युक्तं गच्छति । एतेनालम्बनमोचनयोरनास्थाकृतत्वमुक्तम् । प्राप्य न धर्षयति अवसरं लब्ध्वापि न लङ्घयति, अर्थात् प्रतिरथम् । विप्रकर्तुं प्रतिरथमभिभवितुं । नेच्छति । एतेन सारथेः प्रतिरथधर्षणविप्रकारयोः

**राजा**—गच्छ। भूयो ज्ञायतां वृत्तान्तः।

**भटः**—यदाज्ञापयति महाराजः। (निष्क्रम्य प्रविश्य) जयतु महाराजः। जयतु विराटेश्वरः। प्रियं निवेदये महाराजाय। अवजितं गोग्रहणम्। अपयाता धार्तराष्ट्राः।

**भगवान्**—दिष्ट्या भवान् वर्धते।

**राजा**—न न। भगवतो वृद्धिरेषा। अथ कुमार इदानीं क।

**भटः**—दृष्टपरिस्पन्दानां योधपुरुषाणां कर्माणि पुस्तकमारोपयति कुमारः।

---

पेक्षा प्रकाशिता। आसन्नभूमिचपलः आसन्नभूमौ प्रतिरथसमीपप्रदेशे चपलश्चञ्चलः। परिवर्तमानः परितश्चरन्। रथः, तस्य कुमारस्य। योग्योपदेशं योग्याया अभ्यासस्य अर्थाद् रथचर्याविषयस्य उपदेशम् अध्यापनं। करोतीव। यो हि रथो रथचर्याभ्यासोपदेशार्थः, स प्रतिरथधर्षणादिरूपप्रयोजनशून्ये विचित्रे सञ्चारे व्याप्रियते। प्रकृतोऽपि रथस्तथाभूत इति तत्र तदुपदेशकरणमुत्प्रेक्ष्यते ॥ २७ ॥

भगवदुक्तिसंवादिनि सारथिवैक्लब्यवृत्तान्ते श्रुते तदुत्तरकालवृत्तज्ञानौत्सुक्यादाह—**गच्छेत्यादि** ॥

**यदित्यादि**। अवजितं पराजितं, अर्थात् कुमारेण ॥

**दिष्ट्येत्यादि**। दिष्ट्येति हर्षे। भवान्, वर्धते गोपरित्राणलक्षणं धार्तराष्ट्रपराजयलक्षणं चाभ्युदयं प्राप्नोति ॥

**न नेत्यादि** ॥

**दृष्टेति**। कुमारः, दृष्टपरिस्पन्दानां दृष्टः प्रत्यक्षितः परिस्पन्दः परिश्रमः येषां तेषां तथाभूतानां। युद्धे कृतसाहसानामित्यर्थः। योधपुरुषाणाम्। कर्माणि अपदानानि। पुस्तकं पुस्तं लेप्यालेख्यादिक्रिया, इह तु तदधिकरणभूतं पटफलकादिकं लक्ष्यते, पुस्तमेव पुस्तकं, तत्। आरोपयति आरूढानि करोति, आलेख्यात्मना पुस्तके निवेशयतीत्यर्थः। योधापदानानां हि श्लाघनीयानामालेख्यकरणं योधानां पूजा भवति। पुस्तकमारोपयतीत्यस्यान्या व्याख्या—पुस्तकं लेख्याधारपत्रसम्पुटम्, आरोपयति तस्मिन् लिखतीत्यर्थः। लेखनं च योधपुरुषपूजावसरे तदविस्मरणार्थम्। इह रुहेर्गत्यर्थत्वादणिकर्तॄणां कर्मणां णौ कर्मत्वम् ॥

**राजा** — अहो श्लाघनीयव्यापारः खल्वयं कुमारः ।

ताडितस्य हि योधस्य श्लाघनीयेन कर्मणा ।
अकालान्तरिता पूजा नाशयत्येव वेदनाम् ॥ २८ ॥

अथ बृहन्नलेदानीं क्व ।

**भटः** — प्रियनिवेदनार्थमभ्यन्तरं प्रविष्टा ।

**राजा** — बृहन्नला तावदाहूयताम् ।

**भटः** — यदाज्ञापयति महाराजः । (निष्क्रान्तः ।)

(ततः प्रविशति बृहन्नला ।)

**बृहन्नला** — (निरूप्य सविमर्शम्)

गाण्डीवेन मुहूर्तमाततगुणेनासीत् प्रतिस्पर्धितं
बाणानां परिवर्तनेष्वविशदा मुष्टिर्न मे संहता ।

---

**अहो** इत्यादि । अहोशब्दः प्रशंसायाम् ।

**ताडितस्येत्यादि** । श्लाघनीयेन, कर्मणा साहसक्रियया हेतुना । ताडितस्य साहसकर्तृसुलभं ताडनं शत्रुसकाशात् प्राप्तस्येत्यर्थः । अकालान्तरिता कालान्तरिता कालव्यवहिता न भवतीत्यकालान्तरिता सद्य एव क्रियमाणेत्यर्थः । पूजा तत्कर्मपुस्तकारोपणादिरूपा बहुमानना । वेदनां ताडनजनितां व्यथां । नाशयत्येव । हिः प्रसिद्धौ ॥ २८ ॥

**प्रियेत्यादि** ॥

रणविस्तरश्रवणौत्सुक्यादाह — **बृहन्नलेत्यादि** । बृहन्नलेत्यतः प्राग् 'गच्छ' इति ग्रन्थान्तरे पाठः ॥

**यदित्यादि** ॥

अथ भटाहूताया बृहन्नलायाः प्रवेशः—**तत** इत्यादि ।

युद्धोपक्रमकालिकीं स्वावस्थां प्रणिधानेन बुद्धावुपस्थाप्याह—**गाण्डीवेनेति** । आततगुणेन आततो बद्धः गुणो मौर्वी यस्मिन् तेन तथाभूतेन भवता । गाण्डीवेन धनुर्विशेषेण सह, सहार्थे तृतीया । मे मम । प्रतिस्पर्धितं प्रतिस्पर्धा लक्षणया अविधेयविधेयीकरणार्थोऽभियोगः । मुहूर्तम् आसीत् नाडीद्वयकालव्यापि जातमित्यर्थः । परिचयचिराविच्छेदान्मद्धस्तयोरयथापुरविधेये गाण्डीवे तस्याततगुणत्वसम्पत्तये मया मुहू-

गोधास्थानगता न चास्ति पटुता स्थाने हृतं सौष्ठवं
स्त्रीभावाच्छिथिलीकृतः परिचयादात्मा तु पश्चात् स्मृतः ॥ २९ ॥

मया हि,

अनेन वेषेण नरेन्द्रमध्ये लज्जायमानेन धनुर्विकृष्टम् ।
यात्रा तु तावच्छरदुर्दिनेषु शीघ्रं निमग्नः कलुषश्च रेणुः ॥ ३० ॥

---

र्तकालं महान् प्रयत्नः कृत इत्यभिप्रायः । 'प्रतिस्तम्भितम्' इति पाठे गाण्डीवकर्तृकं प्रतिस्तम्भनमित्यर्थः । गुणारोपणकाले गाण्डीवेन नमनानुन्मुखेनैव मुहूर्तं स्थितमित्यभिप्रायः । मे मुष्टिः हस्तविन्यासविशेषः । बाणानां, परिवर्तनेषु ग्रहणमोचनपर्यायेषु विषये । अविशदा अप्रसन्ना अप्रवणेत्यर्थः । न संहता न दृढा च । इहापि मुहूर्तमिति सम्बध्यते । गोधास्थानगता गोधायाः ज्याघातवारणस्य स्थानं हस्तैकदेशः तद्गता तत्सम्बद्धा । पटुता च, मुहूर्तं, नास्ति नासीत् । अस्तीति सत्तार्थकमव्ययम् । स्थाने धानुष्ककरणीये स्थितिविशेषे सौष्ठवं समीचीनत्वं । मुहूर्तं, हृतम् अपनीतम्, अर्थात् स्त्रीभावेन कर्त्रा । गाण्डीवप्रतिस्पर्धितादयः स्थानासौष्ठवान्ता दोषाः स्त्रीस्वभावचिरावलम्बनप्रयुक्ताः प्रमुखे मुहूर्तकालं स्थिता इति भावः । मुहूर्तमित्युक्त्या तदुत्तरकाले ते दोषा अपगता इति गम्यते । अपगमे कारणमाह—पश्चात् तु मुहूर्तोत्तरकाले पुनः । आत्मा पारमार्थिकः पुरुषस्वभावः । परिचयाद् मुहूर्तसंसिद्धाद् धनुर्व्यापारपरिचयाद्धेतोः । स्त्रीभावात् शिथिलीकृतः सन्, स्त्रीभावात् स्त्रीस्वभावाद्, अपादानात् । शिथिलीकृतः सन् श्लथबन्धः कृतः सन् । आत्मा हि स्त्रीस्वभावेन बलवता चिरं संयतः इदानीं पुरुषकर्मपरिचयेन तद्यन्त्रणान्मोचित इत्यभिप्रायः । स्मृतः विस्मृतशास्त्रवत् स्मृतिविषयः कृतः सम्यगनुष्ठानानुगुण्यं यथा स्यात् तथा चित्तारूढः कृत इत्यर्थः । एतेन प्रतिस्पर्धितादीनां स्त्रीभावदोषाणां पश्चान्निवृत्तिः, स्वीयस्य धनुर्विद्यानैपुण्यस्य निरङ्कुशप्रवृत्तिश्च द्योतिते । "आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि" इति मेदिनी । 'द्वे तु नाड्यौ मुहूर्तोऽस्त्री' इति केशवः, 'गोधा तला च न नरौ हस्तघ्नो ज्यानिवारणे" इति यादवः ॥ २९ ॥

आत्मस्मरणानन्तरवृत्तमाह—**मया हि अनेनेति** । मया हि, नरेन्द्रमध्ये, अनेन वेषेण स्त्रीरूपेण हेतुना । लज्जायमानेन लज्जामनुभवता सता । एतेन स्वोत्साहस्य लज्जानुबन्धप्रयुक्तमतीमत्वं सूचितम् । धनुः चापं । विकृष्टं व्यापरितं ।

भोः,

जित्वापि गां विजयमप्युपलभ्य राज्ञो
नैवास्ति मे जयगतो मनसि प्रहर्षः ।
दुःशासनं समरमूर्धनि सन्निगृह्य
बद्ध्वा यदद्य न विराटपुरं प्रविष्टः ॥ ३१ ॥

उत्तराप्रीतिदत्तालङ्कारेणालङ्कृतो व्रीलित इवास्मि राजानं द्रष्टुम् । तस्माद् विराटेश्वरं पश्यामि । (परिक्रम्यावलोक्य) अये अयमार्यो युधिष्ठिरः,

सयौवनः श्रेष्ठतपोवने रतो नरेश्वरो ब्राह्मणवृत्तमाश्रितः ।
विमुक्तराज्योऽप्यभिवर्धितः श्रिया त्रिदण्डधारी न च दण्डधारकः ॥ ३२ ॥

---

तु तथापि धनुर्विकर्षणस्य सलज्जमनुष्ठितत्वेऽपीत्यर्थः । यात्रा तावत् सञ्चारस्तावत्, अर्थात् प्रतिसैन्यस्य । शरदुर्दिनेषु बाणवर्षेषु । जातेति शेषः । लज्जामन्थरमपि धनुर्विकर्षणं महतीं शरवृष्टिमजनयदिति भावः । शरवृष्टिसिद्धं फलमाह—रेणुः युद्धभूमिगतः परागः । कलुषः सन् आविलद्रवत्वापन्नः सन् । एतेन शरविदारितशत्रुसैन्यदेहक्षरितरक्तप्रवाहसम्भेदो रेणोर्द्योत्यते । शीघ्रं, निमग्नः भुवि लीनः । लज्जायमानशब्दो लज्जाशब्दात् 'सुखादिभ्यः कर्तृवेदनायाम्' (३-१-१८) इति क्यङा साध्यः । तस्य हि सुखादौ पाठः कल्पनीयः । "कलुषं तु नपि ह्यघे । सूक्ष्मैलायां तु कलुषी स्त्री त्रिषु त्वाविलद्रवे ।" इति केशवः । 'कलुषः सरेणुः' इति पाठान्तरम् ॥ ३० ॥

**भो** इति विषादे ।

**जित्वेत्यादि** । जित्वापि शत्रुहस्तात् प्रत्याहृत्यापि । राज्ञः विराटस्यास्मदुपजीव्यस्य । इह जयोपलम्भक्रिययोः प्रहर्षक्रियया समानकर्तृकत्वात् क्त्वाप्रत्ययोपपत्तिः । अप्रहर्षे हेतुमुत्तरार्धेनाह—समरमूर्धनि युद्धान्ते । सन्निगृह्य सम्यङ् निगृहीतं कृत्वा ॥ ३१ ॥

**उत्तरेत्यादि** । उत्तराप्रीतिदत्तालङ्कारेण उत्तरया तदाख्यया विराटकन्यया प्रीतिदत्तो योऽलङ्कारः, तेन । तस्माद् लब्धजयत्वाद् विराटाह्वानाद्वा ।

**सयौवन इत्यादि** । सयौवनः युवा । अथापि, श्रेष्ठतपोवने रतः श्रेष्ठे तपोवने आसक्तः । तपोवने रतिर्हि वार्धकोचितेत्यभिप्रायः । अप्यर्थ एवमुत्तरत्रापि गम्यः । त्रिदण्डधारी त्रयाणां दण्डानां वेणुलगुडानां समाहारस्त्रिदण्डम् ।

(उपगम्य) (क) भअवं! वन्दामि ।

भगवान्—स्वस्ति ।

बृहन्नला—(ख) जेदु भट्टा ।

राजा—

अकारणं रूपमकारणं कुलं महत्सु नीचेषु च कर्म शोभते ।
इदं हि रूपं परिभूतपूर्वकं तदेव भूयो बहुमानमागतम् ॥ ३३ ॥

बृहन्नले! परिश्रान्तामपि भवतीं भूयः परिश्रमयिष्ये। उच्यतां रणविस्तरः।

---

(क) भगवन्! वन्दे ।
(ख) जयतु भर्ता ।

---

समाहारे द्विगुः । 'पात्राद्यन्तस्य न' (२ ४·३०) इति स्त्रीत्वाभावः । त्रिदण्डं धारयितुं शीलमस्येति त्रिदण्डधारी कुटीचकसंन्यासी । तस्य हि त्रिदण्डशिखायज्ञोपवीतादिधारणं विहितम् । दण्डधारकः न च, दण्डधारकः दण्डो दुष्टदमनं तत्प्रणेता, नैव भवति । लगुडधारको नैव भवतीति च गम्यते । इह प्रतिपादमापातविरुद्धयोर्द्वयोर्धर्मयोर्निर्देशाद् विरोधाभासालङ्कारः ॥ ३२ ॥

भअवमित्यादि । 'भगवन्! अभिवादये' इति त्वपपाठः । संस्कृतासङ्गतेः ॥

स्वस्तीति ॥

जेदु इत्यादि ॥

बृहन्नलाप्रभावं प्रशंसति—अकारणमिति । रूपं पुंस्त्वादि । अर्थाज्जनस्य । अकारणम् अकिञ्चित्करं बहुमाननिमित्तं न भवतीत्यर्थः । कुलं जन्मवंशः । अकारणम् । महत्सु रूपकुलोत्कृष्टेषु । नीचेषु रूपकुलापकृष्टेषु च जनेषु । कर्म कलाकौशलं । शोभते प्रकाशते । कर्मैव शोभमानं सत् कर्मकारिणाम् उभयेषामविशेषेण बहुमाननिमित्तं भवतीत्यभिप्रायः । अस्य सामान्यन्यायस्य समर्थकं प्रकृतं विशेषमाह—हिशब्द उक्तोपपादने । इदं दृश्यमानं । रूपं बृहन्नलागतं स्त्रीरूपं । परिभूतपूर्वकं पूर्वं परिभूतम् अवज्ञातं । कुत्सायां कन् । तदेव पूर्वावज्ञातं रूपमेव । भूयः पश्चाद्, अस्मिन् महायुद्धसारथ्यनिर्वाहोत्तरकाल इत्यर्थः । बहुमानं पूजाम् । आगतं प्राप्तम् । अर्थान्तरन्यासोऽलङ्कारः ॥ ३३ ॥

धार्तराष्ट्रापयानान्तस्य सामान्याकारेण श्रुतस्य युद्धवृत्तान्तस्यावान्तरयावद्विशेषश्रवणकौतुकादाह—बृहदित्यादि । परिश्रमयिष्ये परिश्राम्यन्तीं प्रयोजयिष्ये । परि·

बृहन्नला — (क) सुणादु भट्टा ।

राजा — ऊर्जितं कर्म । संस्कृतमभिधीयताम् ।

बृहन्नला — श्रोतुमर्हति महाराजः ।

(प्रविश्य)

भटः — जयतु महाराजः ।

राजा —

अपूर्व इव ते हर्षो ब्रूहि केनासि विस्मितः ।

भटः —

अश्रद्धेयं प्रियं प्राप्तं सौभद्रो ग्रहणं गतः ॥ ३४ ॥

बृहन्नला — कथं गृहीतः । (आत्मगतम्)

---

(क) शृणोतु भर्ता ।

---

श्रमश्च रणविस्तरवचनलक्षणः । रणविस्तरः युद्धसम्बद्धो वाक्प्रपञ्चः ॥

सुणादु इत्यादि ॥

ऊर्जितमिति । कर्म वर्ण्यं युद्धापदानम् । ऊर्जितम् ओजस्वि । संस्कृतम् अभिधीयताम् संस्कृतवाक्यम् उच्चार्यतां तत्प्रतिपादनाय, न तु प्राकृतवाक्यमित्यर्थः । संस्कृतं हि ऊर्जितवस्त्वभिव्यञ्जकवर्णादिनिखिलपरिकरसम्प्रयोगरमणीयतया वर्ण्यवस्त्वत्यन्तानुगुणं; प्राकृतं त्वतादृशतया तदननुगुणमिति भावः ॥

श्रोतुमित्यादि ॥

यावद् बृहन्नला रणविस्तरं वक्तुमुपक्रमते, तावदपूर्वसिद्धमतिप्रियं जयघोषं श्रावयितुं भटः प्रविष्ट आह—जयत्वित्यादि ॥

अपूर्व इत्यादि । ते हर्षः, अपूर्व इव अननुभूतपूर्व इव । आकारेण लक्ष्यत इति शेषः । केन, हेतुना । विस्मितः हर्षकारणभूतं विस्मयं प्राप्तः । असि । ब्रूहि कथय । गम्याया अपि वचनचोदनायाः शब्देनाभिधानं वचने विलम्बासहतां श्रवणौत्सुक्यनिमित्तां सूचयितुम् ॥

अश्रद्धेयमिति । अश्रद्धेयं मनसाप्यप्रतर्क्यं । प्रियं वस्तु । प्राप्तं हस्तगतम् । आसीदिति शेषः । किं तत् प्रियं वस्त्वित्यत्राह—सौभद्रः अभिमन्युः । ग्रहणं, ग्रहः प्राप्तः ॥ ३४ ॥

कथमित्यादि ।

तुलितबलमिदं मयाद्य सैन्यं परिगणितं च रणेऽद्य मे स दृष्टः ।
सदृश इह तु तेन नास्ति कश्चित् क इह भवेन्निहतेषु कीचकेषु ॥ ३५ ॥

**भगवान्**—बृहन्नले ! किमेतत् ।

**बृहन्नला**—भगवन् !

न जाने तस्य जेतारं बलवाञ्छिक्षितस्तु सः ।
पितॄणां भाग्यदोषेण प्राप्नुयादपि धर्षणम् ॥ ३६ ॥

**राजा**—कथमिदानीं गृहीतः ।

**भटः**—

रथमासाद्य निःशङ्कं बाहुभ्यामवतारितः ।

---

**तुलितेति** । अद्य इदानीम् । इदं सैन्यं विराटानीकं । मया, तुलितबलं परीक्षितशक्ति । परिगणितं च सैन्यान्तर्गतवीरपुरुषगणनाद्वारेण संख्यातं च । सः अभिमन्युः । मे मया । रणे युद्धे । अद्य दृष्टः इदानीमेव पराक्रममाणः प्रत्यक्षितः । तद्दर्शनानन्तरं न बहवः क्षणा अतीताः, इयत्यत्यल्पे कालान्तरे तस्य ग्रहणमसम्भावितमित्यद्येत्यनेन द्योत्यते । तद्ग्रहणमधिकबलेन कर्तुमर्हं, विराटसैन्ये तत्समबलोऽपि नास्तीत्याह—इह तु विराटसैन्ये तु । तेन अभिन्युना । सदृशः समानबलः । कश्चित्, नास्ति । कीचकेषु निहतेषु सत्सु । इह प्रकृते सौभद्रग्रहणरूपे कार्ये । कः भवेत् अर्थात् कर्ता । कीचकस्तु नागायुतबलः कामं कर्ता भवेत्, अतीते तस्मिन् कोऽन्यस्तद्ग्रहणार्हो विराटपक्ष्योऽस्तीत्यभिप्रायः ॥ ३५ ॥

**बृहन्नले** इत्यादि । सारथिस्तद्ग्रहणकारणं जानातीति बुद्धिमूलया तज्जिज्ञासयेव प्रश्नः । किमेतदसम्भावितमभिमन्योरपि परिभवस्थानमुपनतमित्यर्जुनं प्रति स्वदुःखाविष्करणे तु निगूढमस्य वाक्यस्य तात्पर्यम् ॥

उभयाभिप्रायानुगुणमुत्तरमाह—**भगवन् ! न जाने** इत्यादि । पितॄणां पाण्डवानाम् अथचास्माकं । भाग्यदोषेण अभाग्येन नानाविधपरिभवहेतुना । धर्षणं परिभवं प्रकृतं । प्राप्नुयादपि लभेतापि । येयं धर्षणप्राप्तिर्भटेनावेदिता सा सम्भाव्यत एवेत्यभिप्रायः ॥ ३६ ॥

ग्रहणप्रकारं पृच्छति—**कथमित्यादि** ॥

**रथमित्यादि** । रथम् अभिमन्युरथम् । आसाद्य आरुह्य । बाहुभ्याम्, अवतारितः अर्थाद रथाद् बहिरानीतः ॥

**राजा** — केन।

**भटः** —

यः किलैष नरेन्द्रेण विनियुक्तो महानसे ॥ ३७ ॥

**बृहन्नला** — (अपवार्य) एवम् आर्यभीमेन परिष्वक्तः, न गृहीतः।

दूरस्था दर्शनादेव वयं सन्तोषमागताः।
पुत्रस्नेहस्तु निर्विष्टो येन सुव्यक्तकारिणा ॥ ३८ ॥

**राजा** — तेन हि सत्कृत्य प्रवेश्यतामभिमन्युः।

**भगवान्** — भो राजन्! वृष्णिपाण्डवनाथस्याभिमन्योः पूजां भयादिति लोको ज्ञास्यति। तदवधीरणमस्य न्याय्यम्।

---

केनेति पृष्ट आह—**य** इत्यादि। महानसे विनियुक्तः पाकशालायाम् अधिकारितः। तेनावतारित इत्यार्थम् ॥ ३७ ॥

**एवमि**त्यादि। एवम् अवतारणभङ्ग्या। आर्यभीमेन, परिष्वक्तः वात्सल्याद् आलिङ्गितः। न गृहीतः न केनाचिद् युद्धे जित्वा गृहीत इत्यर्थः।

**दूरस्था** इति। वयं दूरस्थाः सन्तः। दर्शनादेव पुत्रस्यावलोकनमात्रात्। सन्तोषं तृप्तिम्। आगताः प्राप्ताः, न पुनः पुत्रसंस्पर्शनसौख्यं प्राप्ता इत्यर्थः। भीमे विशेषमाह—यद्यपि चतुर्थः पादः 'येन सुव्यक्तकारिणा' इत्येव द्वयोरपि मातृकयोः पठ्यते, तथाप्यर्थसामञ्जस्याय 'तेन सुव्यक्तकारिणा' इत्येव स पठितुं युक्तः। तेन आर्यभीमेन पुनः। सुव्यक्तकारिणा सुव्यक्तं सर्वजनप्रत्यक्षम् अथवा गाढम् आलिङ्गनं कर्तुं शीलमस्येति तेन तथाभूतेन सता। पुत्रस्नेहः, निर्विष्टः फलत उपभुक्तः। स्नेहफलसर्वस्वं पुत्रस्यालिङ्गनं दर्शनेऽप्यननुभूतवन्तं धिङ् मामिति भावः ॥ ३८ ॥

**तेने**त्यादि। तेन हि तर्हि। सत्कृत्य पूजयित्वा, न पुनरनादृत्य। हस्तगतस्य हि शत्रुपक्ष्यस्यानादर औत्सर्गिकः। स त्वभिमन्युविषये न कार्य इत्यभिप्रायः ॥

**भो राजन्नि**त्यादि। वृष्णिपाण्डवनाथस्य वृष्णयो यादवाः पाण्डवाश्च नाथा यस्य तस्य तथाभूतस्य। भयादिति वृष्णिपाण्डवभयान्निमित्तात् सा कृतेति। **अवधीरणम्** अनादरणम् ॥

**राजा** — नावधीरणमर्हति यादवीपुत्रः । कुतः,

पुत्रो ह्येष युधिष्ठिरस्य तु वयस्तुल्यं हि नः सूनुना
सम्बन्धो द्रुपदेन नः कुलगतो नप्ता हि तस्माद् भवेत् ।
जामातृत्वमदूरतोऽपिच भवेत् कन्यापितृत्वं हि नः
पूजार्होऽप्यतिथिर्भवेत् स्वविभवैरिष्टा हि नः पाण्डवाः ॥ ३९ ॥

**भगवान्** — एवमेतत् । वक्तव्यं परिहर्तव्यं च ।

**राजा** — अथ केनायं प्रवेशयितव्यः ।

**भगवान्** — बृहन्नलया प्रवेशयितव्यः ।

**राजा** — बृहन्नले ! प्रवेश्यतामभिमन्युः ।

---

नावधीरणमित्यादि । यादवीपुत्रः यादव्याः यदुगोत्रापत्यभूतायाः सुभद्रायाः पुत्रः ।

अनवधीरणीयत्वे पञ्च हेतूनाह—पुत्र इत्यादि । तुशब्दो हेतुगतविशेषद्योतकः । वयः अर्थादभिमन्योः । नः सूनुना उत्तरेण । कुलगतः कुलपरम्परायातः । नप्ता दौहित्रः । द्रुपदस्य मत्कुलबन्धोर्नप्ता ममापि धर्मतो नप्तेत्यर्थः । 'नप्ता तु पौत्रदौहित्रौ' इति यादवः । भवेत् अर्थादभिमन्युः । जामातृत्वं दुहितृपतित्वम्, अर्थादभिमन्योः । अदूरतः अचिरात् । जामातृत्वसम्भावनायां हेतुमाह—हि यस्मात् । नः, कन्यापितृत्वम् । अस्तीति शेषः । अतिथिरपि अतिथिश्च । एवञ्च युधिष्ठिरपुत्रत्वं स्वपुत्रसमवयस्कत्वं धर्मनप्तृत्वं सम्भावितजामातृभावत्वं यावद्विभवपूजनीयातिथित्वमिति पञ्च हेतवोऽवधीरणप्रतिषेधस्य प्रतिपादिताः ॥ ३९ ॥

एवमित्यादि । एतत् त्वदुक्तम् । एवम् इत्थमेव । नान्यथेत्यर्थः । किमर्थं तर्हि भवता 'तदवधीरणमस्य न्याय्यम्' इति प्रागुक्तमिति चेत् तत्राह—वक्तव्यं पूर्वपक्षतया तद् वक्तुमर्हम्, अत एव मयोक्तमित्यर्थः । परिहर्तव्यं च उक्तैः कारणैः परिहर्तुं योग्यं च । असदर्थो ह्याशङ्क्य परिहृतः प्रद्विष्टतरो भवतीत्यावश्यकावेव शङ्कापरिहारावनवधीरणस्यावाभ्यामनुष्ठिताविति भावः ॥

अथेत्यादि ॥

बृहन्नलयेत्यादि । बृहन्नला हि जितकाशिनी पराजितपुरुषगुणविशेषाभिज्ञा तदनुरूपं सत्कारं विधातुं प्रभविष्यतीत्यभिप्रायः ॥

बृहदित्यादि ॥

**बृहन्नला** — यदाज्ञापयति महाराजः। (आत्मगतम्) चिरस्य खल्वाकाङ्क्षितोऽयं नियोगो लब्धः। (निष्क्रान्ता।)

**भगवान्** — (आत्मगतम्)

अद्येदानीं यातु सन्दर्शनं वा शून्ये दृष्ट्वा गाढमालिङ्गनं वा।
स्वैरं तावद् यातु मुद्बाष्पतां वा मत्प्रत्यक्षं लज्जते ह्येष पुत्रम्॥ ४० ॥

**राजा** — पश्यतु भवान् कुमारस्य कर्म।

नृपा भीष्मादयो भग्नाः सौभद्रो ग्रहणं गतः।
उत्तरेणाद्य संक्षेपादर्थतः पृथिवी जिता॥ ४१ ॥

(ततः प्रविशति भीमसेनः।)

---

यदाज्ञापयतीत्यादि। आकाङ्क्षितः प्रार्थितः। आकाङ्क्षा च 'पुत्रस्नेहस्तु निर्दिष्टः' इत्युक्त्या प्राक् सूचिता। नियोगः पुत्रप्रवेशनाधिकारः॥

अद्येति। अद्य, इदानीम् अस्मिन् स्वपुत्रप्रवेशनावधिके काले। एषः अर्जुनः। सन्दर्शनं वा, अर्थात् पुत्रस्य। यातु लभताम्। शून्ये विजने। दृष्ट्वा, गाढं निबिडम्। आलिङ्गनं वा, यातु। स्वैरं तावद् अशङ्कितमेव। मुद्बाष्पतां वा मुदा पुत्रसन्दर्शनालिङ्गनजनितेनानन्देन बाष्पः यस्य स मुद्बाष्पः इति व्यधिकरणबहुव्रीहिः, तस्य भावो मुद्बाष्पता, तां वा। यातु, इह वाशब्दाः सर्वे समुच्चयार्थाः, सन्दर्शनादीनां त्रयाणामपि लिप्सितत्वाविशेषात् सहभावसम्भवाच्च। अथाभिमन्युमिह प्रवेश्य पश्चात् तत्सन्दर्शनादिकमर्जुनोऽनुभवत्विति चेत्। तत्राह—हि यस्मात्। मत्प्रत्यक्षं मद्दर्शनगोचरे स्थितं। पुत्रम्, उद्दिश्येति शेषः। लज्जते अपत्रपते। मत्पुरतः पुत्रालिङ्गनादिकं कर्तुं लज्जावशान्नोत्सहत इति भावः। 'उद्बाष्पतां यातुं लज्जत' इति योजनं तु क्लिष्टं दुःश्लिष्टार्थं चेत्युपेक्षितम्॥ ४० ॥

पुत्रजयसन्तोषेऽभिमन्युग्रहणवार्तयोद्रिक्ते सति पुत्रं प्रशंसति—**पश्यत्वित्यादि**।

**नृपा** इत्यादि। संक्षेपाद् अबहुपरिकरबन्धात्। अर्थतः अर्थापत्तिन्यायात्, कैमुतिकन्यायादिति यावत्। भीष्मं हि सर्वपृथिवीविजयिपरशुरामजेतारं जितवतः पृथिवीजेतृत्वं कैमुतिकन्यायात् सिध्यतीति॥ ४१ ॥

गृहीतं स्वपार्श्वे रक्षतो ग्रहीतुः प्रवेशो गृहीतप्रवेशात् पूर्वं वक्तुमुचित इति **कृत्वा ग्रहीतारं प्रवेशयति—बल इत्यादि**।

**भीमसेनः**—

आदीपिते जतुगृहे स्वभुजावसक्ता मद्भ्रातरश्च जननी च मयोपनीताः ।
सौभद्रमेकमवतार्य रथात्तु बालं तं च श्रमं प्रथममद्य समं हि मन्ये ॥ ४२ ॥

इत इतः कुमारः ।

(ततः प्रविशत्यभिमन्युर्बृहन्नला च ।)

**अभिमन्युः**—भोः ! कोनुखल्वेषः,

विशालवक्षास्तनिमार्जितोदरः स्थिरोन्नतांसोरुमहान् कटीकृशः ।
इहाहृतो येन भुजैकयन्त्रितो बलाधिकेनापि न चास्मि पीडितः ॥ ४३ ॥

---

सौभद्रस्य रथादवतारणे स्वात्मनानुभूतं श्रमं निरूप्याह—**आदीपित** इति । जतुगृहे लाक्षामये गृहे दुर्योधननिर्मापिते । आदीपिते अग्निना संदीपिते सति । मया, मद्भ्रातरश्च, जननी च अस्मन्माता च । स्वभुजावसक्ताः सन्तः स्वभुजारोपिताः सन्तः । उपनीताः वाहिताः । तु तथापि, एवं मम बहुजनभारवहनसामर्थ्यसद्भावेऽपीत्यर्थः । अहम्, एकं, बालम्, इदं विशेषणद्वयं भारात्पत्वसूचनार्थम् । सौभद्रम्, अवतार्य भुजाभ्यां रथादवरोप्य । तं श्रमम् अवतारणविषयं खेदं । प्रथमं श्रमं च पूर्वानुभूतं मद्भ्रातृमातृवहनखेदं च । समं हि तुल्यमेव । मन्ये जाने । मद्भ्रात्रादिजनपञ्चकदेहसमुदाये यादृशं मयानुभूतं गौरवं, तादृशं स्वदेह एकस्मिन् गौरवं सौभद्रेणावतारणवामवृत्तिना श्वासनिरोधादिप्रभावात् समुपजनितमिति भावः ॥ ४२ ॥

**इत** इत्यादि ॥

**तत** इत्यादि । बृहन्नला सौभद्रप्रवेशनाय नियुक्तपूर्वा ॥

ग्रहीतारमुद्दिश्याह—**भो** इत्यादि । श्लोकान्वयि ।

**विशालेति** । विशालवक्षाः विपुलोरस्कः । तनिमार्जितोदरः तनिम्ना कृशत्वेन अर्जितं संस्कृतं कृतसौष्ठवम् उदरं यस्य स तथाभूतः । 'अर्ज प्रतियत्ने' इति चुरादौ धातुः । 'तनुमार्जितोदरः' इति पाठान्तरे कृशविशुद्धोदर इत्यर्थः । स्थिरोन्नतांसोरुमहान् स्थिरोन्नतांसश्च ऊरुमहान् ऊर्वोर्महांश्चेति विशेषणोभयपदकर्मधारयः । कटीकृशः कट्यां श्रोण्यां कृशः अस्थूलः । एषः पुरुषः कोनुखलु ।

**बृहन्नला** — इत इतः कुमारः ।

**अभिमन्युः** — अये अयमपरः कः,

अयुज्यमानैः प्रमदाविभूषणैः करेणुशोभाभिरिवार्पितो गजः ।
लघुश्च वेषेण महानिवौजसा विभात्युमावेषमिवाश्रितो हरः ॥ ४४ ॥

**बृहन्नला** — (अपवार्य) इममिहानयता किमिदानीमार्येण कृतम् ।

अवजित इति तावद् दूषितः पूर्वयुद्धे
दयितसुतवियुक्ता शोचनीया सुभद्रा ।
जित इति पुनरेनं रुष्यते वासुभद्रो
भवतु बहु किमुक्त्वा दूषितो हस्तसारः ॥ ४५ ॥

---

येन पुरुषेण । अस्मि अहम्, अहमर्थेऽव्ययमिदम् । भुजैकयन्त्रितः सन् भुजेनैकेन संयतः सन् । इह, आहृतः आनीतः । येन बलाधिकेनापि सता मत्पीडनक्षमेणापि सतेत्यर्थः । न पीडितश्च न व्यथितश्च । किन्तु सदयमेवाङ्गेषु स्पृष्ट इत्यर्थः ॥ ४३ ॥

**इत** इत्यादि ॥

बृहन्नलामुद्दिश्याह—**अये** इत्यादि । श्लोकान्वयि ।

**अयुज्यमानै**रिति । अयुज्यमानैः पुम्भावस्फुरणादतदर्हत्वेन भासमानैरित्यर्थः । प्रमदाविभूषणैः स्त्रीसमुचितैरलङ्कारैः । अर्पित आसादितः संयोजितो वा । अत एव करेणुशोभाभिः करेणूनां गजवधूनां शोभाभिर्भूषणैः । अर्पितः, गज इव स्थितः । वेषेण बाह्येनालङ्कारेण । लघुश्च अल्पोऽपि, चशब्दोऽप्यर्थः । ओजसा आकारसूचितेन तेजोविशेषेण निमित्तेन । महानिव स्थितः महाप्रभावत्वेन सम्भाव्यमानः । अपरः मद्गृहीतृव्यतिरिक्तः । कोऽयम् । उमावेषं पार्वतीरूपम् । आश्रितः, हर इव परमेश्वर इव । विभाति शोभते । अर्पित इति गत्यर्थकान्निवृत्तप्रेषणाद् ऋधातोर्णिजन्तात् कर्मणि क्तः । उपमयोः संसृष्टिः ॥ ४४ ॥

**इममि**त्यादि । किं कृतम् अनुचितं कृतमित्यर्थः । किंशब्दः कुत्सायाम् ।

अनुचितमेव विवृणोति—**अवजित इति** । पूर्वयुद्धे अभिमन्योरिदम्प्रथमे युद्धे इत्यर्थः । अवजित इति पराजित इति हेतोः । दूषितस्तावत् दूषणं प्रापित एव । अर्थादभिमन्युः । इदमेकमनुचितम् । द्वितीयं तदाह—सुभद्रा दयितसुत-

**भीमसेनः** — अर्जुन !

**बृहन्नला** — अथकिमथकिमर्जुनपुत्रोऽयम् ।

**भीमसेनः** — (अपवार्य)

जानाम्येतान् निग्रहादस्य दोषान् को वा पुत्रं मर्षयेच्छत्रुहस्ते ।
इष्टापत्त्या किन्तु दुःखे हि मग्ना पश्यत्वेनं द्रौपदीत्याहृतोऽयम् ॥ ४६ ॥

---

वियुक्ता दयितेन पूर्वम् इदानीं सुतेन च विरहिता सती । शोचनीया अनुशोचनार्हा । कृता । तृतीयमनुचितमाह—पुनः किञ्च । एनम् अभिमन्युम्, उद्दिश्येति शेषः । जित इति युद्धे परिभूत इति हेतोः । वासुभद्रः कृष्णः । रुष्यते कोपिष्यति, वर्तमानसामीप्यविवक्षया भविष्यति लट् । भवतु उक्तमनुचितत्रयं दूरेऽस्तु । बहु उक्त्वा किं बहुनोक्तेन किं प्रयोजनं, संक्षेपात् किञ्चिदन्यद् वच्मीत्यर्थः । तदेवाह— हस्तसारः दूषितः आत्महस्तबलमस्थानविनियोगेन कलङ्कितम् । महाबलेषु कीचकादिषु विनियोज्यस्य स्वबाहुसारस्य महिमा चापक्रीडाव्यापृतशिशुग्रहणे विनियोगेन ह्रापित इति तात्पर्यम् । इह रुष्यत इत्यात्मनेपदमार्षम् । कथञ्चित् कर्मवद्भावेन वा साध्यम् ॥ ४५ ॥

**अर्जुनेति** । आत्मगोपनं पुत्रसन्निधाने मा भूदिति बुद्ध्या भीमेनार्जुनो नामग्रहणेनाभिसंबोधितः ॥

करिष्यमाणं पुत्रवाचालनमात्मप्रकाशने सति घटयितुमशक्यमिति धियार्जुन आत्मप्रकाशनं परिजिहीर्षुरर्जुनशब्देऽभिमन्योः सम्बोधनपदत्वशङ्कानुत्पादाय समासावयवत्वमध्यारोपयन्नाह — **अथकिमित्यादि** । अर्जुनेत्येकदेशश्रवणेन 'अर्जुनपुत्रोऽयं किम्' इति प्रश्नवाक्ये वक्तृविवक्षामनुमितवत इवेदं प्रश्नानुरूपमुत्तरवाक्यमर्जुनस्य । एतेन नेदानीमात्मा प्रकाश्यतामिति स्वाभिप्रायो भीमसेनं प्रति सूचितो वेदितव्यः ॥

त्वदुद्भावितं दोषजातं जानतैव मया महते फलान्तरायाभिमन्युरिहानीत इत्याह—**जानामीति** । अस्य अभिमन्योः । निग्रहात् हठग्रहणात् । एतान् त्वदुक्तान् । दोषान् । जानामि सम्भावयामि । अनिष्टा च मे पुत्रस्य शत्रुवशत्वप्राप्तिरित्याह—**को वा, पुत्रं, शत्रुहस्ते** शत्रोः पुत्रप्रत्यर्थिनः हस्ते वशे स्थितमिति शेषः । **मर्षयेत्** सहेत । ग्रहणं हि पुत्रस्य तच्छत्रुवशप्राप्तिः पर्यवस्यति । तां कथमहं सहेयेति भावः । मदुक्तान् दोषान् जानासि, यदि च शत्रुवशप्राप्तिं पुत्रस्य न सहसे,

**बृहन्नला** —(अपवार्य) आर्य ! अभिभाषणकौतूहलं मे महत् । वाचालयत्वेनमार्यः ।

**भीमसेनः** —बाढम् । अभिमन्यो !

**अभिमन्युः** —अभिमन्युर्नाम ।

**भीमसेनः** —रुष्यत्येष मया । त्वमेवैनमभिभाषय ।

**बृहन्नला** —अभिमन्यो !

**अभिमन्युः** —कथं कथम् । अभिमन्युर्नामाहम् । भोः,

नीचैरप्यभिभाष्यन्ते नामभिः क्षत्रियान्वयाः ।
इहायं समुदाचारो ग्रहणं परिभूयते ॥ ४७ ॥

---

किमर्थमयमिहानीत इत्यत्राह—किन्तु, इष्टापत्या अपत्यवत्सला । दुःखे हि मग्ना दुःख एव केवले न्यग्भूता । द्रौपदी, एनं पुत्रं । पश्यतु, पुत्रदर्शनेन किञ्चिदाश्वसित्वित्यर्थः । इति एवं मत्वा । 'इष्टापत्त्या' इति पदम् 'अनचि च' (८-४-४७)इति तकारद्वित्वकरणेनेहापि योजयितुं शक्यम्—इष्टापत्त्या उक्तदोषेष्वनिष्टेष्वपि नान्तरीयकेष्विष्टत्वाभिमानेन, अनिष्टानामपि दोषाणामभ्युपगमेनेति यावत् । अयं पुत्रः । आहृतः आनीतः । 'आहृतो मे' इत्यपि पाठः । मे मया इति तदार्थः ॥ ४६ ॥

**आर्ये**त्यादि । वाचालयतु वाचालं करोतु परिभवावसरानुगुणं किमपि प्रलापयत्वित्यर्थः । 'वाचालो बहुगर्ह्यवाक्' इत्यमरः । वाचालशब्दात् 'तत् करोति—' इति णिच् ॥

**बाढमि**त्यादि । बाढम् अथकिम् ॥

**अभिमन्युरि**त्यादि । नामेति क्रोधे ईर्ष्यायां वा । नीचैरुत्तमस्य नामग्रहणेनाभिभाषणमनुचितमिति क्रोधः । 'हंभोः, अभिमन्युर्नाम' इति ग्रन्थान्तरे पाठः । हंभो इति क्रोधे ॥

**रुष्यती**त्यादि । मया हेतुना ॥

**अभिमन्यो** इति ॥

**कथमि**त्यादि ।

**नीचैरि**ति । नीचैरपि अधमकुलोत्पन्नैरपि । क्षत्रियान्वयाः क्षत्रियस्यान्वयो वंशो येषां ते, इति व्यधिकरणबहुव्रीहिः । क्षत्रियवंश्या इत्यर्थः । नामभिः अभिभाष्यन्ते नामनिर्देशैरभिसंबोध्यन्ते । तदिदमयुक्तमित्यामिप्रायः । इह विराटदेशे ।

**बृहन्नला** — अभिमन्यो ! सुखमास्ते ते जननी ।

**अभिमन्युः** — कथं कथम् । जननी नाम ।

किं भवान् धर्मराजो मे भीमसेनो धनञ्जयः ।
यन्मां पितृवदाक्रम्य स्त्रीगतां पृच्छसे कथाम् ॥ ४८ ॥

**बृहन्नला** — अभिमन्यो ! अपि कुशली देवकीपुत्रः केशवः ।

**अभिमन्युः** — कथं तत्रभवन्तमपि नाम्ना । अथकिम् अथकिम् । कुशली भवतः संसृष्टः ।

(उभौ परस्परमलोकयतः ।)

---

समुदाचारः सम्बोधनविषयो जनाचारसमयः । अयम् ईदृशः किम् । ग्रहणं मम शत्रुवशप्राप्तिः । ग्रहणादिति ग्रन्थान्तरे पाठः । परिभूयते अभिभूयते किम्, नामग्रहणपूर्वकमत्सम्बोधनभङ्गयावहेल्यते किमित्यर्थः । उभयत्र प्रश्नकाकुः । अयं श्लोकः पूर्वाभिमन्युवाक्यादुत्तरः पठ्यते मातृकान्तरे ॥ ४७ ॥

भूयो वाचालयितुं तथैव सम्बोधयन् पृच्छति—**अभिमन्यो** इत्यादि ॥

**कथमि**त्यादि ।

**किमि**ति । यत् यस्मात् कारणात् । मां, पितृवत् मे पितृभिस्तुल्यं यथा स्यात् तथा । आक्रम्य अवज्ञाय । स्त्रीगतां स्त्रीसम्बद्धां । कथां कुशलवार्तां । पृच्छसे पृच्छसि । तस्मात्, भवान्, किं धर्मराजः, किं भीमसेनः, किं धनञ्जयः अर्जुनः । अहो परमबान्धवैककरणीये स्त्रीकुशलवृत्तान्तप्रश्ने प्रवृत्तिसाहसं कुर्वतस्ते बुद्धिकौटिल्यमिति भावः । इह 'पृच्छसे' इत्यात्मनेपदमार्षम् । 'पृच्छसि स्त्रीगतां कथाम्' इति पाठकरणं तु पाणिनीयहृद्यम् ॥ ४८ ॥

**अभिमन्यो** इत्यादि । अपि कुशली कुशलं क्षेमं तद्वान् किम् ॥

मातुलनामग्रहणमसहमान आह—**कथमि**ति । तत्रभवन्तमपि पूजनीयमपि । अर्थान्मन्मातुलं । कथं नाम्ना, गृह्णासीति योग्यक्रियाध्याहारः । अत्यन्तवामस्तव समुदाचार इत्याशयः । प्रश्नस्याधिक्षेपगर्भमुत्तरमाह—अथकिमथकिम् । एतच्च सावज्ञाङ्गीकारे । भवतः, संसृष्टः बन्धुः । कुशली । भवदसंसृष्ट एव भवत्संसृष्टयोग्यकुशलप्रश्नादिना भवता निर्लज्जं धृष्टं च व्यवह्रियत इति द्योतनार्थमिह संसृष्टत्वारोपः ॥

**उभावि**त्यादि ॥

**अभिमन्युः** — कथमिदानीं सावज्ञमिव मां हस्यते ।

**बृहन्नला** — न खलु किञ्चित् ।

पार्थं पितरमुद्दिश्य मातुलं च जनार्दनम् ।
तरुणस्य कृतास्त्रस्य युक्तो युद्धपराजयः ॥ ४९ ॥

**अभिमन्युः** — अलं स्वच्छन्दप्रलापेन ।

अलमात्मस्तवं कर्तुं नास्माकमुचितं कुले ।
हतेषु हि शरान् पश्य नाम नान्यद् भविष्यति ॥ ५० ॥

**बृहन्नला** — (आत्मगतम्) सम्यगाह कुमारः ।

---

**कथमित्यादि** । मां हस्यते माम् उद्दिश्य परिहस्यते । अर्थाद् युवाभ्याम् ॥

**न खल्विति** । किञ्चित् किमपि हासकारणं । न खलु नास्ति किम् । इह प्रश्नकाकुः ।

कारणमाह—**पार्थमित्यादि** । अर्जुनसूनुतायाः कृष्णभागिनेयतायास्तरुणधानुष्कतायाश्च त्वयि विद्यमानाया युद्धजये तवानुरूपे य इदानीं युद्धपराजयस्तवोपनतः, सोऽयुक्त इति कृत्वा त्वामुपहसाव इति श्लोकाभिप्रायः । युक्त इत्यत्र प्रश्नकाकुः ॥ ४९ ॥

अर्जुनसूनुत्वाद्यनुरूपो विक्रमो युद्धे दर्शित इति सप्रश्रयमाह — **अलमिति** । आत्मस्तवं कर्तुम् अलम् आत्मप्रशंसाकरणं मास्त्वित्यर्थः । मत्पराक्रमप्रकारो यदि कथयितुमारभ्यते, तर्ह्यात्मस्तवः प्रसज्येत; अतस्तत्प्रकारं वक्तुं नेच्छामीत्यभिप्रायः । अस्माकं, कुले, नोचितं न परिचितम् । आत्मस्तवं कर्तुमितीहापि सम्बध्यते । आत्मस्तवं कर्तुमस्मत्कुलीनानां परिचयो नास्तीत्यर्थः । कथं तर्हि मत्पराक्रमप्रकारो ज्ञातव्य इति चेदाह — हतेषु हि युद्धमृतेषु सैन्येषु हि । शरान् तदङ्गलग्नान् बाणान् । पश्य अवलोकय । नाम नामधेयम् अर्थाद् बाणगतम् । अन्यद् मन्नामधेयातिरिक्तं । न भविष्यति मन्नामधेयमेव तेषु बाणेषु दृष्टं भविष्यतीत्यर्थः । तेन युद्धहताङ्गलग्नमद्बाणगणनया मत्पराक्रमप्रकारं स्वयमनुमिमीष्वेत्यभिप्रायः । इह निषेधार्थकालंशब्दयोगे तुमुन्प्रयोग आर्षः । 'स्वयमात्मस्तवम्' इति ग्रन्थान्तरे पाठः । तथा श्लोकात् प्राग् 'अलं स्वच्छन्दप्रलापेन' इत्यधिकः पाठः ॥ ५० ॥

**सम्यगित्यादि** ।

सरथतुरगदृसनागयौधे शरनिपुणेन न कश्चिदप्यविद्धः ।
अहमपि च परिक्षतो भवेयं यदि न मया परिवर्तितो रथः स्यात् ॥ ५१ ॥

(प्रकाशम्) एवं वाक्यशौ(डी?ण्डी)र्यम् । किमर्थं तेन पदातिना गृहीतः ।

**अभिमन्युः** —

अशस्त्रो मामभिगतस्ततोऽस्मि ग्रहणं गतः ।
न्यस्तशस्त्रं हि को हन्यादर्जुनं पितरं स्मरन् ॥ ५२ ॥

**भीमसेनः** — (आत्मगतम्)

धन्यः खल्वर्जुनो येन प्रत्यक्षमुभयं श्रुतम् ।
पुत्रस्य च पितुः श्लाघ्यं संग्रामेषु पराक्रमः ॥ ५३ ॥

---

**सरथेति** । सरथतुरगदृसनागयौधे रथैस्तुरगैः दृसनागैर्यौधैश्च सहिते । अर्थाद् युद्धे युद्धरङ्गे वा । शरनिपुणेन बाणसन्धानकुशलेन । अर्थात् कुमारेण । कश्चिदपि रथादिष्वन्यतमोऽपि । अविद्धः अपरिक्षतः । न, किन्तु सर्व एव रथादयो विद्धा इत्यर्थः । मया, रथः, परिवर्तितः निवर्तितः । न स्याद् यदि नाभविष्यच्चेत् । अहमपि च, परिक्षतः अर्थाच्छरनिपुणेन । भवेयम् अभविष्यम् ॥ ५१ ॥

**एवमित्यादि** । वाक्यशौण्डीर्यं वाक्ये वचसि शौण्डीर्यं गर्वः । टवर्गपञ्चमरहितमेवेदं मातृकयोः पठ्यते । एवम् ईदृशम् । क्रिया तु कुतोऽन्यथैव दृष्टेति पृच्छति—किमर्थमित्यादि । गृहीतः अर्थात् त्वम् ॥

**अशस्त्र** इति । अशस्त्रः शस्त्ररहितः सन् । माम्, अभिगतः, अर्थात् स पदातिः । ततः तेन हेतुना । ग्रहणं, गतः प्राप्तः । अस्मि । अशस्त्रोऽपि द्रोग्धुमागतः कस्माच्छस्त्रपण्डितेन भवता शस्त्रैर्न वारित इत्यत्राह—को हि कः पुमान् । तत्रापि विशेषमाह—अर्जुनं, पितरं, स्मरन् चिन्तयन् सन् । न्यस्तशस्त्रं निरायुधम् । हन्यात् । पुरुषो हि सामान्योऽपि युद्धधर्ममनुसरन् न्यस्तशस्त्रं शस्त्रेण प्रहर्तुं नार्हति, किमुत धर्मयोधिधनुर्धरमूर्धन्यस्यार्जुनस्यात्मज इति भावः ॥ ५२ ॥

**धन्य इति** । येन, पुत्रस्य अभिमन्योः । संग्रामेषु युद्धेषु । पराक्रमः, पितुः आत्मनः । संग्रामेषु पराक्रमश्च, श्लाघ्यं श्लाघार्हम् । उभयम् उभयगतं पराक्रमद्वयमित्यर्थः । प्रत्यक्षं साक्षात् । श्रुतम् आकर्णितम् । इदानीं पुत्रमुखादित्यार्थम् । सः अर्जुनः । धन्यः खलु कृतार्थ एव ॥ ५३ ॥

**राजा** — त्वर्यतां त्वर्यतामभिमन्युः ।

**बृहन्नला** — इत इतः कुमारः । एष महाराजः । उपसर्पतु कुमारः ।

**अभिमन्युः** — आः कस्य महाराजः ।

**बृहन्नला** — न, न, न । ब्राह्मणेन सहास्ते ।

**अभिमन्युः** — ब्राह्मणेनेति । (उपगम्य) भगवन्! अभिवादये ।

**भगवान्** — एह्येहि वत्स !

शौण्डीर्यं धृतिविनयं दयां स्वपक्षे माधुर्यं धनुषि जयं पराक्रमं च ।
एकस्मिन् पितरि गुणानवाप्नुहि त्वं शेषाणां यदपि च रोचते चतुर्णाम् ॥

**अभिमन्युः** — अनुगृहीतोऽस्मि ।

---

**त्वर्यतामि**त्यादि। त्वर्यतां त्वरितमानीयतामित्यर्थः ॥

**इत** इत्यादि ॥

**आ** इत्यादि । आः कोपे ॥

**नेत्या**दि । क्रोधाविष्करणस्य त्रिः प्रतिषेधः नननेति । ब्राह्मणेन ब्रह्मविदा संन्यासिनेत्यर्थः । सह, आस्ते, अर्थान्महाराजः । ब्राह्मणसन्निधौ विनीतेन व्यवहर्तव्यमित्यभिप्रायः ॥

**ब्राह्मणेने**तीत्यादि । ब्राह्मणेनेति आहेति शेषः । अतो मया विनीतेन वर्तितव्यमित्याशयः ॥

**एही**त्यादि ।

**शौण्डीर्यमि**ति । त्वं, शौण्डीर्यं शौण्डीरो वीरस्तस्य भावं शौण्डीर्यम् । धृतिविनयं धृतिर्धैर्यं, विनयः प्रश्रयः तयोः समाहारम् । स्वपक्षे स्वजने । दयां, माधुर्यं प्रियभाषित्वम् । धनुषि धनुर्व्यापारे । जयं, पराक्रमं च तेजश्च । एकस्मिन् पितरि गुणान् एकस्मिन् जनकेऽर्जुने विद्यमानान् इमान् गुणान् । अवाप्नुहि लभस्व । शेषाणाम् अन्येषां । चतुर्णाम् अर्थात् पितॄणां । यदपिच, शेषपितृसम्बन्धि यच्च सद्गुणरूपं वस्त्वित्यर्थः । रोचते शोभते, अनुकार्यत्वेन तुभ्यं स्वदते वा । तच्चावाप्नुहीति तत्पदाध्याहारेण सम्बन्धः ॥ ५४ ॥

**अन्वि**त्यादि ॥

**राजा** — एह्येहि पुत्र! । कथं न मामभिवादयसि । अहो उत्सिक्तः खल्वयं क्षत्रियकुमारः । भवतु, अहमस्य दर्पप्रशमनं करोमि । अथ केनायं गृहीतः ।

**भीमसेनः** — महाराज! मया ।

**अभिमन्युः** — अशस्त्रेणेत्यभिधीयताम् ।

**भीमसेनः** — शान्तं शान्तं पापम् ।

सहजौ मे प्रहरणं भुजौ पीनांसकोमलौ ।
तावाश्रित्य प्रयुध्येयं दुर्बलैर्गृह्यते धनुः ॥ ५५ ॥

**अभिमन्युः** — मा तावद् भोः,

बाहुरक्षौहिणी यस्य निर्व्याजो यस्य विक्रमः ।
किं भवान् मध्यमस्तातस्तस्यैतत् सदृशं वचः ॥ ५६ ॥

**भगवान्** — पुत्र! कोऽयं मध्यमो नाम ।

---

एह्रीत्यादि । उत्सिक्तः गर्वितः । अथशब्दः प्रश्ने ॥

**महाराजेत्यादि** ॥

**अशस्त्रेणेत्यादि** । अशस्त्रेण न्यस्तशस्त्रेण । सशस्त्रेण त्वहं शस्त्रकर्मनिपुणतमो न केनापि ग्रहीतुं शक्य इति विराटं बोधयितुमिदमुक्तम् ॥

शस्त्रग्रहणवार्तैव तावद् दुर्बलविषयत्वान्मादृशमहाबलपुरुषश्रवणानर्हेत्यभिप्रायेणाह — **शान्तमित्यादि** । पापं दुर्बलोचितवाक्यश्रवणसमुत्थं दुरितं, शान्तं, भवत्विति शेषः । अथवा अशस्त्रेणेति वाक्यमेव दुर्बलविषयत्वेन दुष्टत्वात् पापमित्युच्यते । तत् पापवाक्यं शान्तं विरतं भवतु । भूयस्तन्मा वादीरित्यभिप्रायः ।

**सहजावित्यादि** । भुजौ, प्रहरणम् आयुधं । वेदाः प्रमाणमितिवदेकत्वं विधेये बोद्धव्यम् । प्रहरणाविति ग्रन्थान्तरे पाठः । स तु लिङ्गविरोधादुपेक्ष्यः ॥ ५५ ॥

**मा तावदिति** भीमोक्तशूरवादप्रतिषेधः ।

**बाहुरित्यादि** । अक्षौहिणी सेनापरिमाणविशेषः* । बाहोरक्षौहिणीत्वरूपणं तत्कार्यकारित्वप्रतिपत्त्यर्थम् । मध्यमस्तात इत्यत्र स इत्याक्षेपलभ्यम् । तस्य मध्यमतातस्य । इदं वचः 'सहजौ मे' इत्यादिः शूरवादः ॥ ५६ ॥

**पुत्रेत्यादि** ॥

---

* एकेभैकरथत्र्यश्वपञ्चपदातिकसैन्यरूपाः २१८७० पत्तयः ।

**अभिमन्युः** — श्रूयताम् । अथवा, नन्वनुत्तरा वयं ब्राह्मणेषु, साध्वन्यो ब्रूयात् ।

**राजा** — भवतु भवतु मद्वचनात् । पुत्र ! कोऽयं मध्यमो नाम ।

**अभिमन्युः** — श्रूयताम् । येन,

योक्त्रयित्वा जरासन्धं कण्ठश्लिष्टेन बाहुना ।
असह्यकर्म तत् कृत्वा नीतः कृष्णोऽतदर्हताम् ।। ५७ ।।

**राजा** —

न ते क्षेपेण रुष्यामि रुष्यता भवता रमे ।
किमुक्त्वा नापराद्धोऽहं कथं तिष्ठति यात्विति ।। ५८ ।।

---

श्रूयतामित्यादि । श्रूयतां भवत्प्रश्नस्योत्तरमिति शेषः । विवक्षितस्योत्तरस्योद्धतार्थताम्, अत एव ब्राह्मणसन्निधावनुपन्यसनीयतां चाभिसमीक्ष्याह—अथवेत्यादि । अनुत्तराः न विद्यते उत्तरं प्रतिवचनं प्रतिवचनमात्रस्यावर्जनीयतया सामर्थ्यादुद्धतार्थकं प्रतिवचनमिह गृह्यते, तन्न विद्यते येषां ते अनुत्तराः । साध्वन्यो ब्रूयात् अन्यो यदि वदेत्, तत् समीचीनं स्यादित्यर्थः ॥

भवत्वित्यादि ॥

श्रूयतामिति । येनेति श्लोकान्वयि ।

**योक्त्रयित्वेति** । येन कर्त्रा । जरासन्धं बार्हद्रथं राजविशेषं । **कण्ठश्लिष्टेन** तत्कण्ठसंसक्तेन बाहुना स्वभुजेन । योक्त्रयित्वा योक्त्रवन्तं कृत्वा योक्त्रं वृषभस्कन्धयुगयोजनसाधनभूता रज्जुः । भुजेनैव योक्त्रस्थानीयेन बद्ध्वेत्यर्थः । तुलयित्वेति पाठान्तरम् । असह्यम् असहनीयं । तत् कर्म जरासन्धवधरूपं । कृत्वा, कृष्णः, अतदर्हतां जरासन्धवधानर्हत्वं । नीतः प्रापितः । कृष्णो हि बहुकृत्वः प्रागात्मना कृताभियोगं जरासन्धं स्वयं हन्तुमर्हतीति जरासन्धवधः कृष्णस्य भागधेयं; तद् येन शूरेणात्मसात्कृतं, स मे मध्यमस्तात इति भावः ॥ ५७ ॥

**नेति** । ते क्षेपेण त्वत्कृतयास्मन्निन्दया । न रुष्यामि । रुष्यता कुप्यता भवता हेतुना । अहं, रमे प्रीये । प्रीतिकार्यमाह—कथं तिष्ठति, अर्थात् क्षेपरोधाभ्यामस्मास्वपराधी भवान् । यातु अस्मदन्तिकादपसरतु । इति एवम् । उक्त्वा, अहं, किं नापराद्धः 'कथं तिष्ठती'त्यादिवचनरूपमपराधं कृतो न कृतवान् अपि

**राजा** — एह्येहि पुत्र! । कथं न मामभिवादयसि । अहो उत्सिक्तः खल्वयं क्षत्रियकुमारः । भवतु, अहमस्य दर्पप्रशमनं करोमि । अथ केनायं गृहीतः ।

**भीमसेनः** — महाराज! मया ।

**अभिमन्युः** — अशस्त्रेणेत्यभिधीयताम् ।

**भीमसेनः** — शान्तं शान्तं पापम् ।

सहजौ मे प्रहरणं भुजौ पीनांसकोमलौ ।
तावाश्रित्य प्रयुध्येयं दुर्बलैर्गृह्यते धनुः ॥ ५५ ॥

**अभिमन्युः** — मा तावद् भोः,

बाहुरक्षौहिणी यस्य निर्व्याजो यस्य विक्रमः ।
किं भवान् मध्यमस्तातस्तस्यैतत् सदृशं वचः ॥ ५६ ॥

**भगवान्** — पुत्र! कोऽयं मध्यमो नाम ।

---

एह्येहीत्यादि । उत्सिक्तः गर्वितः । अथशब्दः प्रश्ने ॥

**महाराजेत्यादि** ॥

**अशस्त्रेणेत्यादि** । अशस्त्रेण न्यस्तशस्त्रेण । सशस्त्रेण त्वहं शस्त्रकर्मनिपुणतमो न केनापि ग्रहीतुं शक्य इति विराटं बोधयितुमिदमुक्तम् ॥

शस्त्रग्रहणवार्तैव तावद् दुर्बलविषयत्वान्मादृशमहाबलपुरुषश्रवणानर्हेत्यभिप्रायेणाह — **शान्तमित्यादि** । पापं दुर्बलोचितवाक्यश्रवणसमुत्थं दुरितं, शान्तं, भवत्विति शेषः । अथवा अशस्त्रेणेति वाक्यमेव दुर्बलविषयत्वेन दुष्टत्वात् पापमित्युच्यते । तत् पापवाक्यं शान्तं विरतं भवतु । भूयस्तन्मा वादीरित्यभिप्रायः ।

**सहजावित्यादि** । भुजौ, प्रहरणम् आयुधं । वेदाः प्रमाणमितिवदेकत्वं विधेये बोद्धव्यम् । प्रहरणाविति ग्रन्थान्तरे पाठः । स तु लिङ्गविरोधादुपेक्ष्यः ॥ ५५ ॥

**मा तावदिति** भीमोक्तशूरवादप्रतिषेधः ।

**बाहुरित्यादि** । अक्षौहिणी सेनापरिमाणविशेषः* । बाहोरक्षौहिणीत्वरूपणं तत्कार्यकारित्वप्रतिपत्त्यर्थम् । मध्यमस्तात इत्यत्र स इत्याक्षेपलभ्यम् । तस्य मध्यमतातस्य । इदं वचः 'सहजौ मे' इत्यादिः शूरवादः ॥ ५६ ॥

**पुत्रेत्यादि** ॥

---

* एकैकरथत्र्यश्वपञ्चपदातिकसैन्यरूपाः २१८७० पत्तयः ।

**अभिमन्युः** — श्रूयताम् । अथवा, नन्वनुत्तरा वयं ब्राह्मणेषु, साध्वन्यो ब्रूयात् ।

**राजा** — भवतु भवतु मद्वचनात् । पुत्र! कोऽयं मध्यमो नाम ।

**अभिमन्युः** — श्रूयताम् । येन,

योक्त्रयित्वा जरासन्धं कण्ठश्लिष्टेन बाहुना ।
असह्यकर्म तत् कृत्वा नीतः कृष्णोऽतदर्हताम् ॥ ५७ ॥

**राजा** —

न ते क्षेपेण रुष्यामि रुष्यता भवता रमे ।
किमुक्त्वा नापराद्धोऽहं कथं तिष्ठति यात्विति ॥ ५८ ॥

---

श्रूयतामित्यादि । श्रूयतां भवत्प्रश्नस्योत्तरमिति शेषः । विवक्षितस्योत्तरस्योद्धतार्थताम्, अत एव ब्राह्मणसन्निधावनुपन्यसनीयतां चाभिसमीक्ष्याह—अथवेत्यादि । अनुत्तराः न विद्यते उत्तरं प्रतिवचनं प्रतिवचनमात्रस्यावर्जनीयतया सामर्थ्यादुद्धतार्थकं प्रतिवचनमिह गृह्यते, तन्न विद्यते येषां ते अनुत्तराः । साध्वन्यो ब्रूयात् अन्यो यदि वदेत्, तत् समीचीनं स्यादित्यर्थः ॥

**भवत्वित्यादि** ॥

**श्रूयतामिति** । येनेति श्लोकान्वयि ।

**योक्त्रयित्वेति** । येन कर्त्रा । जरासन्धं बार्हद्रथं राजविशेषं । **कण्ठश्लिष्टेन** तत्कण्ठसंसक्तेन बाहुना स्वभुजेन । योक्त्रयित्वा योक्त्रवन्तं कृत्वा योक्त्रं वृषभस्कन्धयुगयोजनसाधनभूता रज्जुः । भुजेनैव योक्त्रस्थानीयेन बद्ध्वेत्यर्थः । तुलयित्वेति पाठान्तरम् । असह्यम् असहनीयं । तत् कर्म जरासन्धवधरूपं । कृत्वा, कृष्णः, अतदर्हतां जरासन्धवधानर्हत्वं । नीतः प्रापितः । कृष्णो हि बहुकृत्वः प्रागात्मना कृताभियोगं जरासन्धं स्वयं हन्तुमर्हतीति जरासन्धवधः कृष्णस्य भागधेयं; तद् येन शूरेणात्मसात्कृतं, स मे मध्यमस्तात इति भावः ॥ ५७ ॥

**नेति** । ते क्षेपेण त्वत्कृतयास्मन्निन्दया । न रुष्यामि । रुष्यता कुप्यता भवता हेतुना । अहं, रमे प्रीये । प्रीतिकार्यमाह—कथं तिष्ठति, अर्थात् क्षेपरोधाभ्यामस्मास्वपराधी भवान् । यातु अस्मदन्तिकादपसरतु । इति एवम् । उक्त्वा, अहं, किं नापराद्धः 'कथं तिष्ठती'त्यादिवचनरूपमपराधं कुतो न कृतवान् स्वयि-

**अभिमन्युः** — यद्यहमनुग्राह्यः,

पादयोः समुदाचारः क्रियतां निग्रहोचितः ।
बाहुभ्यामाहृतं भीमो बाहुभ्यामेव नेष्यति ॥ ५९ ॥

(ततः प्रविशत्युत्तरः ।)

**उत्तरः** —

मिथ्याप्रशंसा खलु नाम कष्टा येषां तु मिथ्यावचनेषु भक्तिः ।
अहं हि युद्धाश्रयमुच्यमानो वाचानुवर्ती हृदयेन लज्जे ॥ ६० ॥

---

ष्यप्रीतिवशादेव न कृतवानित्यभिप्रायः । अथवा किमुक्त्वेत्यत्र भवेयमिति शेषः । इत्युक्त्वा अहमपराद्धः किं न भवेयमिति योज्यम् । इति यद्यहं ब्रूयां तर्हि त्वय्यपराधी भवेयमेवेति भावः ॥ ५८ ॥

विराटप्रीतेरात्ममोचने आत्मपक्ष्यैककरणीये पर्यवसानमात्मलाघवावहत्वान्मा भूदिति बुद्ध्या स्वीयलोकोत्तरधीरभावसदृशमाह—**यदी**त्यादि ।

**पादयोरि**ति । निग्रहोचितः मद्ग्रहणानुरूपः । पादयोः, समुदाचारः निगलबन्धनरूपः । क्रियतां न पुनर्मयि प्रीतिमता भवता मत्पादसमुदाचारः परिह्रियतां मन्मोचनं वा क्रियतामित्यभिप्रायः । कथं तर्हि मोचनं तव भविष्यतीत्यत्राह—भीमः, बाहुभ्याम्, आहृतम् आनीतम् । अर्थान्माम् , बाहुभ्यामेव नेष्यति । स एव भवत्कृतस्य मद्विप्रकारस्य सदृशप्रतीकारशक्तो निष्क्रयं करिष्यतीति नापेक्षणीया मे भवत्प्रीतिरिति भावः ॥ ५९ ॥

इत्थमभिमन्युवाचालने तद्गतशौर्यविनयपितृभक्तिचित्तसमुन्नतिधैर्यादिगुणप्रकाशनसुभगे युधिष्ठिराद्यानन्ददायिनि वर्तमाने उत्तरं प्रवेशयति—**तत** इत्यादि । पूर्वप्रक्रान्तयोधपुरुषपूजावसाने बृहन्नलाजयवृत्तान्ततत्त्वं पित्रे निवेदयितुकामस्येदं पितृपार्श्वागमनमुत्तरस्य ।

**मिथ्येति** । येषां तु, मिथ्यावचनेषु मिथ्यावादभूयिष्ठत्वात् स्तुतय इह मिथ्यावचनशब्देन लक्ष्यन्ते, स्तुतिष्वित्यर्थः । भक्तिः परमादरः, अर्थात् स्तुतिपठनविषयः । तेषामित्याक्षेपलभ्यं, तेषां वन्दिनामित्यर्थः । मिथ्याप्रशंसा तत्कर्तृका असत्यार्थविषया श्लाघा । कष्टा खलु नाम दुःखकारिण्येव । इममर्थं प्रकृतविशेषेण समर्थयते—**हि** तथाहि । युद्धाश्रयं युद्धसम्बद्धम् । उच्यमानः 'अहो तव प्रतापः,

(उपसृत्य) भगवन्! अभिवादये ।

**भगवान्** — स्वस्ति ।

**उत्तरः** — तात! अभिवादये ।

**राजा** — एह्येहि पुत्र! आयुष्मान् भव । पुत्र! पूजिताः कृतकर्माणो योधपुरुषाः ।

**उत्तरः** — पूजिताः । पूज्यतमस्य क्रियतां पूजा ।

**राजा** — पुत्र! कस्मै ।

**उत्तरः** — इहात्रभवते धनञ्जयाय ।

**राजा** — कथं धनञ्जयायेति ।

---

येन कौरवान् जितवानसि' इत्यादिरीत्या वन्दिभिः स्तूयमान इत्यर्थः । अहं, वाचानुवर्ती सन् वाङ्मात्रेण तद्वचनमङ्गीकुर्वन् सन् । हृदयेन मनसा, लज्जे लज्जानिमित्तां व्यथामनुभवामीत्यर्थः । लज्जीति पाठे लज्जाशब्दान्मत्वर्थीय इनिप्रत्ययः । लज्जाकरं हि वन्दिक्रियमाणमात्ममिथ्याश्लाघनम् 'अर्जुन एव कौरवविजयी, न त्वहम्' इति भूतार्थाख्यानेन प्रतिषेद्धुमिच्छतापि मयार्जुनवृत्तान्तरहस्यानुद्भेदाय तदेतदगत्याङ्गीकर्तव्यमेव वर्तते । किं करोमीति भावः ॥ ६० ॥

**भगवन्नित्यादि** ॥

**स्वस्तीति** ॥

**तातेत्यादि** ॥

**एह्येहीत्यादि** । पूजिता इत्यत्र काकुः, किं पारितोषिकदानेन बहुमानिता इत्यर्थः ॥

**पूजिता इत्यादि** । क्रियताम् अर्थात् तातेनैव ॥

**पुत्रेत्यादि** ॥

अज्ञातवासस्य निस्तीर्णत्वात् स्वपितरि अर्जुनतत्त्वावेदनमिदानीं प्राप्तकालमिति मत्वाह — **इहेत्यादि** । इहेत्यर्जुनाधिष्ठितस्थलनिर्देशः । वर्तमानायेति शेषः ॥

**कथमिति** । धनञ्जयायेति कथं ब्रवीषीति शेषः । धनञ्जयस्यात्र कः प्रसङ्ग इत्यभिप्रायः ॥

**उत्तरः** — अथकिम् । अत्रभवता,

श्मशानाद्धनुरादाय तूणी चाक्षयसायके ।
नृपा भीष्मादयो भग्ना वयं च परिरक्षिताः ॥ ६१ ॥

**राजा** — एवमेतत् ।

**बृहन्नला** — प्रसीदतु प्रसीदतु महाराजः ।

अयं बाल्यात्तु सम्भ्रान्तो न वेत्ति प्रहरन्नपि ।
कृत्स्नं कर्म स्वयं कृत्वा परस्येत्यवगच्छति ॥ ६२ ॥

**उत्तरः** — व्यपनयतु भवाञ्छङ्काम् । इदमाख्यास्यते,

---

**अथकिमिति** । धनञ्जयायैव, अत्रान्यथाशङ्कां मा कृथा इति भावः । अत्रभवतेति श्लोकान्वयि ।

**श्मशानादित्यादि** । तूणी तूण्यौ ॥ ६१ ॥

**एवमिति** । एतद् एवम् युद्धवृत्तमीदृशं, मया त्वन्यथेति भ्रान्तमित्यर्थः ॥

**प्रसीदत्वित्यादि** । प्रसीदतु मद्वक्ष्यमाणप्रकारेण युद्धवृत्तमवगन्तुमित्यार्थम् ।

**अयमिति** । बाल्यात्, सम्भ्रान्तः अतिव्यग्रः । अयं तु उत्तरस्तु । प्रहरन्नपि परान् निघ्नन्नपि सन् । न वेत्ति प्रहरन्तमात्मानं नाबुध्यतेत्यर्थः । अत एव, कृत्स्नं समस्तं । कर्म युद्धवृत्तं । स्वयं कृत्वा, परस्येति तत् कृत्स्नं कर्म परसम्बन्धीति । अवगच्छति जानाति । रणसमये सम्भ्रमावेशवशादात्मानं विस्मृत्य दर्शितपराक्रमस्यास्य स्वकृतेऽपि शत्रुविजये मत्कृतत्वभ्रमो जात इति भावः । सोऽयमभूतार्थ आत्मगोपनानुगुणः । भूतार्थोऽपि त्विह गर्भितः । तद्यथा — अयं प्रहरन्नपि प्रहर्तुं योद्धुं यतमानोऽपि । युद्धरङ्गसन्निधानमिह यत्नः । बाल्याद् युद्धाप्रागल्भ्यात् । सम्भ्रान्तः त्रस्तः सन् । न वेत्ति नाबुध्यत, अर्थाद् इतिकर्तव्यताम् । अत एव स्वयं, कृत्स्नं कर्म धार्तराष्ट्रविद्रावणान्तं सर्वं युद्धव्यापारं । परस्य कृत्वा, स्वस्य तन्निर्वहणाशक्तत्वाद् अन्यस्य मम सम्बन्धिनं कृत्वा मन्निर्व्यूढत्वेन मदधीनं कृत्वेति यावत् । इति एवं 'नृपा भीष्मादयो भग्नाः'(श्लो.६१)इत्युक्तप्रकारेणेत्यर्थः । अवगच्छति जानाति । मत्कृतं कृतज्ञत्वान्नापलपतीत्यभिप्रायः ॥ ६२ ॥

**व्यपनयत्वित्यादि** । व्यपनयतु तत्त्वाख्यानेनापनुदतु । किमर्थमिदानीमप्यात्मस्वरूपमवच्छाद्यत इति भावः । इदमित्यादि श्लोकान्वयि ।

प्रकोष्ठान्तरसंगूढं गाण्डीवज्याहतं किणम् ।
यत्तद् द्वादशवर्षान्ते नैव याति सवर्णताम् ॥ ६३ ॥

बृहन्नला —

एतन्मे पारिहार्याणां व्यावर्तनकृतं किणम् ।
सन्निरोधविवर्णत्वाद् गोधास्थानमिहागतम् ॥ ६४ ॥

राजा — पश्यामस्तावत् ।

बृहन्नला —

---

प्रकोष्ठेति । प्रकोष्ठान्तरसंगूढं प्रकोष्ठान्तरे मणिबन्धावकाशे संगूढं । गाण्डीवज्याहतं गाण्डीवज्यया गाण्डीवाख्यधनुर्मौर्व्या आहतम् आघातेनोत्पादितमित्यर्थः । एतेन ज्याघातस्थानस्थितत्वं किणस्योक्तम् । इदं प्रत्यक्षदृश्यं । किणं रूढव्रणपदम् । आख्यास्यते कथयिष्यति, अर्थाद् भवत्तत्त्वम् । किणं विशिनष्टि—यत्तत् पूर्वप्रसिद्धं यत् किणं । द्वादशवर्षान्ते इह द्वादशवर्षशब्दो ज्याघातविश्रान्तिकालबाहुल्योपलक्षणार्थः । द्वादशवर्षाणाम् अन्ते, विश्रान्तज्याव्यापाराणां बहूनां वर्षाणाम् अतिक्रमेऽपीत्यर्थः । सवर्णतां देहतुल्यवर्णतां प्रकोष्ठतुल्यवर्णतां वा । न याति न प्राप्नोति । एतेन किणस्यात्युल्बणत्वमनपलपनीयत्वनिमित्तमुक्तम् । अनुल्बणो हि अङ्गे किणः स्वल्पेन कालेन स्वगतं वैवर्ण्यं हित्वा देहसावर्ण्यं प्राप्नोति, उल्बणस्तु विवर्ण एवातिचिरमवतिष्ठते । किणशब्दस्य क्लीबत्वमत एव प्रयोगात् ॥ ६३ ॥

किणस्यान्यथासिद्धिमाह—एतदिति । इह हस्ते । मे, पारिहार्याणां वलयानां । सन्निरोधविवर्णत्वात् सन्निरोधेन सम्यङ्निरोधेन विवर्णत्वात् विवर्णत्वमासाद्य । ल्यब्लोपे पञ्चमी । गोधास्थानं गोधाया ज्याघातवारणस्य स्थानं प्रकोष्ठदेशमित्यर्थः । आगतं प्राप्तम् । एतत् किणम् । पारिहार्याणां, व्यावर्तनकृतं व्यावर्तनेन विविधपरिवर्तनेन कृतं जनितम् । गोधास्थानगतोऽयं किणः पारिहार्यव्यावर्तनजनितः पारिहार्यसन्निरोधजनितवैवर्ण्यश्चेति भावः । वलयव्यावर्तनकृतोऽपि किणः ज्याघातकिणेन सह हस्ते वस्तुतोऽस्त्येवेति तदाश्रयमिदमर्जुनवचनं नासत्यमिति बोद्धव्यम् । 'आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम्' इत्यमरः ॥ ६४ ॥

पश्याम इति । तावद् आदौ । पश्यामः परीक्षामहे अर्थात् किणम् । पश्चात्तु तस्य कारणं निश्चिनुम इत्याशयः ॥

रुद्रबाणावलीढाङ्गो यद्यहं भारतोऽर्जुनः ।

सुव्यक्तं भीमसेनोऽयमयं राजा युधिष्ठिरः ॥ ६५ ॥

**राजा** — भो धर्मराज ! वृकोदर ! धनञ्जय ! कथं न मां विश्वसिथ । भवतु भवतु प्राप्तकाले । बृहन्नले ! प्रविश त्वमभ्यन्तरम् ।

**बृहन्नला** — यदाज्ञापयति महाराजः ।

**भगवान्** — अर्जुन ! नखलु नखलु प्रवेष्टव्यम् । तीर्णप्रतिज्ञा वयम् ।

**अर्जुनः** — यदाज्ञापयत्यार्यः ।

**राजा** —

---

तत्त्वस्य परीक्षणप्रसङ्गे गोपनमशक्यमंचमत्कारि चेति मत्वात्मनोऽर्जुनत्वं सिद्धाभ्युपगमभङ्ग्यानुवदन् भ्रातरावपि तत्त्वतः प्रकाशयति—**रुद्रे**त्यादि । रुद्रबाणावलीढाङ्गः परमेश्वरशरस्पृष्टगात्रः । पुरा पाशुपतास्त्रलिप्सया तपस्यतोऽर्जुनस्य किरातवेषेण भगवता सह युद्धमासीदिति कथात्रानुसन्धेया । सुव्यक्तमित्यस्य स्थाने अव्यक्तमिति ग्रन्थान्तरेऽपपाठः ॥ ६५ ॥

**भो** इत्यादि । न विश्वसिथ आत्मगोपनं ह्यविश्वासकार्यमिति भावः । अज्ञातवासस्यानिस्तीर्णत्वशङ्कयाह—प्राप्तकाले योग्ये काले अज्ञातवासनिस्तारोत्तरकाले । भवतु भवतु, अर्थाद् धर्मराजेत्यादिव्यवहारः । अभ्यन्तरम् अन्तःपुरम् ॥

**यदि**त्यादि । अज्ञातवासस्यानिस्तीर्णत्वशङ्कार्येणैव प्रमाणभूतेन निरस्यतामित्यर्जुनस्याभिप्रायः । मातृकान्तरे 'प्राप्तकाले' इत्येतदनन्तरम् एवं पाठो दृश्यते — 'भगवान् — बृहन्नले! प्रविश त्वमभ्यन्तरम् । बृहन्नला — यदाज्ञापयति भगवान् । ' इति । एष तु न समीचीनः ॥

**अर्जुने**त्यादि । तीर्णप्रतिज्ञाः तीर्णा सम्यगनुष्ठानेन पारं नीता प्रतिज्ञा अज्ञातवाससंविद् यैस्ते तथाभूताः । अतोऽस्माकमात्मप्रकाशनं प्राप्तकालमेवेति भावः । प्रवेष्टव्यमित्यस्य स्थाने 'गन्तव्यम्' इति मातृकान्तरे पठ्यते; वयमित्यस्य स्थाने 'स्मः' इति च ॥

**यदि**त्यादि ॥

शूराणां सत्यसन्धानां प्रतिज्ञां परिरक्षताम् ।
पाण्डवानां निवासेन कुलं मे नष्टकल्मषम् ॥ ६६ ॥

**अभिमन्युः**——इहात्रभवन्तो मे पितरः । तेन खलु,

न रुष्यन्ति मया क्षिप्ता हसन्तश्च क्षिपन्ति माम् ।
दिष्ट्या गोग्रहणं स्वन्तं पितरो येन दर्शिताः ॥ ६७ ॥

(भीमसेनमुद्दिश्य) भोस्तात !

अज्ञानात्तु मया पूर्वं यद् भवान् नाभिवादितः ।
तस्य पुत्रापराधस्य प्रसादं कर्तुमर्हसि ॥ ६८ ॥

**भीमसेनः**——एह्येहि पुत्र ! पितृसदृशपराक्रमो भव ।

**अभिमन्युः**——अनुगृहीतोऽस्मि ।

**भीमसेनः**——पुत्र ! अभिवादयस्व पितरम् ।

**अभिमन्युः**——भोस्तात ! अभिवादये ।

**अर्जुनः**——एह्येहि वत्स ! (आलिङ्ग्य)

---

**शूराणामित्यादि** । कुलं गृहं वंशो वा । 'अद्य मे सत्कृतं कुलम्' इति चतुर्थपादो मातृकान्तरे पठ्यते । अस्मिन् पाठे विसन्धिता प्रसज्यते ॥ ६६ ॥

**इहेत्यादि** । इह, वसन्तीति शेषः ।

**न रुष्यन्तीत्यादि** । क्षिप्ताः निन्दिताः । स्वन्तं शोभनावसानम् ॥ ६७ ॥

अनभिवादनावज्ञातयोस्तातयोर्ज्येष्ठमौचित्यादादौ प्रसादयति—भो इत्यादि ।

**अज्ञानादित्यादि** । तस्य अनभिवादनरूपस्य । इह 'इति प्रणमति' इति कविवाक्यमपेक्षितम् ॥ ६८ ॥

**एहीत्यादि** ॥

**अन्वित्यादि** । इदं वाक्यं ग्रन्थान्तरे न पठ्यते ॥

**पुत्रेत्यादि** । पितरम् अर्जुनम् ॥

**भो इत्यादि** ॥

**एहीत्यादि** । वत्सेत्यस्य स्थाने 'पुत्र!' इति ग्रन्थान्तरे पठ्यते । 'आलिङ्ग्य' इति च तत्र न पठ्यते ॥

अयं स हृदयह्लादी पुत्रगात्रसमागमः ।
यत्त्रयोदशवर्षान्ते प्रोषितः पुनरागतः ॥ ६९ ॥

पुत्र ! अभिवाद्यतां विराटेश्वरः ।

**अभिमन्युः** — अभिवादये ।

**राजा** — एह्येहि वत्स !

यौधिष्ठिरं धैर्यमवाप्नुहि त्वं भैमं बलं नैपुणमर्जुनस्य ।
माद्रीजयोः कान्तिमथाभिरूप्यं कीर्तिं च कृष्णस्य जगत्प्रियस्य ॥ ७० ॥

(आत्मगतम्) उत्तरासन्निकर्षस्तु मां बाधते । किमिदानीं करिष्ये । भवतु, दृष्टम् । कोऽत्र ।

---

**अयमित्यादि** । अयम् अनुभूयमानः पुत्रगात्रसमागमः पुत्राङ्गपरिष्वङ्गः । 'यत्तद् द्वादशवर्षान्ते' इति ग्रन्थान्तरीयः पाठस्त्वसमञ्जसः ॥ ६९ ॥

**पुत्रेत्यादि** ॥

**अभिवादय इति** ॥

**एह्रीत्यादि** ।

**यौधिष्ठिरमित्यादि** । यौधिष्ठिरं युधिष्ठिरसम्बन्धि । भैमं भीमसम्बन्धि । अर्जुनस्य नैपुणम् अर्जुनसम्बन्धि युद्धकौशलं, नानाकलाकौशलं वा । माद्रीजयोः माद्रीपुत्रयोर्नकुलसहदेवयोः । 'माद्रीसुताद्' इति ग्रन्थान्तरपाठे तन्त्रेण तयोर्ग्रहणं वाच्यम् । तच्च क्लिष्टम् । कान्ति शोभाम् । अथ आभिरूप्यं सुधीत्वं च । अथशब्दः समुच्चये । रूपे हि नकुलः प्रख्यातः, बुद्धौ च सहदेवः । कृष्णस्य, कीर्तिं यशश्च ॥ ७० ॥

**उत्तरेति** । उत्तरासंनिकर्षस्तु उत्तरया मत्कन्यया सह संनिकर्षः आसन्नतरः परिचयस्तु, अर्थादर्जुनस्य । मां, बाधते 'अर्जुनेन उत्तरायाश्चारित्रं दूषितम्, आहोस्विन्न दूषितम्, अदूषितेऽपि वा तस्मिन् कः प्रत्ययं कुर्वन् कन्यार्थी तां स्वीकरिष्यती'त्येतादृशचिन्तोत्पादनेन व्यथयति । इदानीम् अस्यां दुःखावस्थायां । किं करिष्ये कीदृशं प्रतिविधानमारप्स्ये । भवतु तद्विषया चिन्ता मास्तु । दृष्टं प्रतिविधानं मद्बुद्धौ प्रतिभातमित्यर्थः । तदेतत् क्रिययैव प्रकाशयिष्यन् परिजनमाह्वयति—**कोऽत्रेति** । इयं प्रकाशोक्तिः । क इत्यतः प्राग् 'अयमत्र प्राप्तकाल' इति पठ्यते मातृकान्तरे ॥

(प्रविश्य)

**भटः** — जयतु महाराजः ।

**राजा** — आपस्तावत् ।

**भटः** — यदाज्ञापयति महाराजः । (निष्क्रम्य प्रविश्य) इमा आपः ।

**राजा** — (प्रतिगृह्य) अर्जुन ! गोग्रहणविजयशुल्कार्थं प्रतिगृह्यतामुत्तरा ।

**भगवान्** — एतदवनतं शिरः ।

**अर्जुनः** — (आत्मगतम्) कथं चारित्रं मे तुलयति । (प्रकाशम्) भो राजन् !

---

**जयत्वित्यादि** ॥

**आप** इति । आपस्तावत्, आनीयन्तामिति शेषः ॥

**यदित्यादि** । आपः, आनीता इति शेषः ॥

**अर्जुनेत्यादि** । अर्जुन ! गोग्रहणविजयशुल्कार्थं गोग्रहणविजय एव शुल्कं कन्याविवाहनिमित्तं वरसकाशग्राह्यं धनं तस्मै । उत्तरा, प्रतिगृह्यतां स्वीक्रियताम् । गोग्रहणविजयो हि भवता मह्यं यो दत्तः, स मया मत्कन्याशुल्कत्वेन संकल्प्य गृहीतः । तन्निष्क्रयार्थं मया दीयमानां मत्कन्यामुत्तरां स्वीकुरुष्वेति भावः ॥

इत्थमुत्तराप्रतिग्रहमर्थयमानस्य विराटस्य मनस्युत्तराचारित्रदूषकत्वशङ्का तन्नित्यसंनिकृष्टमर्जुनं प्रति नूनमुद्भिन्ना । कथमन्यथा विसदृशवयसे बहुदाराय तस्मै बालां तामात्मनः प्रियदुहितरमयाचितां दातुं स व्यवस्येदिति मन्यमानो युधिष्ठिरो विराटवचनसूचितेन भ्रातुः कलङ्केन विमनायमान आह—एतदित्यादि । एतत् शिरः, अर्थात् पाण्डवानाम् । अवनतं नम्रं जातम् । चारित्रशुद्धिप्रयुक्तं पाण्डवानामुच्चैश्शिरस्त्वमिदानीमर्जुनचारित्रभ्रंशसूचनेनानेन व्यपगतमिति भावः । अस्य वाक्यस्य वक्ता युधिष्ठिरपदेनैव परामृष्टुमुचितः, न तु भगवानिति, तत्स्वरूपस्य प्रकाशितत्वात् । 'उभौ' इति तु मातृकान्तरे वक्तृनिर्देश उपलभ्यते । तदा युधिष्ठिरभीमसेनाविति तदर्थो वक्तव्यः ॥

**विराटाभिप्रायेण युधिष्ठिरव्याख्यातेन हृदयमर्मणि स्पृष्टश्चिन्तयति—कथमि-**

इष्टमन्तःपुरं सर्वं मातृवत् पूजितं मया ।
उत्तरैषा त्वया दत्ता पुत्रार्थे प्रतिगृह्यते ॥ ७१ ॥

**युधिष्ठिरः** — एतदुन्नतं शिरः ।

**राजा** —

इदानीं युद्धशूराणां चारित्रेषु व्यवस्थितः ।
अन्तःपुरनिवासस्य सदृशीं कृतवान् क्रियाम् ॥ ७२ ॥

अद्यैव खलु गुणवन्नक्षत्रम् । अद्यैव विवाहोऽस्य प्रवर्तताम् ।

**युधिष्ठिरः** — भवतु भवतु । पितामहसकाशमुत्तरं प्रेषयामः ।

---

त्यादि । तुलयति स्वकन्याप्रतिग्रहणप्रार्थनभङ्ग्या परीक्षत इत्यर्थः। विराटशङ्कामपनुदति — **भो** इत्यादि ।

**इष्टमिति** । मया, इष्टं प्रियं । सर्वम् अन्तःपुरं , न केवलं भवत्कन्यकैकैव, किन्तु त्वदन्तःपुरवासी निखिलोऽपि स्त्रीजन इत्यर्थः । मातृवत् मात्रा जनन्या तुल्यं । पूजितं सत्कृतं, न तु मनसापि दूषितम् । विराटशङ्कानिरसनक्षमां वाचमुक्त्वा क्रियामप्याह—त्वया, दत्ता । एषा उत्तरा । पुत्रार्थे प्रतिगृह्यते पुत्रस्याभिमन्योरर्थे मया स्वीक्रियते, न तु स्वार्थे । एवञ्चास्या मत्स्नुषीकरणाच्छीलं प्रत्यन्यथाशङ्कां दूरतो जहीहीति भावः ॥ ७१ ॥

विराटशङ्कापनयनपरितोषादाह — **एतदिति** । एतत् शिर उन्नतं पाण्डवानामुच्चैश्शिरस्त्वं प्रत्यापन्नमित्यर्थः । इह वक्ता भगवत्पदेनैव मातृकान्तरे निर्दिष्टः । उभाविति पाठस्य पूर्वोक्तस्यानुसरणे तु 'उभौ' इत्येष पठनीयमिहापि ॥

शङ्काव्यपगमसदृशमाह—**इदानीमित्यादि** । व्यवस्थितः लब्धस्थैर्यः ॥ ७२ ॥

**अद्यैवेत्यादि** । अस्य अभिमन्योः ॥

**भवत्विति** । भवतु भवतु यथा भवानिच्छति तथैव भवतु । आदराद् द्विर्वचनम् । पितामहसकाशं युद्धवशात् सन्निहितस्य भीष्मस्य समीपम् । उत्तरं प्रेषयामः, अर्थाद् विवाहमङ्गलवार्तां निवेदयितुम् ॥

**राजा** — यदभिरुचितं भव(न्ता?ते) । धर्मराजवृकोदरधनञ्जयाः! इत इतो भवन्तः । अनेनैव प्रहर्षेणाभ्यन्तरं प्रविशामः ।

**सर्वे** — बाढम् ।

(निष्क्रान्ताः सर्वे ।)

**द्वितीयोऽङ्कः ।**

---

यदित्यादि । धर्मराजादिसम्बोधनत्रयं व्यस्तं क्वचित् पठ्यते ॥

बाढमिति । बाढं यथा भवानाह, तथास्तु ॥

निष्क्रान्ताः सर्वे इति द्वितीयाङ्कपरिसमाप्तिः ॥

## अथ तृतीयोऽङ्कः ।

(ततः प्रविशति सूतः ।)

**सूतः**—भो भोः ! निवेद्यतां निवेद्यतां सर्वक्षत्राचार्यपुरोगाणां क्षत्रियाणाम् । एष हि,

अपास्य नारायणचक्रजं भयं चिरप्रनष्टान् परिभूय पाण्डवान् ।
धनुःसहायैः कुरुभिर्नरक्षितो हृतोऽभिमन्युः क्रियतां व्यपत्रपा ॥ १ ॥

इति ।

(ततः प्रविशतो भीष्मद्रोणौ ।)

---

### अथ तृतीयोऽङ्कः ।

द्वितीयाङ्के कौरवाणां यद् युद्धादपयानं या च स्वसाह्यागतसौभद्रहारणा, तदुभयं विराटपक्षे पाण्डवात्मप्रकाशनपुत्रसमागमाद्यभ्युदयपर्यवसायितया प्रतिपादितम् । तदेतत् परिभवद्वयमासाद्य कौरवाणां या प्रतिपत्तिः, सा पाण्डवप्रवृत्त्युपनयतद्राज्यार्धदानपर्यवसानास्मिन्नङ्के समुचितसंवादसंघटनसुन्दरं संकीर्त्यते ।

तत्र सौभद्रे परपक्ष्येण बलादपहृते भीष्मादिभ्यस्तद्वार्तां निवेदयितुकामस्य तत्सारथेरादौ प्रवेशः—**तत** इत्यादि । सूतः सारथिः । भट इति ग्रन्थान्तरे पाठः ॥

**भो भो** इत्यादि । सर्वक्षत्राचार्यपुरोगाणां सर्वक्षत्राचार्यो द्रोणः पुरोगो मुख्यो येषां तेषां तथाभूतानाम् । एष हीति श्लोकान्वयि ।

निवेदनीयवस्तुप्रकारमाह—**अपास्येति** । धनुस्सहायैः धनुः चापः सहायः साह्यकारी येषां तैस्तथाभूतैः । कुरुभिः कौरवैः भीष्मादिभिः । नरक्षितः अरक्षितः रक्षितुमपारित इत्यर्थः । अभिमन्युः, नारायणचक्रजं श्रीकृष्णसुदर्शनजन्यं । भयम् , अपास्य विहाय । चिरप्रनष्टान् चिरकालाज्ञातकथान् । पाण्डवान्, अस्य स्थाने 'बान्धवान्' इति ग्रन्थान्तरपाठः । तस्याप्ययमेवार्थः । परिभूय अगणयित्वा । हृतः अपनीतः । अर्थात् केनापि कृष्णपाण्डवनिर्भयेनानादृतकौरवसान्निध्येन परपक्ष्येण । व्यपत्रपा लज्जा । क्रियताम् अनुभूयताम् । अर्थात् कुरुभिः, यैर्मिषद्भिरेव धनुष्पाणिभिरयमभिमन्युहरणपराभव आसादितः । इह नरक्षित इति नञर्थस्य नशब्दस्य सुप्सुपेति समासः ॥ १ ॥

उक्तसूतवाक्यश्रवणोद्वेजितयोर्भीष्मद्रोणयोः प्रवेशमाह—**तत** इत्यादि ॥

**द्रोणः**—सूत ! कथय कथय ।

रणपटुरपनीतः केन मे शिष्यपुत्रः
क इह मम शरैस्तैर्दैवतैर्योद्धुकामः ।
कथय पुरुषसारं यावदस्त्रं बलं वा
बलवत इव दूतांस्तत्र सम्प्रेषयामि ॥ २ ॥

**भीष्मः**—सूत ! कथय कथय ।

---

सूतेत्यादि ।

**रणेति** । रणपटुः युद्धदक्षः । मे, शिष्यपुत्रः अभिमन्युः । केन, अपनीतः । इह विराटभूमौ । दैवतैः देवतासम्बन्धिभिः दिव्यैरित्यर्थः । मम, शरैः, सह, योद्धुकामः योद्धुं काम इच्छा यस्य स तथाभूतः । कः अभिमन्युहर्ता स को नाम । पुरुषसारं पुरुषश्रेष्ठम् अभिमन्युहर्तारम् । यावत् सकलम् । अस्त्रं, बलं वा बलं च । अर्थादभिमन्युहर्तृगतं । कथय मह्यं निवेदय । निवेदिते किं करिष्यसीति चेदाह—बलवत इव सारयुक्तानिव । इवशब्दो वाक्यालङ्कारे । दूतान् वार्ताहरान् । तत्र अभिमन्युहर्तृदेशे । सम्प्रेषयामि युद्धाह्वानार्थं प्रहेष्यामि । उपस्थितमहापरिभवासहिष्णुना द्रोणेन परिभवितृनिग्रहायात्मनः परिभवितृदेशं प्रति सद्योऽभियाने वक्तव्ये दूतसम्प्रेषणवचनमिदमत्यन्तमसमञ्जसं, सर्वव्यवहारौचित्यसर्वस्ववेदिनो महाकवेरननुरूपं च । तेन 'बलवत इव दूतान्' इति मातृकाद्वयेऽप्यपपाठो लेखकप्रमादागत एव । 'बलवत इषुदूतान्' इत्येव तु मूलपाठं मन्यामहे । तदायमर्थः—बलवतः दिव्यशक्तियुक्तान् इषुदूतान् इषून् बाणानेव दूतान् । तत्र अभिमन्युहर्तरि पुरुषे विप्रकृष्टदेशस्थे । सम्प्रेषयामि, अर्थाद् इहस्थ एवाहम् । अयमभिप्रायः—इषव एव मयेदानीं प्रेष्यमाणा अपराधिनं त्वरितमुपगम्य निघ्नन्तस्तमिहानेष्यन्ति, "हृतमभिमन्युं क्षणान्मह्यं प्रत्यर्प्य प्रह्वो मां प्रसादय" इत्येवंरूपमस्सन्देशबोधनरूपं दूतसमुदाचारं चाचरिष्यन्ति न तु तदर्थं दूतपुरुषाः पृथक् प्रेषयिष्यन्ते क्रियाविलम्बप्रसङ्गादिति । 'सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु' इति मेदिनी ॥ २ ॥

भीष्मः पृच्छति—सूतेत्यादि ।

**भग्नेति** । भग्नापयानेषु भग्नानां युद्धपराजितानाम् अपयानेषु पलायनेषु विषये । अनभिज्ञदोषः अनभिज्ञ इत्येवंरूपो दोषो यस्य सः, निर्देशे भावप्राधान्याद अनभिज्ञत्वम् अनिपुणत्वं दोषो यस्य स तथाभूतो वा । भग्ना-

भग्नापयानेष्वनभिज्ञदोषस्तारुण्यभावेन विलम्बमानः ।
केनैष हस्तिग्रहणोद्यतेन यूथे प्रयाते कलभो गृहीतः ॥ ३ ॥

(ततः प्रविशति दुर्योधनः कर्णः शकुनिश्च ।)

**दुर्योधनः** — सूत ! कथय कथय । केनापनीतोऽभिमन्युः । अहमेवैनं मोक्षयामि । कुतः,

मम हि पितृभिरस्य प्रस्तुतो ज्ञातिभेद-
स्तदिह मयि तु दोषो वक्तृभिः पातनीयः ।
अथच मम स पुत्रः पाण्डवानां तु पश्चात्
सति च कुलविरोधे नापराध्यन्ति बालाः ॥ ४ ॥

---

पयानानभिज्ञत्वं हि गुणोऽपि ग्रहणानर्थप्रापकत्वादिह दोष इत्यभिमन्यते । तारुण्यभावेन यौवनस्वभावेन यौवनदर्पेण वा । विलम्बमानः अपयातुमत्वरमाणः एषः कलभः अयं गजयुवा । हस्तिग्रहणोद्यतेन महागजग्रहणोद्युक्तेन । केन, यूथे गजबृन्दे । अपयाते पलायिते सति । गृहीतः । अत्र कौरवग्रहणोद्यतेन केन शूरेण कौरवबृन्दे पलायिते पलायनानभिज्ञतया मन्दचारी सौभद्रो गृहीत इत्येवंरूपस्य प्रस्तुतवृत्तान्तस्य तत्सरूपेणाप्रस्तुतेन हस्तिग्राहिवृत्तान्तेन द्योतनादप्रस्तुतप्रशंसालङ्कारः । एष इत्येतत्पदेन सौभद्रपरामर्शे तु तस्मिन् कलभत्वरूपणात् सामर्थ्यगम्ये चोपमेयभूते कौरवबृन्दे यूथत्वरूपणाद् रूपकालङ्कारो बोद्धव्यः । 'यूथं तिर्यक्समूहेऽस्त्री' इति मेदिनी ॥ ३ ॥

अथ सूतघोषणां श्रुतवतो दुर्योधनस्य कर्णशकुनिसहितस्य प्रवेशः—तत इत्यादि ॥

सूतेत्यादि ।

अभिमन्युमोक्षणस्यात्मकरणीयत्वे हेतूनाह — ममेति । हि यस्मात् । मम, अस्य अभिमन्योः । पितृभिः सह, ज्ञातिभेदः दायादवैरं । प्रस्तुतः प्रक्रान्तः अस्ति । तत् तस्मात् । वक्तृभिः विद्वद्भिर्दूषकैर्वा । इह अभिमन्युग्रहणविषये । दोषः स्वजनोऽपि दुर्योधनः शत्रुगृहीतमभिमन्युं तत्पितृवैरादुपेक्षितवानित्येवंरूपोऽपवादः । मयि तु मय्येव । तुशब्दोऽवधारणे । अथवा तुशब्दो विशेषे मयि विशेषेणेत्यर्थः । भीष्मादिषूत्सर्गत इत्याशयः । 'मम च' इति पाठे तु ममैवेत्यर्थः । पातनीयः स्थापनीयः । एतेन स्वजनत्वनिमित्तमपवादभयमेको हेतुरुक्तः । बालवात्स-

**कर्णः**—अतिस्निग्धमनुरूपं चाभिहितं भवता । गान्धारीमातः !

मा तावत् स्वजनभयात् तु बालभावाद्
व्यापन्नः समरमुखे तव प्रियार्थम् ।
अस्माभिर्न च परिरक्षितोऽभिमन्यु-
र्गृह्यन्तां धनुरपनीय वल्कलानि ॥ ५ ॥

---

त्यमपरं हेतुमाह—अथच किञ्च । सः अभिमन्युः । मम, पुत्रः वात्सल्यभूमित्वाद् ज्ञातिसम्बन्धाच्च पुत्राभिमानविषयः । पाण्डवानां तु, पश्चात्, पुत्रः, प्रथमं स ममैव पुत्रः, पश्चादेव पाण्डवान् प्रति स पुत्र इति स्नेहातिशयनिमित्ता मम मानसी भावनेत्याभिप्रायः । तत् चिररूढस्तत्पितृविरोधस्तद्विषयं स्नेहं कुतो नापकर्षयतीत्यत्राह—कुलविरोधे, सति च विद्यमानेऽपि । बालाः, नापराध्यन्ति द्वेषार्हा न भवन्ति । अतो बालेऽभिमन्यौ मम स्नेहस्तदवस्थ एवेति भावः ॥ ४ ॥

**अतिस्निग्धमित्यादि** । इह यद्यपीति शेषः । वक्ष्यमाणश्लोके तुशब्दस्वारस्यात् । यद् भवताभिहितमभिमन्योरात्ममोक्षयितव्यत्वे हेतुद्वयं, तदतिस्निग्धमनुरूपं च यद्यपीति वाक्यार्थः ।

**मा तावदिति** । तु तथापि । स्वजनभयाद् स्वजनसम्बद्धाद् भयाद् स्वजनत्वनिमित्तात् प्रागुक्तादपवादभयाद्धेतोरित्यर्थः । मा तावत्, स मोक्षयितव्य इति शेषः । बालभावात् बालविषयो यो भावः स्नेहः, तस्माच्च पूर्वोक्ताद्धेतोरित्यर्थः । मा तावत्, स मोक्षयितव्य इति शेषः । इदं द्वयं तस्य मोक्षयितव्यत्वे न मुख्यो हेतुरिति भावः । कस्तर्हि मुख्य इति चेत्, तत्राह—अभिमन्युः, समरमुखे समरस्य युद्धस्य मुखे महारथाधिष्ठातव्ये प्रधानभागे । स्थित्वेति शेषः । तव प्रियार्थं विपक्षजयलक्षणप्रियसम्पादनार्थं । न तु स्वार्थं । व्यापन्नः ग्रहणविपत्तिं प्राप्तः । तदिदं त्वदर्थव्यापन्नत्वमभिमन्योस्त्वन्मोक्षयितव्यत्वे मुख्यहेतुरेक इति भावः । अपरमाह—अभिमन्युः, अस्माभिः अबालैः शूरैस्तद्रक्षणाधिकृतैरपीत्यर्थः । न च परिरक्षितः शत्रुगृह्यमाणो न पालितः । इदमतिव्रीडाकरमस्माकं परिभवस्थानमिति वक्तुं व्रीडाकार्यमाह—अस्माभिः अवश्यपरिरक्ष्यमपरिरक्षितवद्भिरित्यर्थः । धनुः निष्फलं चापम् । अपनीय परित्यज्य । वल्कलानि चीराणि वसनार्थानि । गृह्यन्तां वल्कलधारणेन वनेषु तपश्चर्यैवास्माकमुचिता, न तु धानुष्कवृत्त्या राज्येषु स्थितिरित्यर्थः । स एष परिभवस्तन्मोक्षणेन किञ्चित् कृतप्रतीकारो भवतीति सोऽप्यभिमन्योस्त्वन्मोक्षयितव्यत्वे मुख्यो हेतुरिति तात्पर्यम् ॥ ५ ॥

**शकुनिः**—बहुनाथः खलु सौभद्रः। मुक्त एवेति सम्प्रधार्यताम्। कुतः,

मुञ्चेदर्जुनपुत्र इत्यवगतो राजा विराटः स्वयं
स्मृत्वा चाद्य रणाजिरादवजितं मुञ्चेत् स दामोदरम्।
क्रोधोद्धूतहलात् प्रलम्बमथनाद् भीतेन मुच्येत वा
भीमस्त्वेनमिहानयेद् बलमहान् हत्वा रिपूनूर्जितान्॥ ६॥

**द्रोणः**—सूत! कथय कथय। कथमिदानीं गृहीतः।

पर्यस्तोऽस्य रथो हया नु चपलाश्चक्राक्षमा मेदिनी
तूणी क्षीणशरे त्वमस्य विगुणो ज्याच्छेदवन्ध्यं धनुः।

---

बह्वित्यादि। बहुनाथः बहवो नाथाः योगक्षेमचिन्तकाः यस्य स तथाभूतः। नाथाश्च रामकृष्णभीमार्जुनाः श्लोके वक्ष्यन्ते। सम्प्रधार्यतां निश्चीयताम्।

मोचनहेतून् सम्भावयति—**मुञ्चेदि**ति। अर्जुनपुत्रः अयमर्जुनस्य सूनुः। इति एवम्। अवगतः अवगतिः ज्ञानं, तद्वान्, विराटो, राजा, अद्य, रणाजिराद् युद्धाङ्गणात्। अवजितम् अभिभूय गृहीतम्। अर्थादभिमन्युम्। 'अपगतम्' इति ग्रन्थान्तरे पाठः। स्वयं मुञ्चेत्। सः विराटः। दामोदरं कृष्णम् अभिमन्युमातुलं। स्मृत्वा च, मुञ्चेत्। अर्थात् तम्। अथवा, क्रोधोद्धूतहलात् कोपोत्कम्पितसीरात्। प्रलम्बमथनात् प्रलम्बासुरध्वंसिनः कृष्णभ्रातुर्बलभद्रात्। भीतेन अर्थाद् विराटेन मुच्येत, अर्थाद् अभिमन्युः। बलमहान् बलविषये महान् महाबल इत्यर्थः। भीमस्तु, ऊर्जितान् बलवतः रिपून् अभिमन्युग्राहिणः। हत्वा, एनम् अभिमन्युम्। इह, आनयेत्। अतो नास्माभिरत्र विमनायितव्यं किञ्चित् प्रयतितव्यं वेत्यभिप्रायः॥ ६॥

सूतेत्यादि। कथं गृहीतः कीदृशमभिमन्यौ छिद्रमासाद्य स शत्रुणा हृत इत्यर्थः।

सम्भावितानि छिद्राणि पृच्छति—**पर्यस्त** इति। अस्य अभिमन्योः। रथः, पर्यस्तो नु पतितः किम्, अथवा हतः किम्। हयाः रथाश्वाः। चपलाः अविधेयाः, जाताः किम्। मेदिनी रथसञ्चारभूमिः। चक्राक्षमा नु पङ्कश्वभ्रादियोगाच्चक्रपरिवर्तनासहा जाता किम्। तूणी निषङ्गौ क्षीणशरे नु निश्शेषव्ययितबाणे

एता दैवकृता भवन्ति रथिनां युद्धाश्रया व्यापदो
बाणैरप्यवकृष्यते खलु परैः स्वाधीनशिक्षस्तु सः ॥ ७ ॥

**सूतः** — आयुष्मन्! पुरुषमयो धनुर्वेदः। किमायुष्मता न ज्ञायते।

न चापि दोषा भवताभिभाषिताः स चापि बाणौघमयो महारथः।
अलातचक्रप्रतिमस्तु मे रथो गृहीत एवापतता पदातिना ॥ ८ ॥

---

जाते किम्। त्वम्। अस्य रथस्य। विगुणो नु सञ्चारणप्रमादवशादननुगुणो जातः किम्। धनुः, ज्याच्छेदवन्ध्यं नु ज्याच्छेदेन मौर्वीच्छेदेन हेतुना वन्ध्यं निष्फलं जातं किम्। रथिनां, समर्थासमर्थविभागव्यतिरेकेण रथिसामान्यस्येत्यर्थः। युद्धाश्रयाः युद्धसम्बद्धाः। एताः व्यापदः रथपर्यासादिरूपाणि निग्रहस्थानानि। दैवकृताः, भवन्ति। शत्रुबाणसामर्थ्यप्रयुक्तोऽपि निग्रहप्रकारोऽस्ति; सोऽभिमन्युं प्रत्यसम्भाव्य इत्यभिप्रायेणाह—परैः शत्रुभिः। बाणैरपि करणभूतैः। अपिशब्दः पूर्वोक्तनिग्रहस्थानसमुच्चयार्थः। अवकृष्यते खलु न्यक्कृत्य गृह्यत एव। अर्थाद् बाणव्यापारापदुरुक्तव्यापद्रहितोऽपि रथी। तु किन्तु। सः अभिमन्युः। स्वाधीनशिक्षः स्वाधीना यथाकामकार्यकरणक्षमा शिक्षा धनुरभ्यासो यस्य स तथाभूतः। भवति। अतः शत्रुबाणसामर्थ्यं तन्निग्रहे न क्रमत इति भावः। चतुर्थपादस्यान्या व्याख्या— तु किन्तु। स्वाधीनशिक्षः, सः, परैः शत्रुभिः। बाणैरपि, अपिशब्देन अवकर्षणासमर्थत्वं बाणानां द्योत्यते। अवकृष्यते खलु अवजित्य गृह्यते किं, नाहमवकर्षणं संभावयामीत्यर्थः। खलुशब्दो जिज्ञासायाम्। 'खलु स्याद्वाक्यभूषायां जिज्ञासायां च सान्त्वने' इति मेदिनी ॥ ७ ॥

**आयुष्मन्नित्यादि**। पुरुषमयः पुरुषमूर्तिः। किं न ज्ञायते ज्ञायत एव।

**न चेत्यादि**। भवता, अभिभाषिताः, दोषा अपि रथपर्यासादयोऽपि। न च नैव सम्भूताः। महारथः, स चापि अभिमन्युरपि। बाणौघमयः बाणबृन्दप्रचुरः बाणबृन्दवर्षी स्थित इत्यर्थः। तु तथापि। अलातचक्रप्रतिमः अलातचक्रस्य उल्मुकमण्डलस्य प्रतिमा अनुकृतिर्यस्य स तथाभूतः। बाणाग्निज्वालोद्गारदुरासदत्वान्मण्डलभ्रमिविधायित्वाच्च रथस्यालातचक्रसाम्यम्। मे रथः, आपतता तत्कालमागच्छता। पदातिना पादचारिणा केनापीत्यर्थः। गृहीत एव न पुनरगृहीतः। अग्रहणे तस्य न्याय्ये ग्रहणं तेन साधितमेवेत्यहो पदातेर्बलवैभवमिति भावः ॥ ८ ॥

**सर्वे** — कथं पदातिनेति ।

**द्रोणः** — अथ कीदृशः स पदातिः ।

**सूतः** — किमभिधास्यामि रूपं वा पराक्रमं वा ।

**भीष्मः** — रूपेण स्त्रियः कथ्यन्ते । पराक्रमेण तु पुरुषाः । तत् पराक्रमोऽस्याभिधीयताम् ।

**सूतः** — आयुष्मन् ! ।

**दुर्योधनः** —

किमर्थं स्तूयते कोऽपि भवता गर्विताक्षरैः ।
कथ्यतां नास्ति मे त्रासो यद्येष पवनो जवे ॥ ९ ॥

**सूतः** — श्रोतुमर्हति महाराजः । तेन खलु,

लङ्घयित्वा जवेनाश्वान् न्यस्तश्चापस्करे करः ।
प्रसारितहयग्रीवो निष्कम्पश्च रथः स्थितः ॥ १० ॥

---

**कथमित्यादि** । पदातिनेति, कथं, घटत इति शेषः । न हि तथाविधरथग्रहणं कस्यचित् पदातेः सुकरमिति भावः ॥

**अथेत्यादि** ॥

**किमित्यादि** । किमभिधास्यामि किं वर्णयिष्यामि, वर्णनागोचरे हि वर्तते तस्य रूपं पराक्रमश्चेत्यभिप्रायः ॥

**रूपेणेत्यादि** ॥

**आयुष्मन्निति** ।

पदातिमतिस्तोतुमिव सूतस्य संरम्भमाकारैरनुमाय तमसहमान आह—**किमर्थमित्यादि** । स्तूयते स्तोष्यते । वर्तमानसामीप्ये लट् । गर्विताक्षरैः प्रौढैर्वाक्यैरित्यर्थः । एषः पदातिः । जवे वेगे विषये । पवनो यदि वायुतुल्यो यदि भवेत् । तदापीति शेषः । मे त्रासः भयं । नास्ति ॥ ९ ॥

**श्रोतुमित्यादि** । तेन खल्विति श्लोकान्वयि ।

**लङ्घयित्वेति** । तेन पदातिना खलु । जवेन, अश्वान् । लङ्घयित्वा अतिक्रम्य । अपस्करे रथावयवे । करः हस्तः एकः । न्यस्तश्च निवेशितश्च । प्रसारितहयग्रीवः प्रसारिताः स्तब्धरथाकर्षणातियत्नवशाद् द्राघिताः हयग्रीवाः अश्वकण्ठाः

**भीष्मः** — तेन हि न्यस्यन्तामायुधानि ।

**सर्वे** — किमर्थम् ।

**भीष्मः** —

हृतप्रवेगो यदि बाहुना रथो वृकोदरस्याङ्कगतः स चिन्त्यताम् ।
पुरा हि तेन द्रुपदात्मजां हरन् पदातिनैवावजितो जयद्रथः ॥ ११ ॥

**द्रोणः** — सम्यगाह गाङ्गेयः । बाल्योपदेशात् प्रभृत्यहं तस्य जवमवगच्छामि । इष्वस्त्रशालायां हि,

कर्णायते तेन शरे विमुक्ते विकम्पितं तस्य शिरो मयोक्तम् ।
गत्वा तदा तेन च बाणतुल्यमप्राप्तलक्ष्यः स शरो गृहीतः ॥ १२ ॥

---

यस्य स तथाभूतः । रथः निष्कम्पः निश्चलः । स्थितश्च । रथावयवे तदेकहस्तन्यासमात्रेण रथः स्तब्धो जात इति भावः । अत्र करन्यास-रथनिष्कम्पस्थित्योः कारणकार्ययोस्तुल्यकालसम्बन्धश्चशब्दाभ्यां द्योत्यते ॥ १० ॥

**तेन हीत्यादि** । तेन हि तर्हि । न्यस्यन्तां निर्व्यापारं स्थाप्यन्ताम् । मास्त्वभिमन्युमोचनार्थं उद्यम इति भावः ।

**किमर्थमिति** । केन कारणेनेत्यर्थः ॥

हृतेति । रथः, बाहुना एकेन भुजेन । हृतप्रवेगो यदि निरुद्धवेगप्रकर्षश्चेत् । तर्हीति गम्यम् । सः अभिमन्युः । वृकोदरस्य भीमसेनस्य । अङ्कगतः उत्सङ्गगतः । एतेनाकुतोभयस्थानगतत्वमुक्तम् । चिन्त्यतां बुध्यतां भवद्भिः । भीमसेनस्यैवेदं कर्म सम्भाव्यते, यदतिवेगगामिनो रथस्य बाहुनैकेन स्तम्भनं नाम । अतस्तेनैव रथं निरुध्याभिमन्युर्गृहीत इत्यनुमीयतामिति भावः । ईदृशमशक्यकर्मकरणं भीमे भूयो-दृष्टमित्याह—हिशब्दो दृष्टान्ते । पुरा वनवासकाले द्रुपदात्मजां द्रौपदीं । हरन् रथमारोप्य नयन् । जयद्रथः, तेन वृकोदरेण । पदातिनैव सता पादचारिणैव सता, न तु रथिना । अवजितः रथाद् गृहीतः । एतेन पाण्डवप्रवृत्त्युपलम्भस्य सिद्धतां सूचयति ॥ ११ ॥

तदनुगुणमाह—सम्यगित्यादि । इष्वस्त्रशालायाम् आयुधाभ्यासशालायाम् ।

अतिवेगस्य भीमे दृष्टचरत्वमाह—कर्णेति । तेन भीमेन । कर्णायते कर्णपर्यन्तदीर्घे ज्यया सहाकर्णाकृष्टे इत्यर्थः । मध्यमपदलोपी समासः । शरे, विमुक्ते

**शकुनिः**—अहो हास्यमभिधानम् । भोः ! पृच्छामि तावद् भवन्तम् ।

नास्त्यन्यो बलवाँल्लोके सर्वमिष्टेषु कथ्यते ।
जगद्व्याप्तान् भवन्तः किं सर्वे पश्यन्ति पाण्डवान् ॥ १३ ॥

**भीष्मः**—गान्धारराज ! सर्वमनुमानात् कथ्यते ।

वयं व्यपाश्रित्य रणं प्रयामः शस्त्राणि चापानि रथाधिरूढाः ।
द्वावेव दोर्भ्यां समरे प्रयातौ हलायुधश्चैव वृकोदरश्च ॥ १४ ॥

---

सति । मया, तस्य भीमस्य । शिरः, विकम्पितं विचलितम् । उक्तं, शरमोचनेऽनर्हः शिरःकम्पदोषो मयोद्भावित इत्यर्थः । तदा स्वविमुक्तबाणगमनकाले । तेन च भीमेन च । बाणतुल्यं गत्वा मुक्तबाणसदृशं गत्वा मुक्तेन बाणेन यावदन्तरं लङ्घितं तावद् गत्वेत्यर्थः । सः, शरः, अप्राप्तलक्षः सन् अनासादितलक्ष्यदेशः सन् । गृहीतः, उद्दिष्टं लक्ष्यदेशं प्रति गच्छन् स्वबाणः लक्ष्यदेशप्राप्तिप्राक्काल एव तेन पश्चादनुधाव्य मध्येमार्गं गृहीत इत्यर्थः । एतेन बाणातिशायिवेगत्वं तस्योक्तम् ॥ १२ ॥

पाण्डवप्रवृत्त्युपलम्भं भीष्मद्रोणाभ्यां सूचितमसहमान आह—**अहो** इत्यादि । हास्यं परिहसनीयम् ।

**नास्ती**त्यादि । नास्तीति प्रश्नकाकुः । सर्वम् अर्थाद् गुणजातम् । इष्टेषु प्रियेषु जनेषु । जगद्व्याप्तान् जगत् लोकं व्याप्तान् जगद्व्यापकानित्यर्थः । कर्तरि क्तः । जगद् व्याप्तं यैस्ते जगद्व्याप्ताः, तानिति वा । आहिताग्न्यादित्वात् व्याप्तशब्दस्य परनिपातः । एतेन पाण्डवतुल्यः पाण्डवातिशायी वा कश्चिदन्य एवाभिमन्युग्रहणक्षमः संभाव्यते, न तु भवदुक्तो भीम इति सूचितम् ॥ १३ ॥

**गान्धारे**त्यादि । अनुमानाद् ऊहकारणगुणसद्भावात् । कथ्यते, अतो मा खलु ते भीमस्य गुणेष्वसूयेति भावः ।

भीमस्यैव बलगुणो लोकोत्तरोऽस्तीत्याह—**वयमि**त्यादि । व्यपाश्रित्य अवलम्ब्य ॥ १४ ॥

**शकुनिः**—

एकेनैव वयं भग्नाः सहसा साहसप्रियाः ।
उत्तरं च तमप्येके कथयिष्यन्ति फल्गुनम् ॥ १५ ॥

**द्रोणः**—भो गान्धारराज ! अत्रापि तावद् भवतः सन्देहः ।

किमुत्तरेणापि रणे विकृष्यते निसृष्टशुष्काशनिगर्जितं धनुः ।
किमुत्तरस्यापि शरैर्हृतातपः कृतो मुहूर्तास्तमितो दिवाकरः ॥ १६ ॥

**भीष्मः**—गान्धारीमातः! विस्पष्टं खलु कथ्यते । ननु जानीते भवान् ।

बाणपुङ्खाक्षरैर्वाक्यैर्ज्याजिह्वापरिवर्तिभिः ।
विकृष्टं खलु पार्थेन न च श्रोत्रं प्रयच्छति ॥ १७ ॥

---

यद्येवम् अन्यादृशबलवेगदर्शनादभिमन्युहर्ता भीम एवेत्युच्यते, तर्हि सकलास्मद्भङ्गेन सुव्यक्तासहायशौर्य उत्तरोऽप्यर्जुन इति वक्तव्यः प्रसज्येतेत्याह—**एकेने**त्यादि । एकेनैव असहायेनैव केनचिदित्यर्थः । तम् अस्मद्भङ्गकारिणम् । उत्तरमपि च । फल्गुनं कथयिष्यन्ति अर्जुन इति वक्ष्यन्ति । अतो यथार्जुनवदसहायशूरोऽन्य एवोत्तरो नाम रणमुखे साक्षाद् दृष्टः, तथा भीमवन्महाबलवेगोऽन्य एव कश्चिदभिमन्युहर्ता स्यादिति भावः ॥ १५ ॥

शकुन्यापादिते सर्वभङ्गकर्तुः फल्गुनत्वे द्रोण इष्टापत्तिं कृत्वाह—**भो** इत्यादि । अत्रापि अस्मद्भङ्गकारिणः फल्गुनत्वेऽपि ॥

अर्जुनैकगोचरमुत्तरव्यावृत्तं कर्मद्वयमाह—**किमि**त्यादि । किं विकृष्यते नैव विकृष्यत इत्यर्थः । अपिशब्देन तथाविधधनुर्विकर्षणस्योत्तरगतत्वेन सम्भावनमुपहसनीयमिति द्योत्यते । एवमुत्तरार्धेऽप्यपिशब्दस्वरसो बोद्धव्यः । निसृष्टशुष्काशनिगर्जितं निसृष्टं जनितं शुष्काशनिगर्जितं शुष्ककुलिशध्वनिः येन तत् तथाभूतं । हृतातपः अवच्छन्नालोकः । अत एव मुहूर्तास्तमितः मुहूर्तकालमस्तमितत्वप्रतीतिविषयः । एवञ्च यथोक्तधनुर्विकर्षणं बाणैः सूर्यास्तमितत्वकरणं चार्जुनस्यैव कर्म भवितुमर्हतीति भीमप्रवृत्तिवदर्जुनस्यापि प्रवृत्तिरुपनीतप्रायैवेति भावः ॥ १६ ॥

**गान्धारी**ति । विस्पष्टं खलु स्फुटमेव । कथ्यते प्रतिपाद्यते, अर्थात् फल्गुन इत्येतत् । नन्वित्यादि श्लोकान्वयि ।

**बाणे**ति । हे गान्धारीमातः! । बाणपुङ्खाक्षरैः बाणपुङ्खेषु बाणमूलेषु अक्षराणि येषां तैस्तथाभूतैः । बाणपुङ्खेषु समुदाचारलिखितानि यानि नामाक्षराणि,

(प्रविश्य)

**सूतः** — जयत्वायुष्मान् । शान्तिकर्मानुष्ठीयताम् ।

**भीष्मः** — किमर्थम् ।

**सूतः** —

उचितं ते पुरा कर्तुं ध्वजे बाणप्रधर्षिते ।
अयं हि बाणः कस्यापि पुङ्खे नामाभिधीयते ॥ १८ ॥

**भीष्मः** — आनय ।

(सूत उपनयति ।)

**भीष्मः** — (गृहीत्वा निरीक्ष्य) वत्स! गान्धारराज! जराशिथिलं मे चक्षुः । वाच्यतामयं शरः ।

---

तेष्वेव वाक्यघटकाक्षरत्वमारोप्येयमुक्तिः । अथ वाक्यानां जिह्वापरिवर्तित्वं प्रसिद्धं, तदप्याह—ज्याजिह्वापरिवर्तिभिः ज्यायां मौर्व्यामेव जिह्वायां परिवर्तितुं लुठितुं शीलमेषामिति तैस्तथाभूतैः । वाक्यैः वाक्यत्वेनाध्यवसितैर्धनुर्ध्वनिभिः करणभूतैः । भवान्, ननु जानीते, अर्जुन इति किं न विदितवानित्यर्थः । उक्तस्य दार्ढ्यार्थमाह—पार्थेन खलु अर्जुनेनैव । विकृष्टम् अर्थाद् धनुः । श्रोत्रं श्रवणावधानं । न च प्रयच्छति नैव दत्तवान् किं धनुर्ध्वनिं प्रति । अर्थाद् भवान् । प्रयच्छतीति काकुः । इह सर्वत्र वर्तमानसामीप्यविवक्षया भूते लट् ॥ १७ ॥

अथ भीष्मध्वजधर्षिणं कमपि बाणमादाय तत्सूतस्य प्रवेशः—जयत्वित्यादि । शान्तिकर्म अमङ्गलप्रशमार्थं कर्म ॥

**किमर्थमिति ।**

**उचितमिति** । ध्वजे, बाणप्रधर्षिते सति परशरविद्धे सति । पुरा पूर्वं । ते त्वया । कर्तुम्, उचितं युक्तम् अर्थाच्छान्तिकर्म । बाणः येन ध्वजः प्रधर्षितः स शर इत्यर्थः । अयं हि अयमेव मत्करस्थ इत्यर्थः । पुङ्खे बाणमूले । कस्यापि, नाम नामधेयम् । अभिधीयते, तदनुवाच्य पश्चाद् धर्षयितृप्रतीकारं सम्प्रधारयेत्यभिप्रायः ॥ १८ ॥

**आनयेति** । अर्थाद् बाणम् ॥

**निरीक्षणेन** विदितमपि नामधेयं विवदमानशकुनिमुखेनैव वाचयितुमिच्छन्नाह—**वत्सेत्यादि** । जराशिथिलं जरया वार्धकेन निमित्तेन शिथिलम् अपटु ॥

**शकुनिः** —(गृहीत्वानुवाच्य) अर्जुनस्य। (इति क्षिपति। द्रोणस्य पादयोः पतति।)

**द्रोणः** —(शरं गृहीत्वा) एह्येहि वत्स !

एष शिष्येण मे क्षिप्तो गाङ्गेयं वन्दितुं शरः।
पादयोः पतितो भूमौ मां क्रमेणाभिवन्दितुम् ॥ १९ ॥

**शकुनिः** —मा तावद् भोः ! शरप्रत्यय इदानीं श्रद्धातव्यम्।

यौधः स्यादर्जुनो नाम तेनायं चोज्झितः शरः।
लिखितं चोत्तरेणापि प्रकाशमुपनीयताम् ॥ २० ॥

---

**अर्जुनस्येति**। अर्जुनस्य अर्जुनसम्बन्धीत्यर्थः। इति क्षिपति इत्युक्त्वा भूमौ पातयतीत्यर्थः। पतति अर्थाद् बाणः॥

**एह्यीत्यादि**। असन्निहितमप्यर्जुनं तच्छरदर्शनात् सन्निहितमिव मत्वा वत्से-त्यामन्त्रणम्। एह्येहि इयन्तं कालमप्रकाशमेव स्थितस्त्वमिदानीं प्राकाश्यं प्राप्नु-हीत्यर्थः।

**एष इत्यादि**। वन्दितुं क्षिप्तः वन्दनार्थं क्षिप्तः। तद्ध्वजधर्षणार्थं क्षि-प्तेऽपि शरे तद्वन्दनार्थत्वमारोप्यते। तद्ध्वजधर्षणेऽपि भक्तेनार्जुनेन कृते तत्पूजा-त्वाभिमानो द्रोणस्यार्जुनवात्सल्यात्। तथा यादृच्छिकेऽपि शरस्य स्वपादपतने स्वाभिवन्दनत्वाभिमानः ॥ १९ ॥

**मा तावदित्यादि**। भोः! इदानीं, शरप्रत्यये बाणजनितेऽर्जुनानुमाने। मा तावत् श्रद्धातव्यं श्रद्धा नार्हेत्यर्थः।

शरेऽर्जुननामोपलम्भस्य का गतिरिति चेत् तत्राह—**यौध** इति। यौधः उत्तरभटः कश्चित्। अर्जुनो नाम स्यात् अर्जुननामकः सम्भाव्यते। अयं च शरः, तेन अर्जुननाम्ना यौधेन। उज्झितः मुक्तः, स्यात्। अतः पार्थार्जुनेनैवायं बाणो मुक्त इत्यत्राव्यभिचरितं प्रमाणं नास्तीत्यर्थः। प्रकाशं विस्पष्टम्। 'कौरवाः पार्थार्जुनेनैव भग्नाः, न तु मये'ति विशदार्थशंसीत्यर्थः। उत्तरेणापि, बाणपुङ्खलिखित-कर्त्रपेक्षया समुच्चयेऽपिशब्दः। लिखितं स्वहस्तन्यस्ताक्षरं लेख्यप्रमाणमित्यर्थः। उपनीयतां, तदनन्तरं 'अर्जुन' इति विश्वसिष्याम इत्याशयः। अत्र यौध इति योधशब्दात् प्रज्ञादित्वात् स्वार्थेऽण् ॥ २० ॥

**दुर्योधनः —**

तेषां राज्यप्रदानार्थमनृतं कथ्यते यदि ।
राज्यस्यार्धं प्रदास्यामि यावद् दृष्टे युधिष्ठिरे ॥ २१ ॥

(प्रविश्य)

**भटः —** जयतु महाराजः । विराटनगराद् दूतः प्राप्तः ।

**दुर्योधनः —** प्रवेश्यताम् ।

**भटः —** यदाज्ञापयति महाराजः । (निष्क्रान्तः ।)

(ततः प्रविशत्युत्तरः ।)

**उत्तरः —**

अध्वानमल्पमतिमुक्तजवैस्तुरङ्गै-
रागच्छता पथि रथेन विलम्बितं मे ।
कौन्तेयबाणनिहतैर्द्विरदैः समन्ताद्
दुःखेन यान्ति तुरगा विषमा हि भूमिः ॥ २२ ॥

---

उत्तरलिखितोपनयपक्षोऽप्यपरितोषकर इत्याशयेनाह—**तेषामिति** । तेषां पाण्डवानां । राज्यप्रदानार्थम्, अनृतं कथ्यते यदि, अर्थादुत्तरेण । उत्तरेऽनृतकथनं सम्भाव्यत इत्यर्थः । अत उत्तरलिखितोपनयपक्षं नाहं रोचय इति भावः । अस्मिन् कार्यसङ्कटे स्वाभिरुचितां प्रतिपत्तिमाह—युधिष्ठिरे, दृष्टे यावत् । उपलब्धे सत्येव । यावदित्यवधारणे । राज्यस्य, अर्धं, प्रदास्यामि । अतो युधिष्ठिरप्रवृत्तिरुपनीयतामित्यभिप्रायः ॥ २१ ॥

**जयत्वित्यादि** ॥

**प्रवेश्यतामिति** ॥

**यदित्यादि** ॥

युधिष्ठिरप्रवृत्त्युपनयसम्पत्त्यर्थमुत्तरस्य प्रवेशमाह—**तत इत्यादि** ॥

**अध्वानमित्यादि** । अध्वानं मार्गम् । अतिमुक्तजवैः अतिमुक्तः परां कोटिं नीतः जवो वेगो येषां तैस्तथाभूतैः । मे मया । अव्ययमिदं तृतीयार्थे । विलम्बे कारणमाह—कौन्तेयबाणनिहतैः अर्जुनशरप्रमापितैः । द्विरदैर्गजैर्हेतुभिः । यान्तीति भूते वर्तमानसामीप्यविवक्षया लट् । विषमा दन्तुरा हि, अर्थात् द्विरदैः ॥ २२ ॥

(प्रविश्य कृताञ्जलिः) भो भोः! आचार्यपितामहपुरोगं सर्वराजमण्डलमभिवादये ।

**सर्वे** — आयुष्मान् भव ।

**द्रोणः** — किमाह तत्रभवान् विराटेश्वरः ।

**उत्तरः** — नाहं तत्रभवता प्रेषितः ।

**द्रोणः** — अथ केन त्वं प्रेषितः ।

**उत्तरः** — तत्रभवता युधिष्ठिरेण ।

**द्रोणः** — किमाह धर्मराजः ।

**उत्तरः** — श्रूयताम्,

उत्तरा मे स्नुषा लब्धा प्रतीक्षे राजमण्डलम् ।
तत्रैव किमिहैवास्तु विवाहः क्व प्रवर्तताम् ॥ २३ ॥

**शकुनिः** — तत्रैव तत्रैव ।

**द्रोणः** —

इत्यर्थं वयमानीताः पञ्चरात्रोऽपि वर्तते ।
धर्मेणावर्जिता भिक्षा धर्मेणैव प्रदीयताम् ॥ २४ ॥

---

**भो भो** इत्यादि । आचार्यपितामहपुरोगं द्रोणभीष्मपुरस्सरम् ॥

आयुष्मानित्यादयः षट् संवादाः ॥

श्रूयतामिति ।

**उत्तरे**त्यादि । प्रतीक्षे प्रतिपालयामि पुत्रविवाहोत्सवानुभवार्थम् । विवाहः, तत्रैव भवच्छिबिरदेश एव अथवा कौरवगृह एव । अस्तु किम्, इहैव विराटगृह एव । अस्तु किम्, उक्तान्यतरनिर्णयो भवदायत्त इत्यर्थः । क्व प्रवर्तताम् अर्थाद् विवाहः । इयं तृतीया प्रश्नकोटिः । विवाहयोग्यतया द्वौ देशौ मया निर्दिष्टौ; यद्यन्यस्तृतीय एव देशो भवतामभिरुचितः, स क्व इति प्रश्नार्थः । अथवा, मत्कृतो देशविशेषनिर्देशो न गण्यताम् । भवद्भिरेव योग्यो देशो निर्दिश्यतां भवदायत्तत्वान्मद्योगक्षेमस्येति प्रश्नार्थः ॥ २३ ॥

**तत्रैवे**ति । तत्रैव विराटगृह एव । वक्तृपरोक्षदेशपरामर्शित्वात् तच्छब्दस्य ॥

एवमुत्तरेण युधिष्ठिरवार्तायां स्पष्टमुपनीतायां दुर्योधनकल्पितपञ्चरात्रसमयानुष्ठानसिद्धिमात्मनः कथयन् प्रतिश्रुतार्धराज्यदानस्य प्राप्तकालतामाह—**इत्यर्थ**मिति ।

**दुर्योधनः**—

बाढं दत्तं मया राज्यं पाण्डवेभ्यो यथापुरम् ।
मृतेऽपि हि नराः सर्वे सत्ये तिष्ठन्ति तिष्ठति ॥ २५ ॥

**द्रोणः**—

हन्त सर्वे प्रसन्नाः स्मः प्रवृद्धकुलसंग्रहाः ।
इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः ॥ २६ ॥

(निष्क्रान्ताः सर्वे ।)

तृतीयोऽङ्कः ।

---

अवसितं पञ्चरात्रम् ।

---

वयम्, इति अनेन प्रकारेण । अर्थं पाण्डवप्रवृत्तिरूपं वस्तु । आनीताः उपनीतवन्तः । पाण्डवप्रवृत्त्यानयनाय कल्पितः कालश्च नातिक्रान्त इत्याह—पञ्चरात्रोऽपि पञ्चानां रात्रीणां समाहारः पञ्चरात्रं, तदस्यास्तीत्यचि पञ्चरात्रः रात्रिपञ्चकयुक्तः कालोऽपीत्यर्थः । वर्तते, न तु वृत्तः । धर्मेण न्यायेन आचारेण वा गुरवे दक्षिणा दीयत इत्येवंरूपेण । आवर्जिता उदकपूर्वं मत्करे विसृष्टा । भिक्षा भिक्षितद्रव्यम् अर्धराज्यलक्षणम् । धर्मेणैव 'यदि पञ्चरात्रेण पाण्डवप्रवृत्तिरुपनीयते, पाण्डवेभ्योऽर्धराज्यं दास्यामि' इत्येतादृशस्वप्रतिज्ञानुपालनात्मना सत्येनैव । प्रदीयताम्, अर्थात् पाण्डवेभ्यः । आनीता इति नीञो गत्यर्थत्वात् कर्तरि क्तः । 'भिक्षा तु भिक्षितान्नादौ याच्ञायां भृतिसेवयोः' इति वैजयन्ती । 'न्यायाचारयमाहिंसाखड्गचापेषु राशि च । प्रधानशेषे सत्ये च' इति धर्मशब्दे केशवः ॥ २४ ॥

इत्थमुक्तवति द्रोणे, दुर्विवादरन्ध्रालाभमूके च शकुनौ, प्रतिश्रुतराज्यदानातिरेकेणात्मनः करणीयान्तरमपश्यन्नाह—बाढमिति । बाढं भवदुक्तमङ्गीकृतं । मया, पाण्डवेभ्यः, यथापुरं यथापूर्वं । द्यूतात् प्राक् पाण्डवानां यावद् राज्यमासीत् तावदित्यर्थः । राज्यं, दत्तं । सर्वे नराः हि, सत्ये सत्याख्ये स्वगुणे । तिष्ठति सति सम्यक्पालनादप्रणश्यति सति । मृतेऽपि मरणेऽपि स्वदेहापायानन्तरमपीत्यर्थः । तिष्ठन्ति न प्रणश्यन्ति सत्यसन्धत्वकीर्त्तिकायेन जीवन्तीति यावत् । अतः सत्यपरिपालनार्थमेवेदं मम राज्यदानमिति भावः ॥ २५ ॥

एवं दुर्योधनेन पाण्डवराज्यदाने यथाप्रतिज्ञमभिनिर्वर्तिते द्रोण आत्मनः

पूर्णकामत्वं सिद्धमनुसन्दधान आह—हन्तेति । हन्त हर्षे । प्रवृद्धकुलसङ्ग्रहाः प्रवृद्धः विग्रहकथाप्रशमाद् राज्यसंविभागनिमित्तकात् प्रकर्षेण वृद्धिं प्राप्तः कुलसङ्ग्रहः पाण्डवधार्तराष्ट्रसमूहात्मकस्य कुरुवंशस्योच्छ्रायः अविग्रहस्थितिर्वा येषां ते तथाभूताः । सर्वे, वयं, प्रसन्नाः स्मः सन्तुष्टा भवामः । 'सङ्ग्रहाः पुनः । स्वीकारोच्छ्रायसंक्षेपाः' इति केशवः ।

तदित्थं भीष्मसहायद्रोणसमुद्यमपरमप्रयोजनस्य तच्छिष्यकुलसङ्ग्रहस्य सिद्धिसंकीर्तनेन रूपकेतिवृत्तं परिसमापितम् । कुलसङ्ग्रहो ह्यस्मिन्नितिवृत्ते परमः साध्यांशः, य एव किल कुरुकुलाचार्यस्य द्रोणस्य सभीष्मस्य नित्यमभिरुचितः । स च द्यूतविजितविप्रवासितपाण्डवार्धराज्यसंविभागेन साध्यः । संविभागश्च दुर्योधनायत्तः । दुर्योधने तु पाण्डवद्वेषिणि शकुनिकुबुद्धिनेये संविभागमचिकीर्षौ द्रोणस्य बुद्धिरित्थमुत्पन्ना—'दुर्योधनेन विशुद्धनानाव्रतमहादानाङ्गपरिकरं कमपि यज्ञमनुष्ठाप्य यज्ञान्तावश्यलभ्ये तदनुष्ठापनदक्षिणाप्रतिग्रहप्रार्थनावसरे संविभागमेव दक्षिणात्वेन वरयित्वा साधयेयम्' इति ।

तस्य तथाविधावसराभिलाषुकस्य द्रोणस्य दुर्योधनयज्ञावभृथस्नानावसानदर्शिनः पाण्डवराज्यसंविभागात्मकदक्षिणाप्रतिग्रहलक्षणं कार्यं प्रत्यौत्सुक्यं 'धर्ममालम्बमानेन सुयोधनेनाहमेवानुगृहीतो नाम' (पृ० १५) इत्यनेन द्रोणवाक्येन दुर्योधनस्य प्रकृतयज्ञरूपधर्मनिषेवणं मदिष्टसिद्धयभ्युपायतया मदनुग्राहकमित्येवमभिप्रायकेण सूचितम् । सेयं कार्यस्यारम्भावस्था ।

धर्मानुष्ठानजनिताच्चित्तप्रशमाद् दानोत्साहाच्च द्रोणभीष्मकर्णाद्यभिनन्दनसंवर्धिताद् इष्टार्थदक्षिणाप्रतिग्रहं प्रार्थयमाने दुर्योधने तं प्रति दक्षिणानिच्छाभिनयेन इष्टार्थाभावसमर्थनेन इष्टार्थस्य सद्भावमभ्युपेत्यापि तत्स्वरूपानाचिख्यासाप्रकाशनेन च स्वेष्टार्थदातृत्वे स्वहृदयाविश्वासाविष्करणं, तेन तोयावर्जनपूर्वकस्येष्टार्थदानप्रतिज्ञानस्य दुर्योधनसकाशात् सम्पादनं, ततो हृदयविश्वासमासाद्य पाण्डवराज्यसंविभागस्य स्वाभीष्टदक्षिणात्वेनोपक्षेपणमित्येषा कार्यस्य यत्नावस्था भवति । इयं 'धर्मे धनुषि चाचार्य ! प्रतिगृह्यतां दक्षिणा' (पृ० २३) इत्येवमादिषु 'एषा च भिक्षा मम दक्षिणा च' (पृ०२७) इत्येवमन्तेषु सन्दर्भेषु स्पष्टा ।

कुरुकुलक्षेमकामनाप्रयुक्तेऽस्मिन् द्रोणस्य यत्ने वञ्चनात्वमारोप्य कलहायमानेन शकुनिना जनितबुद्धिभेदे प्राप्तकालं कार्यमकृत्वा 'यदि पञ्चरात्रेण पाण्डवानां प्रवृत्तिरुपनीयेत, तदैव राज्यस्यार्धं प्रदद्याम्' इति कमपि समयोपाधिमपूर्वमुप-

क्षिप्तवति दुर्योधने, पाण्डवप्रवृत्त्युपनयस्य पञ्चरात्रासाध्यत्वबुद्ध्या कार्यं प्रति क्षण-निराशेनापि द्रोणेन 'अभ्युपगम्यतां पञ्चरात्रम्' (पृ०४२) इत्यादिना तस्य पञ्चरात्रसाध्यतां विराटनगरे पाण्डववासानुमानद्वारा रहसि बोधितवति भीष्मे 'हन्त सिद्धं कार्यम्' (पृ०४३) इति कार्यस्य प्राप्तिसम्भवकथनात् प्राप्त्याशावस्था तृतीया प्रकाशिता ।

अथ विराटगोधनग्रहणनिमित्तेन युद्धयत्नेन पाण्डवप्रवृत्तावुपनीतायां कुल-संग्रहपर्यवसायिनः पाण्डवार्धराज्यदानस्य सिद्ध्या पञ्चमी फलागमावस्थोक्ता । सा च 'बाढं दत्तं मया राज्यम्' (पृ० ११४) इत्यत्र परिस्फुटा । भीमैकसाध्याभिमन्युहरण-बाणपुङ्खन्यस्तार्जुननामदर्शन-युधिष्ठिरसन्देशश्रवणैः पाण्डवप्रवृत्तावगतायां कार्यस्यापायशङ्कानुदयादपायवारणलक्षणा नियताप्तिर्नाम चतुर्थावस्था नेहास्ति । आभिश्चतसृभिः कार्यावस्थाभिरुपाधिभिर्मुखप्रतिमुखगर्भनिर्वहणाख्या निर्विमर्शाश्चत्वारः सन्धय इह वेदितव्याः । यदाह धनिकः — "अवस्थाः पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः । आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥ अर्थप्रकृतयः पञ्च पञ्चावस्थासमन्विताः । यथासङ्ख्येन जायन्ते मुखाद्याः पञ्च सन्धयः ॥" (दशरू० १ विला०) इति । एषां चाङ्गानि यथासम्भवं तत्र तत्रोपनिबद्धान्यनया दिशा स्वयमूहनीयानि ।

अत्र रसो वीरो नाम । स दुर्योधने धर्मवीरः, 'कृतश्रद्धो ह्यात्मा' (पृ० १६), 'तदिदमपनयो वा वञ्चना वा यथा वा भवतु नृप! जलं तत् सत्यमिच्छामि कर्तुम्' (पृ०३८), 'बाढं दत्तं मया राज्यम्' (पृ०११४) इत्यादिषु धर्मविषयोत्साहस्य दुर्योधनगतस्याभिव्यक्तेः । द्रोणे दयावीरः, कुरुपाण्डवपरस्परद्वेषसम्भावितताद्विपत्परिहारविषयस्योत्साहस्य द्रोणगतस्य दुर्योधनवाग्येऽप्यकुण्ठप्रसरस्य सर्वतः सम्प्रत्ययात् । द्रोणदुर्योधनादिषु सर्वेषु युद्धवीरः, युद्धविषयस्य तद्गतस्योत्साहस्य गोग्रहणप्रसक्त्या प्रकाशनात् ।

नायकास्तु दुर्योधनः पाण्डवा द्रोणश्च देवकल्पाः । भीष्मकर्णादयस्तत्सहायाः । तत्र दुर्योधनस्य सत्यपरिपालनरूपधर्मनिष्पत्तिः फलं, पाण्डवानामर्धराज्यलाभः, द्रोणस्य शिष्यानुग्रहचारितार्थ्यसिद्धिरित्येवं नायकानां पृथक्फलसम्बन्धोऽप्यस्ति ।

एवञ्च ख्यातेतिवृत्तसंबद्धत्वाद् वीररसप्रधानत्वाद् देवकल्पपृथक्फलबहुनायकत्वात् कपटाश्रयत्वात् त्र्यङ्कत्वाद् दीर्घह्रस्वह्रस्वतरैरङ्कैरपेक्षितक्रमव्यत्ययेऽप्युपेतत्वाच्च भूयिष्ठसमवकारलक्षणयोगेन रूपकमिदं समवकार इति विज्ञायते । तथाच

समवकारलक्षणं—"यत्रामुखं नाटकवत् सन्धयो मर्शवर्जिताः । नेतारो द्वादश पृथक्फला देवासुरादयः ॥ वीरप्रधानाश्च रसास्त्रयोऽङ्कास्तेषु च क्रमात् । वस्तुस्वभावदैवादिकृताः स्युः कपटास्त्रयः ॥ पुररोधरणाग्न्यादिनिमित्ता विद्रवास्त्रयः । प्रथमेऽङ्के निबन्धव्या कथा यामत्रयावधिः ॥ यामावधिर्द्वितीयेऽङ्के तृतीयेऽङ्केऽर्धयामिका । असौ समवकारः स्याद् वीथ्यङ्गैः कैश्चिदन्वितः ॥" (प्रतापरु० नाट०) इति ।

इत्थं रूपकार्थं परिसमाप्य 'प्रशस्तिः शुभशंसनम्' इत्युक्तलक्षणं निर्वहणसन्धिचरमाङ्गं प्रशस्तिमाह—**इमामिति** । नः अस्माकं । राजसिंहः राजश्रेष्ठः । कृत्स्नामपि अखिलामपि । इमां, महीं भूमिम् । प्रशास्तु शासनविषयीकरोतु, अखण्डभूमण्डलाधिपत्यं लभतामित्यर्थः ॥ २६ ॥

निष्क्रान्ताः सर्वे इति तृतीयाङ्कपरिसमाप्तिः ॥

---

ताम्रपर्ण्यमृतार्द्रपूत**तरुवा**प्रहारगतशैशवो
वञ्चि**मूलकरामवर्मकुलशेखर**क्षितिपरक्षितः ।
**पञ्चरात्रमिदं** महोर्जितगुणाकरे **गणपतिः** सुधी-
**भासनाटकमण्डले** विवृतवान् गभीररुचिराशयम् ॥

वाग्देव्या वरिवस्यैव यदिदं मम जल्पितम् ।
भूयान्मय्येतया नित्यं सुप्रसन्ना **सरस्वती** ॥

इति श्रीमदनन्तशयनवास्तव्यस्य **ताम्रपर्णी**तीरवर्ति**तरुवा**प्रहाराभिजनस्य श्रीसीताम्बारामसुब्रह्मण्यार्यसूनोः

**गणपतिशास्त्रिणः** कृतिषु

**पञ्चरात्रव्याख्यानं**

सम्पूर्णम् ।

---

शुभं भूयात् ॥

# श्लोकानुक्रमणिका ।


| | | | |
|---|---|---|---|
| अकारणं रूप (वंशस्थं) | ७४. | उत्तरा मे स्नुषा | ११३. |
| अगणितगुण (मालिनी) | ६१. | उद्योगः प्रस्तुतः | ५७. |
| अग्निरग्निभया | ८. | उपन्यस्तस्य शि | २८. |
| अज्ञानात्तु मया | ९५. | एकवर्णेषु गा | ५५. |
| अतीत्य बन्धून (उपजातिः) | १५. | एकेनैव वयं भ | १०९. |
| अद्य मे कार्यलो | ४०. | एकोदकत्वं खलु (उपजातिः) | ५८. |
| अद्येदानीं पर्ण (शालिनी) | ५९. | एतदक्षयतूणि | ६७. |
| अद्येदानीं यातु (तथा) | ७९. | एतदग्नेर्बलं | १२. |
| अध्वानमल्पमति (वसन्ततिलकं) | ११२. | एतन्मे पारिहा | ९३. |
| अनेन वेषेण (उपजातिः) | ७२. | एतां चक्रधर (शार्दूलविक्रीडितं) | ९. |
| अपास्य नाराय (वंशस्थं) | १००. | एते वातोद्ध | १०. |
| अपूर्व इव ते | ७५. | एभिरेव रथै | ४६. |
| अयं बाल्यात्तु स | ९२. | एवमेव क्रतून् | २१. |
| अयं स हृदय | ९६. | एष शिष्यस्य | ३६. |
| अयुज्यमानैः प्र (वंशस्थं) | ८१. | एष शिष्येण मे | १११. |
| अलमात्मस्तवं | ८५. | एषा भो दीप्तयू (सुवदना) | ७. |
| अवजित इति (मालिनी) | ८१. | कथं पण्डित ! कू | ४३. |
| अवनतविट (पुष्पिताग्रा) | १३. | कर्णायते तेन (उपजातिः) | १०७. |
| अवाप्य रूप्यग्र (वंशस्थं) | १६. | कामं दुर्योधन | ५६. |
| अशक्तो मामभि | ८६. | किं भवान् धर्म | ८४. |
| अहं हि मात्रा (वंशस्थं) | २०. | किन्नु तत्परिहा | ६३. |
| आचार्यस्य यदा | ४४. | किमर्थं खलु स | ६०. |
| आदीपिते जतु (वसन्ततिलकं) | ८०. | किमर्थं स्तूयते | १०६. |
| आलम्बितो भ्रम (तथा) | ६९. | किमुत्तरेणापि (वंशस्थं) | १०९. |
| इक्ष्वाकुशय्याति (इन्द्रवज्रा) | १८. | कृतश्रद्धो ह्यात्मा (शिखरिणी) | १६. |
| इत्यर्थं वयमानी | ११४. | कृता नीला नागाः (तथा) | ६६. |
| इदानीं युद्ध | ९८. | को नु खल्वेष स | ,, |
| इष्टमन्तःपुरं | ,, | क्रतुव्रतैस्ते (उपजातिः) | २१. |
| उचितं ते पुरा | ११०. | क्रोधप्रायं वयो | ३५. |

| | | | |
|---|---|---|---|
| गजेन्द्राः कल्प्यन्ते (शिखरिणी) | ५६. | नीचैरप्यभिभा | ८३. |
| गतो वृक्षाद् वृ (तथा) | ११. | नृपा भीष्मादयो | ७९. |
| गाण्डीवेन मुहू (शार्दूलविक्री०) | ७१. | पर्यस्तोऽस्य र (शार्दूलवि०) | १०४. |
| गुरुकरतल (मालिनी) | ३८. | पादयोः समुदा | ९०. |
| जानाम्येतान् (शालिनी) | ८२. | पार्थं पितरमु | ८५. |
| जित्वापि गां वि (वसन्ततिलकं) | ७३. | पीतः सोमो बाल्य (शालिनी) | २४. |
| तस्मान्मे रथ (शार्दूलवि०) | ४६. | पुत्रो ह्येष युधि (शार्दूलवि०) | ७८. |
| ताडितस्य हि यो | ७१. | प्रकोष्ठान्तरसं | ९३. |
| तुलितबलमि (पुष्पिताग्रा) | ७६. | प्राणाधिकोऽस्मि (वसन्ततिलकं) | २५. |
| तृप्तोऽग्निर्हविषा (शार्दूलवि०) | ५. | बहुभिः समराभि | ६४. |
| तेषां राज्यप्रदा | ११२. | बाढं दत्तं मया | ११४. |
| त्वं वञ्च्यसे यदि (वसन्ततिलकं) | ३४. | बाणपुङ्खाक्षरै | १०९. |
| त्वमिदानीं कुमा | ६२. | बाणाधीना क्षत्रि (शालिनी) | १८. |
| दह्यमानस्य वृ | १०. | बाहुरक्षौहिणी | ८८. |
| दूरस्था दर्शना | ७७. | भग्नापयानेष्व (इन्द्रवज्रा) | १०२. |
| दैवतं मानुषी | १९. | भीमसेनस्य ली | ४२. |
| द्रुतैश्च वत्सैर्व्य (वंशस्थं) | ५३. | भीष्मेण कर्णेन (इन्द्रवज्रा) | ३५. |
| द्रोणः पृथिव्यर्जुन (इन्द्रवज्रा) | १. | भीष्मं रामशरै (शार्दूलवि०) | ६८. |
| द्रोणश्च भीष्मश्च (तथा) | ६०. | भ्रातृणां पैतृकं | २९. |
| द्विजोच्छिष्टैरन्नैः (शिखरिणी) | ४. | मम हि पितृभिर (मालिनी) | १०२. |
| धनुरुपनय शी (मालिनी) | ५५. | मा तावद् व्यथि } (प्रहर्षिणी) | ५४. |
| धनुर्घोषं द्रोण (शिखरिणी) | ६७. | मा तावत् स्वजन } (प्रहर्षिणी) | १०३. |
| धन्यः खल्वर्जुनो | ८६. | मिथ्याप्रशंसा (उपजातिः) | ९०. |
| धर्षिता रथश्च | ४५. | मुञ्चेदर्जुनपुत्र (शार्दूलवि०) | १०४. |
| न चापि दोषा (वंशस्थं) | १०५. | यज्ञेन भोजय (वसन्ततिलकं) | १४. |
| न जाने तस्य जे | ७६. | यत् पाण्डवा द्रुप (तथा) | २९. |
| न ते क्षेपेण रु | ८९. | यत् पुरा ते सभा | ३०. |
| न रुष्यन्ति मया | ९५. | यदि विमृशसि (पुष्पिताग्रा) | २७. |
| नास्त्यन्यो बल | १०८. | यदि स्वचक्रोद्ध (वंशस्थं) | ६३. |
| निमित्तं किञ्चि | ६५. | युध्यते यदि सौ | ६८. |

ये दुर्बलाश्च कु (वसन्ततिलकं) ३१.
येन भीमः सभा ,,.
येषां गतिः क्वापि (इन्द्रवज्रा) २७.
(यैः ? ये) कर्तुकामै (उपजातिः) ३९.
योक्त्रयित्वा जरा ८९.
यौधिष्ठिरं धैर्य (इन्द्रवज्रा) ९६.
यौधः स्यादर्जु १११.
रणपटुरपनी (मालिनी) १०१.
रथमानय शी ६१.
रथमासाद्य निः ७६.
राज्ञां वेष्टनप (शार्दूलवि०) ६.
रात्रौ छन्नेन ४२.
रामेण भुक्तां (इन्द्रवज्रा) ३७.
रिपूणां सैन्यभे ६१.
रुद्रबाणावली ९४.
लङ्घयित्वा १०६.
लतया सक्तया ११.
वनं सवृक्षक्षु (उपेन्द्रवज्रा) ,,.
वयं व्यपाश्रित्य (उपजातिः) १०८.
वर्षेण वा वर्षे (इन्द्रवज्रा) ४०.
वल्मीकमूलाद् (उपजातिः) ९.
विशालवक्षास्त (वंशस्थं) ८०.
शकटी च घृता ८.
शुष्केणैकेन वृ १०.
शून्यमित्यभिधा ३८.
शूराणां सत्यस ९५.
शौण्डीर्यं धृतिवि (प्रहर्षिणी) ८७.
श्मशानाद्धनुरा ९२.
सज्जैश्चापैर्बद्ध (शालिनी) ५३.
सयौवनः श्रेष्ठ (वंशस्थं) ७३.
सरथतुरग (पुष्पिताग्रा) ८६.
सर्वैरन्तःपुरैः ३.
सहजौ मे प्रहरणं ८८.
सुग्भाण्डमरणीं १२.
हन्त सर्वे प्रस ११४.
हितमपि परु (मालिनी) ३२.
हुतप्रवेगो यदि (वंशस्थं) १०७.


## वृत्तलक्षणम् ।

'स्यादिन्द्रवज्रा यदि तौ जगौ गः ।'
'उपेन्द्रवज्रा जतजास्ततो गौ ।'
} अनयोर्मेलनादुपजातिः काचित् ।

'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा ।'

'म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ।'

'ननमयययुतेयं मालिनी भोगिलोकैः ।'

'जतौ तु वंशस्थमुदीरितं जरौ ।'

'उक्तं वसन्ततिलकं तभजा जगौ गः ।'

'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।'

'शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ।'

'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।'

'सुवदना म्रौ भ्नौ य्भौ लागृषिस्वरर्तवः ।' (पिङ्ग० ७, २२)

# समवकारादिलक्षणम् ।

समवकारः — "यत्रामुखं नाटकवत् सन्धयो मर्शवर्जिताः ।
नेतारो द्वादश पृथक्फला देवासुरादयः ॥
वीरप्रधानाश्च रसास्त्रयोऽङ्कास्तेषु च क्रमात् ।
वस्तुस्वभावदैवादिकृताः स्युः कपटास्त्रयः ॥
प्रथमेऽङ्के निबन्धव्या कथा यामत्रयावधिः ।
यामावधिर्द्वितीयेऽङ्के तृतीयेऽङ्केऽर्धयामिका ॥
असौ समवकारः स्याद् वीथ्यङ्गैः कैश्चिदन्वितः ॥"

पूर्वरङ्गः — "यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥"

नान्दी — "आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥"

सूत्रधारः — "आसूत्रयन् गुणान् नेतुः कवेरपि च वस्तुनः ।
रङ्गप्रसाधनप्रौढः सूत्रधार इहोदितः ॥"

नेपथ्यम् — "कुशीलवकुटुम्बस्य स्थलं नेपथ्यमुच्यते ।"

प्रस्तावना स्थापना वा — "सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् ।
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत् तदामुखम् ॥
प्रस्तावना वा"

शुद्धमिश्रविष्कम्भौ — "वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥
एकानेकगतः शुद्धः सङ्कीर्णो नीचमध्यगैः ।"

प्रवेशकः — "तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः । प्रवेशः"

प्रकाश-स्वगते — "सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम् ।"

अपवारितम् — "रहस्यं कथ्यतेऽन्यस्य परावृत्यापवारितम् ।"

काञ्चुकीयः — "ये नित्यं सत्यसम्पन्नाः कामदोषविवर्जिताः ।
ज्ञानविज्ञानकुशलाः काञ्चुकीयास्तु ते स्मृताः ॥"

वीररसः — "विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः ।
नीतः सदस्यरस्यत्वमुत्साहो वीर उच्यते ॥"

# FOR SALE.

The Works of Bhasa with the commentaries

OF

Pandit T. Ganapati Sástri

| | | | |
|---|---|---|---|
| Svapnavâsavadatta | 1 | 8 | 0 |
| Pancharátra | 1 | 0 | 0 |
| Madhyamavyâyoga | 0 | 8 | 0 |

Pratijnâyaugandharâyana (in the Press)

*Can be had of:—*

**L. Ramaswamy Sastri,**

*Managing Proprietor,*

SRIDHARA PRINTING HOUSE.

**Trivandrum.**

# THE

# MADHYAMAVYÂYOGA

OF

# BHÂSA

with the commentary

OF

**PANDIT T. GANAPATI SÂSTRÎ**

Editor of the Trivandrum Sanskrit Series.

---

**Edited and Published by the Commentator.**

---

1917.

*All Rights Reserved.*] [PRICE 8 ANNAS.

PRINTED AT THE

SRIDHARA PRINTING HOUSE, TRIVANDRUM.

॥ श्रीः ॥

# मध्यमव्यायोगः

## महाकविश्रीभासप्रणीतः

अनन्तशयनसंस्कृतग्रन्थावलिप्रकाशनकार्याध्यक्षेण

### पण्डितगणपतिशास्त्रिणा

प्रणीतया व्याख्यया

समेतः

तेनैव संशोधितः प्रकाशितश्च ।

१९१७.

(एतद्ग्रन्थविषयाः सर्वेऽधिकाराः

व्याख्यातारमन्वायत्ताः ।)

मूल्यं ८ आणकाः ।

अनन्तशयने श्रीधराख्यमुद्रणयन्त्रालये
मुद्रितः ।

BY GRACIOUS PERMISSION

I DEDICATE

THE COMMENTARY ON THE MADHYAMAVYAYOGA OF

THE ILLUSTRIOUS BHASA

TO MY AUGUST SOVEREIGN

HIS HIGHNESS

SRI RAMA VARMA

G. C. S. I., G. C. I. E.,

MAHARAJA OF TRAVANCORE

WHOSE ENLIGHTENED MUNIFICENCE

AND APPRECIATION OF GIRVANA LEARNING

RECALLING THE BEST TRADITIONS

OF HIS RENOWNED HOUSE

HAVE AUSPICIOUSLY LED TO THE

RECOVERY CONSERVATION AND PUBLICATION

OF SO MANY OF OUR

# INTRODUCTION.

This is the second edition of the Madhyamavyâyoga, first published in 1912 in the Trivandrum Sanskrit Series. In the first edition which was based on a single manuscript, there was some doubt with regard to the authenticity of certain readings. This doubt has now been removed with the help of a second manuscript procured from Mr. Nilakanthan Chakyar of Manganam (near Kottayam in North Travancore). For the sake of students an easy commentary on the work has been added.

The work belongs to a class of Rûpakas called Vyâyoga, and is named Madhyama, after Bhîmasena, the hero who was well known by the name of Madhyama for reasons given in the work itself, (Vide sloka मध्यमोऽहं etc 28 et seq) or for the reason that he was the middle Pândava.

During their wanderings in consequence of their defeat in the gambling, the Pàndavas were for some time living near the forest of Hidimbâ. One day when all the other members had gone to attend a certain sacrifice at the hermitage of the great sage Dhaumya, leaving Bhîmasena alone to guard the Asrama, and when the latter was engaged in his usual outdoor exercises, Ghatotkacha, the son of Bhîma and Hidimbâ overtook and stopped an old Brahmin who was passing by with his wife and three sons.

"Give me one of your sons so that my mother may feed on him and break her fast" peremptorily demanded Ghatotkacha. At this terrible demand the father and mother in fear of wholesale destruction clung to the eldest and the youngest of the sons respectively out of partiality and showed their reluctance to part with them. The remaining second son, Madhyama by name, who was by nature very loving towards his parents and brothers, offered himself willingly to the Râkshasa in the hope of saving the others, and with his permission went to a pool near by to quench his thirst. The giant thinking that the Brahmin boy was delaying too long at the

pool and fearing that it was high time for his mother's dinner cried out more than once "Madhyama! come back, at once'. Bhîmasena who was in the exercise ground near by, having heard the call twice or thrice and taking it to be directed to himself hurried to the spot where the giant and the Brahmins were. Now when the Brahmin Madhyama also came up, the old Brahmin related to the Kshathriya Madhyama all his cause of fear and prayed to him for succour. Bhîmasena having assured the Brahmin all help and relief advised the giant more than once to let the Brahmin go. But the giant said "I will not, even by the word of my father, let this man go, when I have taken him in obedience to my mother's word, and being asked who his mother was, announced Hidimba to be his mother and Bhimasena to be his father. Now Bhîmasena offered to accompany the giant as a substitute for the Brahmin boy and set him free. Though Bhîmasena knew the giant to be his son, he did not reveal himself for he wished to test the valour of his son. With this object he said to him "I will not follow you, but if you can, take me by force where you will". Then there ensued a duel and he saw that his son, though not a match to himself, could battle the party of the Dhartarashtras. Pleased with this, he accompanied him, in fulfilment of his promise, to where Hidimba was. Welcomed and entertained by her with all the loving regards of a wife, he recognised her at once and remembered to her the many favours he had once received at her hands. When he asked her why she ordered the capture of a man, she explained to him in secret her real motive. Thus satisfied that she was faultless, he blessed his son who, having now known him to be his father, had prostrated before him. This, in brief, is the substance of the story which is the creation of the author round a hero well known to the Itihâsas. That Hidimba's only aim in ordering the capture of a man was the meeting of Bhîmasena and that she could not otherwise effect it, is made clear in commenting on the words of Bhîmasena, "जात्या राक्षसी न समुदाचारेण" (P.30.)

'The description here of the delight of Bhîmasena at his versation and duel with Ghatotkacha is as happy as that in

Pancharatra where Bhima and Arjuna are absorbed in the sweetness of Abhimanyu's words.

This Vyâyoga being one of the twelve Rûpakas which closely resemble Svapnavasavadatta must have the same author Bhâsa as Svapnavasavadatta itself. Who is this Bhasa? and what are the distinguishing marks of Bhasa's Svapnavâsava-datta? Let us consider the following utterances of Kâlidâsa, Bhattabana and Rajasekhara, 'प्रथितयशसा भाससौमिल्लकविपुत्रादीनाम्' (Malavikagnimitra Act I) 'सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः । सपताकै-र्यशो लेभे भासो देवकुलैरिव' ॥ (Harshacharita) 'भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम् । स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः' (Sûktimuktâvali). From the above passages we learn that there was a very ancient poet by the name of Bhasa that he was the author of many Natakas and that Svapnavasavadatta was one of them. It follows therefore that Svapnavâsavadatta must be distinctly marked by a close resemblance to certain other Natakas many in number, by qualities of expression and diction indicative of priority to the works of Kalidasa and thirdly by a plot appropriate to the name "Svapnavasavadatta."

Now let us examine whether these three distinguishing marks are found in our Nataka which has the name Svapna-vasavadatta written at the end. With regard to the first of these characteristics, even a cursory reading of the thirteen Natakas that have come into our ken cannot fail to convince one of their very close resemblance and this point has been dwelt on at some length in the introductions to Svapnavasavâdatta and Pancharâtra. That our Nâtaka possesses the second characteristic mark is indicated in the above introductions and also in the introduction to the Pratimânataka. This is obvious to those whose sense of the beautiful has been refined by the words and images of the great sages Valmiki and Vyâsa and who can perceive the shades of aesthetic difference in the sweet words and beautiful ideas of different poets. Who that is blessed with an aesthetic sense, who that tastes the unique natural flow of beauty that overflows the sound and sense of every passage and particularly of every short piece of

prose in these Natakas can for a moment doubt their priority to the works of Kalidâsa? Again the verse,

> 'नवं शरावं सलिलैः सुपूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम् ।
> तत्तस्य मा भून्नरकं स गच्छेद् यो भर्तृपिण्डस्य कृते न युध्येत् ' ॥

quoted as from another's work by Kautilya in his Arthasastra is in its proper place in the Nataka Pratijnayaugandharayana and can from its very nature be seen to be the poet's own. It is because it is appropriate only to a Kavya that Vamana who lived decidedly before Ânandavardhana the author of Dhvani, (in the chapter of his Kavyalankara devoted to the criticism of expressions used in Kavyas and Kavyas alone) takes up for consideration the fourth quarter of the verse, ' यो भर्तृपिण्डस्य कृते न युध्येत् " and attempts to justify the use of Parasmaipada therein. Hence Vamana must have known for certain that this verse belonged to a Kavya. Otherwise he would not have taken it for consideration right in the midst of expressions culled from Kâvyas alone. It follows therefore that Pratijnâyaugandharayana from which Chanakya quotes the verse and the other Natakas that are akin to it including of course Svapnavâsavadatta belong to a period much earlier than that of Chanakya and therefore earlier still than that of Kalidasa who is known to have lived long after Chanakya.

Considering the third distinguishing mark which our Nataka must be shown to bear before it could be identified with Bhasa's Svapnavasavadatta we have to look to the significance of the name "Svapnavasavadatta". It means that in this work Vasavadatta is seen or attended to (by Vatsaraja) in his dream. This is just what we learn from the conversation in the fifth Act of our Nataka where Vatsaraja brooding on the supposed loss of his Vasavadatta and beside himself with grief talks to her in his dream and she in all reality awake by his side, though not known to him listens to and responds to his lamenting words. Here in this dream Vâsavadatta fully perceives the great depth and intense sincerity of his ardent love and this knowledge nourishes and develops the prominent Rasa in her i. e. the sentiment of separation from her love, by

blowing her constant fire of love to burn with a greater blaze. It is in this dream that Vatsarâja enjoyed to his confounding surprise the sight and touch of the living Vâsavadatta, who, he belived, was all lost to him. Having considered the importance of the Svapna or dream we will now view the part played by Vâsavadatta. She is at once seen to be the chief heroine, courting adversity in the interests of her husband and undaunted by the troubles that beset her and ever skilfully vigilant to the purpose before her, she, the type of perfect womanhood, shines on high in the varied glory of her beauty, virtue, wisdom, fortitude and nobility Padmavati, on the other hand, plays but a subordinate part, the incidents associated with her being brought in only to brighten up the picture of the chief heroine. Thus we see that the name Svapnavasavadatta is most appropriate to a work wherein the incident of the Svapna and the character Vasavadatta are seen to be so important

As we have seen that our Nataka possesses the three characteristic marks which determine Bhasa's Svapnavasavadatta, it can indisputably be identified with that work. Hence with the help of this Nataka of ours which is Bhasa's Svapnavasavadatta itself we can test whether a particular verse or idea considered in any other work as taken from Svapnavasavadatta is actually so or not In the wide world of our Rhetoric Literature, there is but one verse, सञ्चितपक्ष्मकवाट नयनद्वार स्वरूप-तडनेन? । उद्घाट्य सा प्रविष्टा हृदयगृह मे नृपतनूजा ॥' considered as taken from Svapnavasavadatta and this verse occurs only in Dhvanyâlokalochana The verse neither finds nor can it find a place in the Svapnavasavadatta we have procured. Hence we conclude that the author of Lochana must have erroneously assigned the verse to Svapnavâsavadatta. A similar mistake is made by Somadeva in his Yasastilaka when he assigns to Bhasa the verse,

"पेया सुरा प्रियतमामुखमीक्षितव्य ग्राह्यः स्वभावललितो विकृतश्च वेषः ।
येनेदमीदृशमदृश्यत मोक्षवर्त्म दीर्घायुरस्तु भगवान् स पिनाकपाणिः ॥"

which ought to have been correctly assigned to Mahendra Vikrama Varman I.

We have but one instance of reference made in other works to the subject-matter of Svapnavâsavadatta. In Amaratîkâ Sarvasva, we find the passage, "आद्यो यथा —— नन्दयन्त्यां ब्राह्मणभोजन द्वितीयः स्वदिशमात्मसात्कर्तुमुदयनस्य पद्मावतीपरिणयोऽर्थशृङ्गारः, तृतीयः स्वप्नवासवदत्ते तस्यैव वासवदत्तापरिणयः कामशृङ्गारः" (vide Amaratîkâsarvasva part I. P. 147, Trivandrum sanskrit series) where the three kinds of Sringara (i. e. of the sentiments of love) based respectively on Dharma (duty), Artha (material object, wealth or possession) and Kama (Love) are illustrated, the first by reference to a work called Nandayantî and the second and third by reference to Svapnavasavadatta The meaning of the passage is that in Svapnavasavadatta the marrying of Padmâvatî is described as prompted by the motive of winning back a kingdom and is therefore a case of Artha Sringâra while the marrying of Vâsavadatta already accomplished was prompted by mere love for love's sake and is a case of Kâma Sringâra. If, in the passage, we take the reference to Svapnavasavadatta as applying to Kâma Sringara alone, we should then say that the author of the Tîkasarvasva having given the reference in the first and third cases has omitted it in the second case which amounts to making him faulty of giving defective information and of dissimilar treatment of similar subjects And the plot of our Svapnavâsavadatta which bears the distinctive marks noticed shows unmistakably that both the Artha and Kama Sringaras are referred to by him. This meaning of his which of course is the meaning of the passage will, we think, be made still clearer if the order of the words तृतीयः and स्वप्नवासवदत्ते in the passage be exchanged

Trivandrum
17-4-1917

T GANAPATI SÂSTRÎ,

# उपोद्घातः।

अनन्तशयनसंस्कृतग्रन्थावलौ १९१२ तमे हायने द्वाविंशाङ्कतया प्रकाशितस्य मध्यमव्यायोगस्येदं द्वितीयं संस्करणम्। एकमातृकाश्रयेण कृते प्रथमेऽस्य संस्करणे पाठसन्देहाः कतिपये स्थिताः। तेऽस्मिन् द्वितीये संस्करणे माक्कानत्तास्तव्यनीलकण्ठशाक्यार्महाशयस्य सकाशात् प्रपूर्वतरे हायने लब्धस्य द्वितीयादर्शस्य साहाय्येन निरस्ताः। व्युत्पित्सूपकाराय ललितं व्याख्यानमप्यत्र संश्लेषितम्। अथ मध्यमसंज्ञो व्यायोगो नाम रूपकभेदः। पाण्डवमध्यमत्वनिरूढेन 'मध्यमोऽहम्' (श्लो० २८) इत्याद्युक्तबहुप्रकारमध्यमत्वयोगसिद्धेन वा मध्यमनाम्ना प्रसिद्धो भीमसेनोऽत्र नायक इति तत्प्रधानत्वाद् ग्रन्थो मध्यमशब्देन व्यपदिश्यते।

द्यूतपराजयनिमित्तवनवासप्रसङ्गात् क्वचन तपोवने हिडिम्बावननेदिष्ठे वसत्सु पाण्डवेषु स्वाश्रमे भीमसेनमेकं तत्पालनाय स्थापयित्वा यज्ञानुभवार्थं महर्षेर्धौम्यस्याश्रमं प्रति प्रोषितेषु, कदाचिद् भीमसेने च तपोवनबाह्यायां वनभूमावेकाकिनि दैनन्दिनं व्यायामपरिचयं कुर्वाणे व्यायामभूम्यभ्यर्णसरण्या गच्छन्तं कमपि वृद्धविप्रपान्थं दारपुत्रत्रयानुयातं घटोत्कचो नाम राक्षसो भीमसेनसूनुरनुगम्य रुरोध। 'मन्मातुर्हिडिम्बाया उपवासाङ्गाहारार्थं त्रिषु तव पुत्रेष्वेकं मह्यमर्पय' इति च तर्जयामास। अथ सर्वनाशभीताभ्यां मातापितृभ्यां चरमप्रथमयोः पुत्रयोः प्रियत्वेन परिगृहीतयोर्द्वितीयः पुत्रो मध्यमनामा राक्षसग्राह्यतया परिशिष्टः। स च प्रकृत्या पितृभ्रातृवत्सलस्तद्रक्षार्थमात्मत्यागमिष्टमेव मन्यमानः पिपासाप्रतीकारार्थमदूरवर्तिनं कमपि जलाशयं राक्षसानुमत्या गतः। राक्षसो गतं तं चिरायमाणमिव मत्वा मातुराहारकालातिक्रमशङ्कया 'भो मध्यम! मध्यम! शीघ्रमागच्छ' इत्युच्चैरसकृदाह्वयति स्म। व्यायामभूमेरभ्यर्णतरतया तस्मिन्नाह्वानशब्दे द्वित्रिः श्रुते भीमसेन आत्मानमेव पाण्डवमध्यमत्वनिरूढेन मध्यमनाम्नाहूयमानं मत्वा झटिति तं देशमाससाद, यत्रासौ राक्षसो विप्राश्च। विप्रमध्यमेऽप्यनुपदमागते वृद्धो राक्षसादुत्पन्नमात्मभयं सर्वं शंसन् क्षत्रियमध्यमम् अभयमयाचत। स चाभयं तस्मै दत्त्वा ब्राह्मणमोचनाय राक्षसमसकृदुपदिदेश। अथ राक्षसो 'मातृशासनगृहीतमिमं मानुषं पितुरपि वाक्यान्न मुञ्चेयम्' इति वदन् 'का ते माता' इति पृष्टो हिडिम्बामात्मनो मातरं भीमसेनं च पितरं जगाद। भीमस्तु आत्मानं राक्षसानुगामिनं प्रतिज्ञाय विप्रमध्यमं राक्षसान्मोचयामास। न त्ववगतेऽपि राक्षसस्य स्वपुत्रत्वे

तं प्रत्यात्मानं प्रकाशितवान् । अथानुगन्तव्ये स्वपुत्रे स तद्बलपरीक्षणेच्छया तमवादीत् — 'शक्तश्चेद् बलात्कारेण मा नय' इति । ततस्तयोर्युद्धे प्रवृत्ते प्रत्यक्षितेन स्ववीर्यात् किञ्चिदवरेणापि धार्तराष्ट्रपक्षप्रतिक्षेपक्षमेण स्वपुत्रस्य वीर्येण स परितुष्टः समयानुसारात् तमनुगच्छन् हिडिम्बाया अन्तिकमाससाद । हिडिम्बया भार्योचितेन समुदाचारेण सम्भाव्यमानो दर्शनेन तां स्वभार्येति प्रत्यभिज्ञाय पूर्वोपकारस्मरणपूर्वं बहुमेने, मानुषग्रहणप्रयोजनेन तया पृष्ट्या रहसि निवेदितेन तां निर्दोषामवधार्य तुतोष, मातृवाक्याच्चात्मानं पितरं विज्ञायाभिवादयमानं पुत्रमाशिषाभिननन्द । तदेतदितिहासप्रसिद्धनायकाश्रयमीदृशमिह कविकल्पितं कथावस्तु द्रष्टव्यम् । यथा तु हिडिम्बयात्मकारितस्य मानुषग्रहणस्य भीमसेनसमागम एवानन्यथासिद्धं प्रयोजनमभिसंहितम्, तथा 'जात्या राक्षसी, न समुदाचारेण' (पृ० ३९)इति भीमसेनवाक्यव्याख्यावसरे सम्यङ् निरूपितम् ।

पञ्चरात्रे अभिमन्युवाचालनेन यथा भीमार्जुनयोः कौतुकनिर्वेशः, तथात्र घटोत्कचवाचलनाभियोधनाभ्यां भीमस्य कौतुकनिर्वेशो निपुणमुपवर्णितः ।

अस्य व्यायोगस्य स्वप्नवासवदत्तसौभ्रात्रभाजनेषु द्वादशसु रूपकेष्वन्यतमत्वात् स्वप्नवासवदत्तकविरेतत्रभवान् भास एव प्रणेतेति निश्चयः । अथ कोऽसौ भासः ? किंलक्षणं पुनस्तत्प्रणीतं स्वप्नवासवदत्तं भवितुमर्हतीति चेद्, उच्यते — 'प्रथितयशसां भाससौमिल्लकविपुत्रादीनाम्' (मालविका० १) इति कालिदासस्य, 'सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः । सपताकैर्यशो लेभे भासो देवकुलैरिव ॥' (हर्षच० १) इति भट्टबाणस्य, 'भासनाटकचक्रेऽपि च्छेकैः क्षिप्ते परीक्षितुम् । स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ॥' (सूक्तिमुक्ता०) इति राजशेखरस्य च सूक्तेः पर्यालोचनया भासनामा कश्चित् पुराणः कविरासीदिति, तेन निर्मितानि नाटकानि बहूनीति, तेषु स्वप्नवासवदत्ताख्यमन्यतममिति च लोकस्यावगतम् । तेन च बहुनाटकसहजन्मता, कालिदासप्राचीनत्वानुरूपगुणसम्पन्नता स्वप्नवासवदत्ताभिधानयोग्यत्वमित्याश्रयतेत्येवमात्मकधर्मत्रययोगित्वं नाम स्वप्नवासवदत्तस्य लक्षणं पर्यवसितम् । तदेतदस्मदीये नाटकविशेषे ग्रन्थान्तलिखितस्वप्नवासवदत्ताभिधानेऽस्ति न वेति परीक्षणीयम् । तत्र प्रथमधर्मयोगस्तावदस्मदुपलब्धरूपकत्रयोदशकसङ्कान्तिगदपाठमात्रादपि सुज्ञानः स्वप्नवासवदत्तस्य पञ्चरात्रस्य चोपोद्घाते निरूपितश्च । द्वितीयधर्मयोगस्तत्र च प्रतिमानाटकोपोद्घाते च सामान्यतो विशेषतश्च दिक्प्रदर्शनभङ्ग्या वर्णितः, श्रीवाल्मीकिवेदव्यासादिमहर्षिभाषितभावनापरिपक्वधिया वाक्यवाक्यार्थचारुतान्तरवेदिनां

सचेतसा प्रत्यक्षसिद्धश्च । को हि नाम सहृदयः **स्वप्नवासवदत्तादिनाटक**चक्रेऽस्मिन् सर्वेषु वाक्येषु, विशेषेण चूर्णकेषु गच्छतोऽर्थतश्च परिवहन्तीमकृत्रिमामनन्यत्रदृष्टां लोकोत्तरां सौन्दर्यलहरीमास्वादयन्तस्य **कालिदास**प्राचीनत्वे सन्दिह्यात् । किञ्च, योऽयं 'नवं शरावं सलिलैः सुपूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम् । तत् तस्य मा भून्नरकं स गच्छेद् यो भर्तृपिण्डस्य कृते न युध्येत् ॥' इति श्लोकः **कौटिलीयार्थशास्त्रे** (अधि० १० अध्या० ३) परकीयतयोदाहृतः, स **प्रतिज्ञायौगन्धरायणे** दृश्यकाव्ये सन्निविष्टस्तत्कवेरेव स्वोक्तिरिति स्वरसात् प्रतीतः, तस्य काव्यप्रभवत्वनिश्चयादेव च ध्वनिकारानन्दवर्धनप्राचीनो **वामनः** काव्यानुशासनात्मकस्य काव्यालङ्कारस्य काव्यप्रयोगमात्रसाधुत्वविचारपरे प्रायोगिकाधिकरणे 'यो भर्तृपिण्डस्य कृते न युध्येत्' इति तच्चतुर्थपादमुपादाय तद्गततिङन्तप्रयोगसाधुत्वसमर्थनाय सरम्भवान्, तस्याकाव्यप्रभवत्वे तु पुरस्तात् परस्ताच्च काव्यप्रयोगमिव व्यसनितया सस्मरन स मध्ये त नैवोपाददीत । अतश्च त श्लोकं प्रमाणयतश्चाणक्यात् तदलङ्कृतस्य **प्रतिज्ञायौगन्धरायणस्य** प्रतिज्ञायौगन्धरायणसहसुवां **स्वप्नवासवदत्तादीनां** च प्राचीनत्वे सिद्धे चाणक्यपरमार्वाचीनकालिदासप्राचीनत्वं सुतरां सिद्धम् । तृतीयधर्मयोगः पुनरत्यन्तपरिस्फुटः, स्वप्नदृष्टा स्वप्नसम्भाविता वा वासवदत्तात्रेति व्युत्पत्तेः । **वासवदत्ता**पायधीदुःस्थेन **वत्सराजेन** जातु तां प्रति स्वप्नायमानेन स्वपार्श्वे जागरूका सत्य**वासवदत्ता** स्वप्नप्रवृत्ताभ्यामभिभाषणप्रसादनाभ्यां सम्भाविनेति हि पञ्चमाङ्कघटितात् स्वप्नजागरसंवादादवगम्यते । स खलु रमणीयः स्वप्नः प्रियतमप्रेमसर्वस्वचिह्नं **वासवदत्ता**गतस्य प्रवासविप्रलम्भशृङ्गारस्य प्रधानरसस्य तत्स्थायिरतिभावसमुद्दीपनद्वारेण परमः परिपोषको नायकस्याप्रतवयस्यवासवदत्तासम्पर्कादिसाधकश्चेति प्रधानं **वासवदत्ता** च देवी स्वभर्तृश्रेयोर्थाङ्गीकृतनानानर्थजाता रूपशीलप्रज्ञाधैर्यादार्यवदान्यखनिः स्त्रीरत्नमातृकेति प्रधाननायिका । **पद्मावती** तु न प्रधाना, तत्सम्बन्धानां भूयसां व्यवहाराणां वासवदत्तागुणप्रकाशनार्थत्वेन पराङ्गत्वात् । अतस्तावेव प्रधानार्थावाश्रित्य प्रवृत्तमिदं **स्वप्नवासवदत्ता**भिधानमत्यन्तमुपपन्नम् ।

एवं यथोक्तधर्मत्रययोगित्वान्नाटकविशेषस्य **स्वप्नवासवदत्तत्वे** वज्रलेपायिते तत्संवादविसंवादाववष्टभ्य तदीयत्वातदीयत्वे पद्यानाम् अर्थविशेषाणां वा **स्वप्नवासवदत्त**नाम्ना ग्रन्थान्तरेषु स्मृतानां निर्णेतव्ये इतीयं न्यायसरणिः । **स्वप्नवासवदत्तनाम्ना** स्मृतं तु पद्यमतिमहति साहित्यप्रपञ्चेऽस्मिन् **ध्वन्यालोकलोचने** एकस्मिन्नेवैकमेव 'सञ्चितपक्ष्मकवाटं नयनद्वारं स्वरूपताडनेन । उद्घाट्य सा प्रविष्टा

हृदयग्राही मे नृपतनूजा ॥' (उ० ३.) इत्येवंरूपमुपलभ्यते, तस्योपलब्धस्वप्नवासवदत्तग्रन्थविसंवादादतदीयमेवेति निर्णयः। **लोचनग्रन्थे** स्वप्नवासवदत्तलेखनं पुनर्गोत्रस्खलनमेव केवलं, यथा 'पेया सुरा प्रियतमामुखमीक्षितव्यं ग्राह्यः स्वभावललितो विकृतश्च वेषः। येनेदमीदृशमदृश्यत मोक्षवर्त्म दीर्घायुरस्तु भगवान् स पिनाकपाणिः ॥' इति मत्तविलासप्रहसनश्लोकमधिकृत्य 'महेन्द्रस्ये'ति लेख्ये भासस्येति नामलेखनं सोमदेवयशस्तिलके गोत्रस्खलनं, तद्वत्।

अर्थविशेषश्चैकः एवार्थशृङ्गारकामशृङ्गारनिमित्तसमावेशरूपोऽमरटीकासर्वस्वे एकस्मिन् 'आद्यो यथा नन्दयन्त्यां ब्राह्मणभोजनं, द्वितीयः स्वादिशमात्मसात्कर्तुमुदयनस्य पद्मावतीपरिणयोऽर्थशृङ्गारः, तृतीयः स्वप्नवासवदत्ते तस्यैव वासवदत्तापरिणयः कामशृङ्गारः.' (अनन्तशयनसं० ग्रन्थाङ्क ३८ पृ १४७) इति स्वप्नवासवदत्तनाम्ना स्मृत उपलभ्यते। अनेन हि वाक्येन धर्मार्थकामभिन्नत्रिविधशृङ्गारमध्ये आद्यस्य धर्मशृङ्गारस्य व्यपदेशनिमित्तं नन्दयन्त्याख्यग्रन्थे व्युत्पाद्य द्वितीयतृतीययोरर्थशृङ्गारकामशृङ्गारयोर्व्यपदेशनिमित्तमेकस्मिन्नेव स्वप्नवासवदत्ताख्यग्रन्थेऽस्तीति प्रदर्श्यते। **स्वप्नवासवदत्ते** राज्यसिद्धिप्रयोजनः **पद्मावतीपरिणयो** वर्ण्यमानोऽर्थशृङ्गारव्यवहारनिमित्तं कामप्रयोजनस्तु पूर्वसिद्धो वासवदत्तापरिणयः (वासवदत्ताप्रणय एव वा) कामशृङ्गारव्यवहारनिमित्तमित्येव हि तद्वाक्याभिप्रायः। अन्यथा हि **स्वप्नवासवदत्तस्य** कामशृङ्गारमात्रसम्बन्धित्वे धर्मकामशृङ्गारयोराद्यन्तयोराश्रयग्रन्थौ निर्दिश्य मध्यमस्यार्थशृङ्गारस्य परम् आश्रयग्रन्थं टीकासर्वस्वकारो न निर्दिष्टवानिति न्यूनता वैरूप्यं च स्यात्। अस्ति च यथोक्तलक्षणेऽस्मत्स्वप्नवासवदत्तेऽर्थशृङ्गारकामशृङ्गारनिमित्तयोः सम्प्रत्ययः इत्यतस्तदेव **टीकासर्वस्वकारेण** स्मृतमिति निर्णयः। **टीकासर्वस्ववाक्यस्य** चावश्यप्रतिपत्तव्य एव यथोक्तोऽर्थस्तद्गततृतीयपदस्वप्नवासवदत्तपदयोः पौर्वापर्यविपर्ययपाठे स्पष्टतरो भवतीति तं पाठमादर्तव्यतरं मन्यामहे ॥

**अनन्तशयनम्**
१७-४-१९१७

**त. गणपतिशास्त्री.**

# पात्राणि ।

वृद्धः = ब्राह्मणः केशवदासनामा ।

प्रथमः = वृद्धस्य ज्येष्ठः पुत्रः ।

द्वितीयः = वृद्धस्य द्वितीयः पुत्रो मध्यमनामा ।

तृतीयः = वृद्धस्य कनिष्ठः पुत्रः ।

ब्राह्मणी = वृद्धस्य भार्या ।

घटोत्कचः = राक्षसो हिडिम्बाभीमसेनयोः सूनुः ।

भीमसेनः = मध्यमः कुन्तीपुत्रः ।

हिडिम्बा = राक्षसी भीमसेनस्य पत्नी ।

॥ श्रीः ॥

श्रीगणेशाय नमः ।

महाकविश्रीभासप्रणीतः

# मध्यमव्यायोगः

गणपतिशास्त्रिप्रणीतया व्याख्यया समेतः ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

**सूत्रधारः**—

पायात् स वोऽसुरवधूहृदयावसादः पादो हरेः कुवलयामलखड्गनीलः ।
यः प्रोद्यतस्त्रिभुवनक्रमणे रराज पद्मसङ्क्रम इवाम्बरसागरस्य ॥ १ ॥

वन्देऽहं विघ्नराजं च वाग्देवीं च पुनः पुनः ।
पूर्यन्ते यत्कृपालेशान्मङ्क्षु नम्रमनोरथाः ॥ १ ॥

ग्रन्थानां ये सुवर्णानामकर्कशमनीरसम् ।
तन्वन्ति निकषं चेतस्ते जयन्ति सचेतसः ॥ २ ॥

श्रीभासरूपकस्तोमे नानारससमाश्रये ।
व्याख्यां मध्यमसञ्ज्ञस्य व्यायोगस्य विदध्महे ॥ ३ ॥

अथ श्रीवाल्मीकिव्यासदेश्यस्तत्रभवान् भासो मध्यमव्यायोगमारिप्सुः प्रयोगसम्यक्त्वादिसिद्ध्यर्थं मङ्गलश्लोकपाठं सूत्रधारेण रङ्गे प्रयोजयितुमादौ सूत्रधारं प्रवेशयति—नान्द्यन्ते ततः प्रविशति सूत्रधार इति । नान्द्यन्ते नन्दिरानन्दः, तस्या इयं नान्दी गीतवाद्यवादनादिरूपा क्रिया, तस्या अन्ते अवसाने । सा हि प्रयोगारम्भात् प्राग्देवतापरिषदानन्दार्थमनुष्ठीयते । यद्यप्युक्तव्युत्पत्त्या देवस्तावकमङ्गलश्लोकपाठोऽपि नान्दी भवति, तथापि सा श्लोकनान्दी सत्काव्यरूपत्वाद् रङ्गप्रयोगयोग्या रङ्ग एव प्रयोक्ष्यत इति तदतिरिक्तैव नान्दीह ग्राह्या । ततः तदनन्तरं गीतवाद्यवादनादिक्रियापरिसमाप्त्यव्यवहितोत्तरकाले इत्यर्थः । सूत्रधारः सूत्रं प्रयोगानुष्ठानं धारयति निर्वाहयतीति सूत्रधारः । प्रविशति, अर्थाद् रङ्गम् ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि ।

---

प्रविष्टः सूत्रधारो मङ्गलमाचरति — पायादिति । असुरवधूहृदयावसादः असुरवधूनाम् असुरस्त्रीणां हृदयस्य अवसादः दुःखकरः अर्थात् तद्भर्तृविध्वंसनेन । कुवलयामलखड्गनील: कुवलयामल: नीलोत्पलविशुद्धः खड्गनील: असिश्यामश्च । विशेषणोभयपदकर्मधारयः । कुवलय नीलोत्पलम् अमलखड्गो मलापेतोऽसिः तद्वन्नील इति वा । हरेः, सः, पादः चरणः । वः पायाद् रक्षतात् । प्रकृतरूपकप्रयोगप्रेक्षणरूपाभीष्टसिद्ध्या योजयतादित्यर्थः । पादयोर्मध्ये स इति निर्दिष्टस्य पादस्य पादान्तरागोचरम् असुरवधूहृदयावसादकत्वोपपादक विशेषमाह — यः पादः । त्रिभुवनक्रमणे त्रैलोक्यमाने महाबल्याख्यासुरनिग्रहार्थारब्धसकलभुवनमानसमये इत्यर्थः । प्रोद्यतः ऊर्ध्वलोकमानार्थं प्रकर्षेणोत्क्षिप्तः सन् । अम्बरसागरस्य गगनरूपस्य समुद्रस्य । वैदूर्यसंक्रम इव वैदूर्येण स्वच्छनीलगुणयोगिना मणिविशेषेण निर्मितः सङ्क्रमो दुर्गसञ्चर इव । रराज शुशुभे । अत्र 'सागरस्य सङ्क्रम इवे'ति दुस्तरसमुद्रनिस्तारसाधनस्य संक्रमस्य कीर्तनेन कमपि कलत्रपुत्रत्रयानुयातं ब्राह्मणमरण्यपथिक घटोत्कचाख्यराक्षसोत्पादितात् सागरसरूपादत्याहितान्निस्तारितवतः संक्रमसरूपस्य भीमसेनस्य प्रकृतव्यायोगनायकस्य द्योतनं कृत वेदितव्यम् ॥ १ ॥

एवमाशिषाभिमुखीकृतान् सामाजिकान् प्रति उपक्रंस्यमानकथावस्त्वंशविज्ञापनं प्रतिजानीते — एवमित्यादि । एवम् अनेन बुद्धिस्थेन प्रकारेण । आर्यमिश्रान् पूज्यतमान् । विज्ञापनप्रतिज्ञाश्रवणसमनन्तरमेव सूत्रधारस्येङ्गितं गृहीत्वा तद्विज्ञाप्यवस्तुप्रयोगोपक्रमसूचकः शब्दो नेपथ्ये समुत्थापितः । सूत्रधारस्तु अस्याशयाज्ञानाभिनयचमत्कारेण तटस्थ इव तं शब्दं गृह्णन्नाह — अये इत्यादि । अये इति विषादे कोपे वा । स च शब्दे विज्ञापनविघ्नत्वबुद्ध्यभिनयात् । किन्नु खलु किं कारणम् । मयि विज्ञापनव्यग्रे सति विज्ञापनव्यासक्तमात्रे सति । शब्द इव विशेषाकारेणानिश्चितः शब्दः, इवपदस्यानिश्चयार्थत्वात् । अङ्गेति संबोधने । तच्च सामाजिकविषयम् । अङ्गेति प्रातिलोम्ये वा; शब्दो हि विज्ञापनसमाप्तिविघातित्वात् प्रतिलोम इति तद्गतं प्रातिलोम्यं सूत्रधारेणानुसन्धीयते । पश्यामि शब्दस्य विशेषाकारं निमित्तं च परीक्ष्य ज्ञास्यामि ॥

(नेपथ्ये)

भोस्तात ! कोनुखल्वेषः ।

**सूत्रधारः**—भवतु विज्ञातम् ।

भोःशब्दोच्चारणादस्य ब्राह्मणोऽयं न संशयः ।
त्रास्यते निर्विशङ्केन केनचित् पापचेतसा ॥ २ ॥

(नेपथ्ये)

भोस्तात ! कोनुखल्वेषः ।

**सूत्रधारः**—हन्त दृढं विज्ञातम् । एष खलु पाण्डवमध्यमस्यात्मजो हिडिम्बारणिसम्भूतो राक्षसाग्निरकृतवैरं ब्राह्मणजनं वित्रासयति । भोः ! कष्टं कष्टं खलु पत्नीसुतपरिवृतस्य ब्राह्मणस्य वृत्तान्तः । अत्र हि,

---

शब्दस्य विशेषाकारनिश्चयाय श्रवणापेक्षाया तस्य नेपथ्ये प्रवृत्तिं कविः स्ववाक्येन सूचयति—**नेपथ्य** इति । वक्ष्यमाणाकारः शब्दो नेपथ्ये प्रवृत्त इत्यर्थः। शब्दस्याकारमाह—**भोस्तातेति** । भो इति विषादे । हे तात ! पितः ! । एषः सन्निकृष्टो विषादोत्पादयिता पुरुषः । कोनुखलु जातिकुलादिधर्मैरविज्ञातो मया जिज्ञास्यत इत्यर्थः, किंशब्दस्याज्ञातार्थत्वात् नुशब्दस्य च जिज्ञासार्थत्वात् ॥

**भवत्विति** । भवत्विति निपातोऽसूयापूर्वेऽङ्गीकारे । स च वक्ष्यमाणेऽर्थे पापत्वमनुसन्धाय । विज्ञातमिति श्लोकान्वयि ।

**भोश्शब्देति** । अस्य भोस्तातेत्यादि वदतः पुरुषस्य । भोश्शब्दोच्चारणाद् भोश्शब्दस्य विषादार्थस्य उद्घोषणात् । विज्ञातम् अर्थान्नेपथ्योत्थशब्दस्य निमित्तम् । तद् विवृणोति—अय ब्राह्मणः, निर्विशङ्केन निर्भयेन । पापचेतसा पाप दुरिताभिनिवेशि चेतो हृदय यस्य तेन तथाभूतेन । केनचित्, त्रास्यते भीष्यते । न संशयः अस्मिन्नर्थे सन्देहो नास्ति ॥ २ ॥

इत्थं शब्दनिमित्तविषय सामान्यज्ञानमभिनीय तस्मिन्नेव शब्दे नेपथ्यात् पुनरुत्थिते तद्विषयं विशेषज्ञानमभिनयन् विशेषं विवृणोति—हन्तेत्यादि । हन्तेति विषादे । दृढं सम्यक् । विज्ञातम्, शब्दनिमित्तं तद्गतयावद्विशेषाकारेणावगतमित्यर्थः । एष खल्वित्यादिवाक्येन विशेषाकारविवरणम् । पाण्डवमध्यमस्य पाण्डवेषु पञ्चसु मध्यमस्य । यद्यपि भीमार्जुननकुलास्त्रयोऽपि मध्यमाः, तथापि [illegible]-

श्रान्तैः सुतैः परिवृतस्तरुणैः सदारो वृद्धो द्विजो निशिचरानुचरः स एषः ।
व्याघ्रानुसारचरितो वृषभः सधेनुः सन्त्रस्तवत्सक इवाकुलतामुपैति ॥ ३ ॥

(निष्क्रान्तः ।)

स्थापना ।

---

म्याद् भीमसेन इह मध्यमो गृह्यते । हिडिम्बारणिसम्भूतः हिडिम्बायास्तदभिख्याया राक्षस्या एव अरणेः अग्निनिर्मन्थकाष्ठात् सम्भूतः । राक्षसाग्निः राक्षस एवाग्निः सन्तापकत्वात् । स च घटोत्कचः । अकृतवैरम् अकृतविरोध निरपराधमित्यर्थः । वृत्तान्तः अवस्था ॥

श्रान्तैरिति । श्रान्तैः वनाध्वसञ्चारखिन्नैः । श्रान्त इति वा पाठः । तरुणैः, सुतैः, परिवृतः, सदारः सकलत्रः । वृद्धः, निशिचरानुचरः निशिचरो राक्षस. अनुचरः अनुगन्ता यस्य स तथाभूतः । स एषः द्विजः ब्राह्मण· । व्याघ्रानुसारचरितः व्याघ्रेण हिंस्रमृगविशेषेण अनुसारचरितः अनुगतः । सधेनु· धेनुर्नवप्रसूता गौः तया सहितः । सन्त्रस्तवत्सकः भीततर्णकः । वृषभः महोक्ष इव । आकुलताम् उद्विग्नत्वम् । उपैति प्राप्नोति । उपमालङ्कारः । इह स एष इत्यस्य स्थाने 'सरोष.' इति मातृकान्तरे पाठः ॥ ३ ॥

इत्थं नेपथ्योत्थशब्दविवरणभङ्गया विज्ञाप्यविज्ञापने निर्वृत्ते सूत्रधारस्य निष्क्रमणमाह—निष्क्रान्त इति । स्थापनेति । ईदृशकथावस्तुवशस्य स्थापनात् स्थापना । स्थापना प्रस्तावनेति पर्यायौ । अस्य रूपकस्य मध्यम इति सञ्ज्ञा 'मध्यमव्यायोगोऽवसित' इति ग्रन्थान्ते लेखनात् । नायकस्य भीमस्य बहुप्रकार मध्यमत्वं वक्ष्यते । तेन तन्नाम्नस्य व्यपदेशो युज्यते च । ख्यातोद्धतनायकत्वाद् वीररसत्वादस्त्रीनिमित्तसङ्ग्रामत्वादेकाङ्कत्वाद् बहुपुरुषयुक्तत्वाच्च रूपकमिद व्यायोग इत्युच्यते । यदाह धनिकः—'ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः । हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद्रसाः । अस्त्रीनिमित्तसङ्ग्रामो जामदग्न्यजये यथा । एकाहचरितैकाङ्को व्यायोगो बहुभिर्नरैः ॥'' (दशरू० ३) इति । कविः पुत्रस्य भासोऽनुमितः । यथा च तदनुमानसिद्धिः, तथा स्वप्नवासवदत्तोपोद्घाते निरूपणम् ॥

(ततः प्रविशति सुतत्रयकलत्रपरिवृतः केशवदासः पृष्ठतो घटोत्कचश्च ।)

वृद्धः — भोः ! कोनुखल्वेषः,

तरुणरविकरप्रकीर्णकेशो भ्रुकुटिपुटोज्ज्वलपिङ्गलायताक्षः ।
सतडिदिव घनः सकण्ठसूत्रो युगनिधने प्रतिमाकृतिर्हरस्य ॥ ४ ॥

प्रथमः — भोस्तात ! कोनुखल्वेषः ।

ग्रहयुगलनिभाक्षः पीनविस्तीर्णवक्षा
कनककपिलकेशः पीतकौशेयवासा ।
तिमिरनिवहवर्णः पाण्डरोद्वृत्तदंष्ट्रो
नव इव जलगर्भो लीयमानेन्दुलेखः ॥ ५ ॥

---

सूचित विशिष्ट ब्राह्मण तत्पृष्ठचारिण घटोत्कच च प्रवेशयति—ततः प्रविशतीत्यादि ।

भो इत्यादि । भो इति विषादे । कोन्वित्यादि श्लोकान्वयि ।

तरुणेति । तरुणरविकरप्रकीर्णकेशः तरुणस्य अवृद्धस्य बालस्येति यावत् । रवेः सूर्यस्य कराः किरणा इव प्रकीर्णाः असयतप्रसारिताः केशा यस्य स तथाभूतः । अरुणरवीति वा पाठः । भ्रुकुटिपुटोज्ज्वलपिङ्गलायताक्षः भ्रुकुट्या भ्रूवक्रिमणा यः पुटः सम्पुटाकारत्व तेन उज्ज्वले दीप्ते पिङ्गले कपिले आयते दीर्घे च अक्षिणी यस्य स तथाभूतः । सकण्ठसूत्रः कण्ठसूत्रेण कण्ठधार्येण स्वर्णाभरणविशेषेण प्रालम्बिकाजातीयेन सहितः । सतडिद् घन इव स्थितः विद्युत्सहितो मेघ इव स्थितः । श्यामत्वान्मेघसाम्यम् । तत्केशाक्षिकण्ठसूत्राणामारुण्यादिना तडित्साम्यम् । युगनिधने युगसहारे प्रवृत्तस्येति शेषः । हरस्य रुद्रस्य प्रतिमाकृतिः प्रतिकृतिस्वरूपः भीषणत्वात् । एषः सन्निकृष्टः पुरुषः । कोनुखलु ॥ ४ ॥

भोस्तातेत्यादि ।

ग्रहेत्यादि । ग्रहयुगलनिभाक्षः ग्रहाः कुजादयः ग्रहयुगलनिभे औज्ज्वल्याद् ग्रहयुग्मतुल्ये नयने यस्य सः । पीनविस्तीर्णवक्षाः पीन पीवर बलवद्वा विस्तीर्णं च वक्ष उरः यस्य स तथाभूतः । कनककपिलकेशः स्वर्णपिङ्गलकेशः । कपिशकेश इति ग्रन्थान्तरपाठे कपिशशब्दः कृष्णपीतवाची । पीतकौशेयवासाः पीत हरिद्राभं कौशेयवासः क्षौमवस्त्रं यस्य स तथाभूतः । तिमिरनिवहवर्णः तमःपुञ्जश्यामः ।

द्वितीयः — क एष भोः !

कलभदशनदंष्ट्रो लाङ्गलाकारनासः
करिवरकरबाहुर्नीलजीमूतवर्णः ।
हुतहुतवहदीप्तो यः स्थितो भाति भीम-
स्त्रिपुरपुरनिहन्तुः शङ्करस्येव रोषः ॥ ६ ॥

तृतीयः — भोस्तात ! कोनुखल्वयमस्मान् पीडयति,

वज्रपातोऽचलेन्द्राणां श्येनः सर्वपतत्रिणाम् ।
मृगेन्द्रो मृगसङ्घानां मृत्युः पुरुषविग्रहः ॥ ७ ॥

---

पाण्डरोद्वृत्तदंष्ट्रः पाण्डरे धवले उद्वृत्ते उत्क्षिप्ते दंष्ट्रे राजदन्तपार्श्वस्थौ दन्तौ यस्य स तथाभूतः । सन्निहितविशेषणद्वयाश्रयामुपमामाह — लीयमानेन्दुलेखः लीयमाना संश्लिष्यन्ती इन्दुलेखा चन्द्रलेखा यस्मिन् स तादृशः नवः नूतनः अनिर्वृष्टजलः श्याम इति यावत् । जलगर्भ इव मेघ इव स्थितः । एष कोनुखल्विति पूर्वेण सम्बन्धः । 'उद्वृत्त स्यात् त्रिषूत्क्षिप्ते' इति मेदिनी । 'तडित्पतिः पयोगर्भो नदनुर्मुदिरोऽम्बुभृद्' इति वैजयन्ती ॥ ५ ॥

क इत्यादि ।

कलभेति । कलभदशनदंष्ट्रः कलभदशनौ करिशावकदन्ताविव दंष्ट्रे यस्य स तथाभूतः । लाङ्गलाकारनासः लाङ्गलाकारा वक्राग्रत्वादिना हलसमानाकारा नासिका यस्य स तथाभूतः । करिवरकरबाहुः करिवरकर इव गजश्रेष्ठशुण्डेव बाहुर्यस्य स तथाभूतः । नीलजीमूतवर्णः नीलस्य जीमूतस्य मेघस्येव वर्णो यस्य सः । एष क इति पूर्वेण सम्बन्धः । हुतहुतवहदीप्तः हुतो दत्ताज्याद्याहुतिः हुतवहोऽग्निरिव दीप्तः तेजस्वी । अत एव भीमः भयङ्करः । स्थितः गमननिवृत्तः । यः, त्रिपुरपुरनिहन्तुः त्रिपुरासुरनगरध्वंसिनः । इदं विशेषणं रोषतीव्रत्वप्रतिपत्त्यर्थम् । शङ्करस्य हरस्य । रोष इव कोप इव । भाति शोभते । उपमालङ्कारः ॥ ६ ॥

भोस्तातेति । कोन्वित्यादि श्लोकान्वयि ।

वज्रेति । अचलेन्द्राणां गिरिवराणां । वज्रपातः कुलिशपातः कुलिशवत् पर्वतभेदनशक्त इत्यर्थः । सर्वपतत्रिणां सर्वपक्षिणाम् । श्येनः घातकत्वात् तत्तुल्यः । मृगसङ्घानां, मृगेन्द्रः सिंहः । अत एव पुरुषविग्रहः मृत्युः पुरुषमूर्तिर्मरणाधिष्ठातृदेवता । अयं पुरःस्थितः । कोनु अस्मान् पीडयतीति पूर्वेण सम्बन्धः । एतेनाऽस्य [illegible] पर्वतभेदनशक्तत्व प्राणिहिंसत्व ञ्चोक्तम् । [illegible] ॥ ७ ॥

**ब्राह्मणी**—(क) अय्य! को एसो अह्माअं सन्दावेइ ।

**घटोत्कचः**—भो ब्राह्मण! तिष्ठ तिष्ठ ।

किं यासि मद्भयविनाशितधैर्यसारो वित्रस्तदारसुतरक्षणहीनशक्ते! ।
तार्क्ष्याग्रपक्षपवनोद्धतरोषवह्नितीव्रः कलत्रसहितो भुजगो यथार्तः ॥ ८ ॥

भो ब्राह्मण! न गन्तव्यं न गन्तव्यम् ।

**वृद्धः**—ब्राह्मणि! न भेतव्यं न भेतव्यं पुत्रकाः! न भेतव्यम् । सविमर्शा ह्यस्य वाणी ।

**घटोत्कचः**—भोः! कष्टम् ।

---

(क) आर्य! क एषोऽस्मान् सन्तापयति ।

---

अय्येत्यादि । अह्माअ अस्मानित्यर्थः ॥

उद्धतसदृशमाह—भो इत्यादि ।

किं यासीत्यादि । वित्रस्तदारसुतरक्षणहीनशक्ते! वित्रस्तानां भीतानां दारसुतानां कलत्रपुत्राणां रक्षणे हीनशक्ते! अपेतसामर्थ्य! । मद्भयविनाशितधैर्यसारः मत्सकाशाद् भयं मद्भयं तेन विनाशितः धैर्यसारः धैर्यस्य स्थिरांशो यस्य स तथाभूतः । आर्तः पीडितः । त्वं, तार्क्ष्याग्रपक्षपवनोद्धतरोषवह्नितीव्रः तार्क्ष्यस्य गरुडस्य अग्रपक्षपवनेन पक्षाग्रजनितेन वातेन उद्धत उत्थापितः यो रोषवह्निः कोपाग्निः तेन तीव्रः तीक्ष्णः । कलत्रसहितः, भुजग इव सर्प इव । किं यासि मा गच्छेत्यर्थः । अत्र विशिष्टभुजगोपमया तस्य यादृशी पार्यवसानिकी गतिः, सैव तव भविष्यतीति सूचयति ॥ ८ ॥

वारितमपि गमनादनिवर्तमानं ब्राह्मणमुपलभ्याह—भो ब्राह्मणेत्यादि । भो इति बहुमानामन्त्रणम् । न गन्तव्य गन्तु न युक्तम् ॥

भो ब्राह्मणेति सबहुमानामन्त्रणेन मार्दवानुगुणया वाक्यकाका च घटोत्कचस्य धर्माधर्मविचारवत्तामनुमिमानः परिजनमाश्वासयति—ब्राह्मणीत्यादि । न भेतव्यम् अयमुत्कटमनर्थमुत्पादयिष्यतीति भयं ते मास्त्वित्यर्थः । हि यस्मात् कारणात् । अस्य, वाणी, सविमर्शा विमर्शः साध्वसाधुविचारः तद्युक्ता ॥

वृद्धोक्तसविमर्शवचनानुगुणां घटोत्कचस्य चिन्तामाह—भोः कष्टमिति ।

जानामि सर्वत्र सदा च नाम द्विजोत्तमाः पूज्यतमाः पृथिव्याम् ।
अकार्यमेतच्च मयाद्य कार्यं मातुर्नियोगादपनीतशङ्कम् ॥ ९ ॥

**वृद्धः** — ब्राह्मणि ! किं न स्मरसि, तत्रभवता जलक्लिन्नेन मुनिनोक्तम् — अनपेतराक्षसमिदं वनमप्रमादेन गन्तव्यमिति । तदेवोत्पन्नं भयम् ।

**ब्राह्मणी** — (क) किं दाणि अय्यो मज्झत्थवण्णो विअ दिस्सदि ।

**वृद्धः** — किं करिष्यामि मन्दभाग्यः ।

**ब्राह्मणी** — (ख) णं विक्कोसामो ।

---

(क) किमिदानीमार्यो मध्यस्थवर्ण इव दृश्यते ।

(ख) ननु विक्रोशामः ।

---

जानामीति । पृथिव्या भूलोके । द्विजोत्तमाः ब्राह्मणश्रेष्ठाः । सर्वत्र सर्वस्मिन् देशे । सदा च सर्वस्मिन् काले च । पूज्यतमा नाम अतिशयेन पूजनीया एव । जानामि उक्तमर्थं सम्यग् वेद्मीत्यर्थः । अद्य इदानीं । मया, एतत् बुद्धिस्थम् । अकार्यं गर्हितं कर्म । तच्च वक्ष्यमाण वृद्धादिष्वेष्वन्यतमस्य मातुराहारार्थं नयनम् । मातुः मज्जनन्याः । नियोगात् निदेशात् । अपनीतशङ्कं निश्शङ्कं यथा भवति तथा । कार्यं च कर्तव्यं च । चशब्दस्तुल्यकालयोगे । द्विजोत्तममाहात्म्यज्ञानसमकालमेव द्विजोत्तमनिधनानुकूलं मया चेष्टितव्यमापतितमित्यहो मम कष्टा दशेति भावः ॥ ९ ॥

ब्राह्मणीत्यादि । जलक्लिन्नेन तन्नाम्ना । अनपेतराक्षसम् अनपेताः अहीनाः राक्षसाः यस्मात् तत् । अप्रमादेन अवधानेन । तदेव भयं जलक्लिन्नवचनतर्कितमेव राक्षसभयम् उत्पन्नम् ॥

किमित्यादि । इदानीं विपत्समये । मध्यस्थवर्ण इव मध्यस्थः त्रिषु वर्णेषु मध्यगतो वर्णः अर्थात् क्षत्रियः स इव धीरव्यवहारित्वात् । अथवा मध्यस्थस्य उदासीनस्येव वर्णश्छाया यस्य स तथाभूत इव । तत्त्वं च उपस्थितविपत्प्रतीकारयत्नाकरणात् ॥

किं करिष्यामीति । किं करिष्यामि इच्छन्नपि वा कतमं यत्नमहमास्थास्ये इत्यर्थः । मन्दभाग्यः अल्पशुभादृष्टः ॥

नन्विति । नन्विति प्रतिवचने । विक्रोशामः शरणमुद्दिश्याक्रन्दामः ॥

प्रथमः — भवति ! कस्य वयं विक्रोशामः ।

इदं हि शून्यं तिमिरोत्करप्रभैर्नगप्रकारैरवरुद्धदिक्पथम् ।
खगैर्मृगैश्चापि समाकुलान्तरं वनं निवासाभिमतं मनस्विनाम् ॥ १० ॥

वृद्धः — ब्राह्मणि ! न भेतव्य न भेतव्यम् । मनस्विजननिवासयोग्यमिति श्रुत्वा विगत इव मे सन्त्रासः । शङ्के नात्रातिदूरेण पाण्डवाश्रमेण भवितव्यम् । पाण्डवास्तु,

युद्धप्रियाश्च शरणागतवत्सलाश्च दीनेषु पक्षपतिताः कृतसाहसाश्च ।
एवंविधप्रतिभयाकृतिचेष्टितानां दण्ड यथार्हमिह धारयितु समर्था ॥ ११ ॥

---

भवतीत्यादि । कस्येति सम्बन्धसामान्ये षष्ठी । कमुद्दिश्येत्यर्थः ।

इदं हीति । तिमिरोत्करप्रभैः तमस्स्तोमश्यामैः । नगप्रकारैः वृक्षभेदैः अवरुद्धदिक्पथ व्याप्तदिङ्मार्गं । खगैः पक्षिभिः । मृगैश्चापि समाकुलान्तर व्याप्तावकाश । मनस्विना प्रशस्तमनस्काना मुनीनामिति यावत् । मनसः प्राशस्त्य च विषयविरागतपोबलादियोगात् । निवासाभिमत निवासाय वसतये इष्ट, निवासस्थानत्वेनेष्ट वा । इद, वन, शून्य हि निर्जन हि । अस्मद्विक्रोशध्वनिश्रोतैव तावदिह जनो दुर्लभ इति भावः ॥ १० ॥

ब्राह्मणीत्यादि । श्रुत्वा मे सत्रासो विगत इव श्रवणानन्तर नाहं त्रस्यामि । एतद्वनवासिनो मनस्विन एव केचिदागत्यास्मान् राक्षसादस्माद् रक्षेयुरिति बुद्ध्येति भावः । इवशब्दो वाक्यभूषणम् । मनस्विविशेषाणा पाण्डवानामाश्रमोऽप्येतद्वनवर्ती ममावगत इत्याह — शङ्के इत्यादि । अतिदूरेण न भवितव्यमितीषद्दूरतोक्तिः ।

शक्ताश्च पाण्डवा अस्मान् रक्षितुमित्यभिप्रायेणाह — पाण्डवास्तु, युद्धेति । पाण्डवास्तु, युद्धप्रियाश्च, शरणागतवत्सलाश्च शरणागतेषु शरण त्वमेव मे रक्षक इति प्रपत्तिम् आगतेषु वत्सलाः स्निग्धाश्च । दीनेषु आर्तेष्वशरणागतेष्वपि । पक्षपतिताः पक्षपातिनः स्निग्धा इति यावत् । कृतसाहसाः कृतम् असकृन्निदर्शितं साहसं शूरकर्म यैस्ते तथाभूताः । एवंविधप्रतिभयाकृतिचेष्टितानाम् एवविधाना सन्निहितराक्षसप्रकाराणां प्रतिभयाकृतिचेष्टितानां भयङ्कराकारचरितानां जनानामित्यर्थः । यथार्हं यथोचितं । दण्डं निग्रहं । धारयितुं कर्तुं । समर्थाः भवन्तीति शेषः ॥ ११ ॥

**प्रथमः** — भोस्तात! न तत्र पाण्डवा इति मन्ये।

**वृद्धः** — पुत्र! कथं त्वं जानीषे।

**प्रथमः** — श्रुतं मया तस्मादाश्रमादागतेन केनचिद् ब्राह्मणेन — शतकुम्भं नाम यज्ञमनुभवितुं महर्षेर्धौम्यस्याश्रमं गता इति।

**वृद्धः** — हन्त हताः स्मः।

**प्रथमः** — तात! न तु सर्व एव। आश्रमपरिपालनार्थमिह स्थापितः किल मध्यमः।

**वृद्धः** — यद्येवं, सन्निहिताः सर्व एव पाण्डवाः।

**प्रथमः** — स चाप्यस्यां वेलायां व्यायामपरिचयार्थं विप्रकृष्टदेशस्थ इति श्रूयते।

---

भोस्तातेत्यादि। पाण्डवाः। तत्र पाण्डवाश्रमे। न, सन्निहिता इति शेषः॥

पुत्रेत्यादि॥

श्रुतमित्यादि। आगतेनेति ब्राह्मणविशेषणम्। आगच्छतेति मातृकान्तरे पाठः। ब्राह्मणेन हेतुना ब्राह्मणद्वारेणेत्यर्थः॥

हन्तेत्यादि। हन्तेति विषादे। हताः आत्मरक्षां प्रति भग्नाशा इत्यर्थः। अथवा राक्षसेन मारिता इत्यर्थः। अनिष्पन्नाया अपि क्रियाया भूतत्ववचनमवश्यम्भावबोधनार्थम्॥

तातेत्यादि। तु किन्तु। सर्व एव निखिला एव पाण्डवाः। न, गता इत्यनुकृष्यते। किं तर्हीत्यत आह — आश्रमेत्यादि। इह आश्रमे। मध्यमः मध्यमपाण्डवो भीमसेनः॥

यदीति। एव यदि मध्यमः इह स्थापितश्चेत्। सर्व एव पाण्डवाः, सन्निहिताः आश्रमस्थाः। सर्वपाण्डवसन्निधानसाध्यं कर्म भीमस्यैकस्य सन्निधानेन सिद्धं भविष्यतीत्यभिप्रायः॥

स चेत्यादि। स च मध्यमश्च। अस्यां वेलायां यस्मिंस्तत्सन्निकर्षोऽपेक्षितः तस्मिन्नेतास्मिन् समये। व्यायामपरिचयार्थं व्यायामो मल्लव्यापारः तस्य परिचयो दैनन्दिनमनुष्ठानं तदर्थं। विप्रकृष्टदेशस्थः स्वाश्रमविदूरप्रदेशगतः॥

**वृद्धः** — हन्त निराशाः स्मः । भवतु, पुत्र ! व्यपश्रयिष्ये तावदेनम् ।

**प्रथमः** — अलमलं परिश्रमेण ।

**वृद्धः** — पुत्र ! निर्वेदप्रत्यर्थिनी खलु प्रार्थना ।

**प्रथमः** — भवतु, पश्यामस्तावत् । भोः पुरुष ! अस्त्यस्माकं मोक्षः ।

**घटोत्कचः** — मोक्षोऽस्ति समयतः ।

**वृद्धः** — कः समयः? ।

**घटोत्कचः** — अस्ति मे तत्रभवती जननी । तयाहमाज्ञप्तः— पुत्र ! ममोपवासनिसर्गार्थमस्मिन् वनप्रदेशे कश्चिन्मानुषः परिमृग्यानेतव्य इति । ततो मयासादितो भवान् ।

---

हन्तेत्यादि । निराशाः रक्षकप्रत्याशारहिताः । भवत्विति निषेधे निपातः । अन्यशरणीकरणे शरण्यासन्निधानान्मा भूदित्यर्थः । व्यपश्रयिष्ये सेविष्ये प्रार्थयिष्य इत्यर्थः ॥

अलमिति । परिश्रमेण अलं व्यपश्रयणलक्षणः परिश्रमो मास्तु । पापेऽस्मिन् राक्षसे व्यपश्रयणं सफलं न भविष्यतीत्यभिप्रायः ॥

पुत्रेति । पुत्र ! प्रार्थना व्यपश्रयणं । निर्वेदप्रत्यर्थिनी खलु निर्वेदः फलदौर्लभ्यबुद्ध्या विरागो निर्यत्नत्वं वा, तस्य प्रत्यर्थिनी विरोधिनी खलु । निर्वेदो ह्यलसधर्मः पुंसामत्यन्तवर्जनीयः सुप्रसिद्धः । प्रार्थना तु प्रार्थनीयपुरुषहृदयदयाङ्कुरणद्वारेण फलप्रसवहेतुः प्रयत्नविशेषरूपतया तद्विरोधिनीत्यतो निर्वेदपरिहारेण सैवावश्यं करणीयेति भावः ॥

भवत्वित्यादि । भवत्विति प्रार्थनाभ्यनुज्ञानम् । पश्यामः प्रार्थना सफला भवति न वेति परीक्षिष्यामहे इत्यर्थः । पुरुषं पृच्छति — भो इत्यादि । अस्ति अस्ति किम् । इह प्रश्नकाकुः ॥

मोक्ष इत्यादि । समयतः संविदा ॥

क इत्यादि ॥

अस्तीत्यादि । उपवासनिसर्गार्थम् उपवासाद् अनशनव्रताद् निसर्गो निर्गमः तदर्थम् । उपवासनिर्गमश्च पारणया सिध्यतीत्युपवासाङ्गपारणार्थमित्यर्थः । परिमृग्य अन्विष्य । 'अथ निसर्गवाक् । स्वभावे सर्जने न्यासे निर्गमेऽप्यजयोऽप्यडीत् ॥' इति केशवः ।

पत्न्या चारित्रशालिन्या द्विपुत्रो मोक्षमिच्छसि ।
बलाबलं परिज्ञाय पुत्रमेकं विसर्जय ॥ १२ ॥

**वृद्धः** —हं भो राक्षसापशद! किमहमब्राह्मणः ।

ब्राह्मणः श्रुतवान् वृद्धः पुत्रं शीलगुणान्वितम् ।
पुरुषादस्य दत्त्वाहं कथं निर्वृतिमाप्नुयाम् ॥ १३ ॥

**घटोत्कचः** —

यद्यर्थितो द्विजश्रेष्ठ! पुत्रमेकं न मुञ्चसि ।
सकुटुम्बः क्षणेनैव विनाशमुपयास्यसि ॥ १४ ॥

**वृद्धः** —ब्राह्मणि! एष एव मे निश्चयः ।

---

समयाकारं प्रकाशयितुमाह —पत्न्येति । त्वं, द्विपुत्रः पुत्रद्वयविशिष्टः सन् । चारित्रशालिन्या पातिव्रत्यवत्या । पत्न्या सह, मोक्षं मद्धस्तान्मोचनम् । इच्छसि अभिलषसि चेदित्यर्थः । काकुरिह यद्यर्थे । एकं त्रिष्वन्यतमं । पुत्रं, विसर्जय परित्यज, मह्यमर्पय वा । किं कृत्वा, बलाबलं परिज्ञाय बलस्यार्हत्वस्य अबलस्य अनर्हत्वस्य च समाहारो बलाबलं, तत् परिज्ञाय पुत्रेषु कतमस्य विसर्जनार्हत्वं कतमस्य तदनर्हत्वमिति पर्यालोच्येत्यर्थः । एवञ्च 'मज्जनन्युपवासपारणार्थमेकं पुत्रं यदि मह्यमर्पयसि, तदा त्वां पत्न्या द्वाभ्यां च पुत्राभ्यां सह मुञ्चामी'ति समयाकारः पर्यवसितः ॥ १२ ॥

हमित्यादि । हंशब्दोऽसम्मतौ । भो इति विषादे । राक्षसापशद! राक्षसेषु मध्ये हीन! ।

ब्राह्मण इत्यादि । श्रुतवान् श्रुतं शास्त्रं तद्वान् । पुरुषादस्य नरभक्षकस्य राक्षसस्य । निर्वृतिं सुखम् । इह अहमित्यस्य स्थाने 'हा' इति क्वचित् पाठः ॥ १३ ॥

यद्यर्थित इत्यादि । सकुटुम्बः आत्मात्मपत्नीपुत्रसमुदायः कुटुम्बं तेन सह वर्तत इति सकुटुम्बः ॥ १४ ॥

निर्बन्धिनि राक्षसे निजां प्रतिपत्तिमाह —ब्राह्मणीत्यादि । एष एव वक्ष्यमाण एव ।

कृतकृत्यं शरीरं मे परिणामेन जर्जरम् ।
राक्षसाग्नौ सुतापेक्षी होष्यामि विधिसंस्कृतम् ॥ १५ ॥

**ब्राह्मणी** —(क) अय्य ! मा मा एवं । पदिमत्तधम्मिणी पदिव्वद-त्ति णाम । गहीदफळेण एदिणा सरीरेण अय्यं कुळं च रक्खिदुं इच्छामि ।

**घटोत्कचः** —न खलु स्त्रीजनोऽभिमतस्तत्रभवत्याः । निवर्तयितव्यं युष्माभिः ।

---

(क) आर्य ! मा मैवम् । पतिमात्रधर्मिणी पतिव्रतेति नाम । गृहीतफलेन एतेन शरीरेण आर्यं कुलं च रक्षितुमिच्छामि ।

---

कृतेति । सुतापेक्षी सुतेषु अपेक्षावान् सुतरक्षणार्थीत्यर्थः । अहं, कृतकृत्यं कृतं कृत्यम् ऋणत्रयापाकरणरूपः स्वधर्मो येन तत् तथाभूतम् । देवपितृमनुष्यविषयतया त्रिविधं हि ऋणं, तत्र यज्ञैर्देवर्णं, पुत्रैः पितृऋणं, हन्तकारादिभिर्मनुष्यर्णं चापाकर्तव्यं शास्त्रविहितमिति तदपाकरणमेव पुंसः कृत्यं बोद्धव्यम् । परिणामेन जरया । जर्जरं शिथिलम् । एतेन उत्तरकालकृत्याक्षमत्वमचिरपातोन्मुखत्वं च द्योतितम् । विधिसंस्कृतं विधिना शास्त्रविध्यनुसारेण संस्कृतम् आहितगुणम् अर्थान्नानासंस्कारकर्मभिः । मे शरीरं हविःस्थानीयं राक्षसाग्नौ राक्षसरूपेऽग्नौ । होष्यामि स्वाहाकरिष्यामि ॥ १५ ॥

अय्येति । आर्य ! एवम् उक्तप्रकारेण । मा मा, कुर्विति शेषः । पतिव्रता साध्वी स्त्री । पतिमात्रधर्मिणी पतिरेव पतिमात्रं पतिमात्रेण धर्मिणी धर्मवती । पत्यभावे धर्महीनेत्यर्थः । इति नाम इत्येतत् सुप्रसिद्धमित्यर्थः । अतः किं प्रकृते ग्रस इत्यत्राह—गृहीतफलेन गृहीतम् अर्थाद् भवता, फलं पुत्रोत्पादनरूपं यज्ञानुष्ठानसाहाय्यरूपं च प्रयोजनं यस्य तेन तथाभूतेन । कृतकार्येणेत्यर्थः । एतेन शरीरेण अर्थाद् राक्षसायार्पितेन । आर्यं त्वां । कुलं च पुत्रांश्च । रक्षितुम् इच्छामि ॥

न खल्विति । तत्रभवत्याः मन्मातुः । स्त्रीजनः, न खल्वभिमतः नैवेष्टः । युष्माभिः, निवर्तयितव्यम् अस्या ब्राह्मण्याः देहत्यागव्यवसायान्निवर्तनं कर्तुमर्हमित्यर्थः । निवर्तयितव्येति वा पाठ्यम् । अर्थाद् ब्राह्मणी तदा कर्म । निवर्तयितव्यमित्यादि ग्रन्थान्तरे न पठ्यते ॥

**वृद्धः** —अहमनुगमिष्यामि भवन्तम् ।

**घटोत्कचः** —हं वृद्धस्त्वमपसर ।

**प्रथमः** —भोस्तात! ब्रवीमि खलु तावत् किञ्चित् ।

**वृद्धः** —पुत्र! कथय ।

**प्रथमः** —

मम प्राणैर्गुरुप्राणानिच्छामि परिरक्षितुम् ।
रक्षणार्थं कुलस्यास्य मोक्तुमर्हति मां भवान् ॥ १६ ॥

**द्वितीयः** —आर्य! मा मैवम् ।

ज्येष्ठः श्रेष्ठः कुले लोके पितृणा च सुसम्प्रियः ।
ततोऽहमेव यास्यामि गुरुवृत्तिमनुस्मरन् ॥ १७ ॥

---

**अहमित्यादि** । अनुगच्छामीति मातृकान्तरे पाठः ॥

**हमित्यादि** । हशब्दोऽसम्मतौ । वृद्धः जीर्णः । अस्थित्वङ्मात्रशेषशरीरत्वादुपवासपारणानर्ह इत्यभिप्रायः ॥

पितुर्देहत्यागव्यवसायमसहमानो ज्येष्ठः पुत्र आह —**भोस्तातेत्यादि** ॥

**पुत्रेत्यादि** । अस्य स्थाने 'ब्रूहि ब्रूहि शीघ्रम्' इति मातृकान्तरेऽपपाठः ॥

**ममेति** । प्राणैः राक्षसाय दीयमानैः करणभूतैः । गुरुप्राणान् पितृप्राणान् परिरक्षितुम् इच्छामि । भवान्, अस्य कुलस्य पितृमातृभ्रातृद्वयसमुदायात्मकस्य कुटुम्बस्य । रक्षणार्थं, मा, मोक्तुं त्यक्तुम् । अर्हति ॥ १६ ॥

तथा वदन्तं ज्येष्ठं मध्यमः पुत्रो वारयन्नाह —**आर्येत्यादि** ।

**ज्येष्ठ इति** । लोके, ज्येष्ठः अग्रजः । कुले वंशे । श्रेष्ठः अतिशयेन प्रशस्यः । पितॄणां पितृदेवतानां सुसम्प्रियश्च अत्यन्तामोदकरश्च भवति । प्रथमजेनैव हि पुत्रेण पिण्डदातृविच्छेदभयं पितॄणामपनुद्यत इति स एवावरजपुत्रापेक्षया तेषां प्रियतमः । तमेतं प्रियत्वातिशयं सुसंशब्दौ द्योतयतः । तथाच कुलानुग्रहार्थे त्वं रक्षणीय इत्याशयः । ततः तव रक्षणीयत्वाद्धेतोः । अहमेव, गुरुवृत्तिं गुरौ ज्येष्ठभ्रातरि वृत्तिं समुदाचारम् अर्थादनुजाचरणीयं गुरुरक्षणात्मकम् । अनुस्मरन् चिन्तयन् सन् । यास्यामि गमिष्यामि, अर्थाद् राक्षसहस्तम् ॥ १७ ॥

**तृतीयः** — आर्यौ ! मा मैवम् ।

ज्येष्ठो भ्राता पितृसमः कथितो ब्रह्मवादिभिः ।
ततोऽहं कर्तुमस्म्यर्हो गुरूणां प्राणरक्षणम् ॥ १८ ॥

**प्रथमः** — वत्स ! मा मैवम् ।

आपदं हि पिता प्राप्तो ज्येष्ठपुत्रेण तार्यते ।
ततोऽहमेव यास्यामि गुरूणां प्राणरक्षणात् ॥ १९ ॥

**वृद्धः** — ज्येष्ठमिष्टतमं न शक्नोमि परित्यक्तुम् ।

**ब्राह्मणी** — (क) जह अय्यो जेट्ठमिच्छदि, तह अहं पि कणिट्ठं इच्छामि ।

**द्वितीयः** — पित्रोरनिष्टः कस्येदानीं प्रियः ।

---

(क) यथार्यो ज्येष्ठमिच्छति, तथाहमपि कनिष्ठमिच्छामि ।

---

ज्येष्ठावुभावपि कनिष्ठो वारयन्नाह — आर्यावित्यादि ।

ज्येष्ठो भ्रातेत्यादि । पितृसमः पितृवत् पूजनीयो रक्षणीयश्चेत्यर्थः । गुरूणां, पिता ज्येष्ठौ भ्रातरौ च गुरवः तेषां त्रयाणाम् ॥ १८ ॥

ज्येष्ठः कनिष्ठं वारयन्नाह — वत्सेत्यादि ।

आपदमित्यादि । तार्यते रक्ष्यत इत्यर्थः । लटा तारणसमुदाचारस्य लोकेऽनुवर्तमानता प्रत्याय्यते । धार्यत इति मातृकान्तरपाठेऽपि उक्त एवार्थः । प्राणरक्षणात् प्राणरक्षणार्थं, फलस्य हेतुत्वविवक्षया पञ्चमी ॥ १९ ॥

एवं पुत्रेषु कुलरक्षणार्थमात्मदेहत्यागेऽहमहमिकां कुर्वत्सु, अन्यतमनिर्णये पितृभ्यामनिच्छद्भ्यामप्यवश्यकर्तव्ये समापतिते पिता स्वाभिप्रायं सूचयति — ज्येष्ठमित्यादि ॥

माता स्वाभिप्रायमाह — जहेत्यादि ॥

इत्थं ज्येष्ठकनिष्ठयोरपरित्याज्यत्वकथनेन मध्यमस्य परित्याज्यत्वेऽर्थसिद्धे मध्यम आह — पित्रोरित्यादि । अनिष्टः अर्थादहम् । 'पित्रोरनिष्टाः कस्येदानीं प्रिया वयम्' इति मातृकान्तरे पाठः । तदा वयमित्यस्य अहमित्यर्थः । 'अस्मदो द्वयोश्च' इत्येकत्वे बहुवचनम् । 'सविशेषणस्य प्रतिषेधः' इति वार्तिकमत्र तु नानुसृतम् ॥

**घटोत्कचः** — अहं प्रीतोऽस्मि, शीघ्रमागच्छ ।

**द्वितीयः** —

धन्योऽस्मि यद् गुरुप्राणाः स्वैः प्राणैः परिरक्षिताः ।
बन्धुस्नेहाद्धि महतः कालस्नेहस्तु दुर्लभः ॥ २० ॥

**घटोत्कचः** — अहो स्वजनवात्सल्यमस्य ब्राह्मणवटोः ।

**द्वितीयः** — भोस्तात ! अभिवादये ।

**वृद्धः** — एह्येहि पुत्र !

विनिमाय गुरुप्राणान् स्वैः प्राणैर्गुरुवत्सल ! ।
अकृतात्मदुरावापं ब्रह्मलोकमवाप्नुहि ॥ २१ ॥

घटोत्कचः सिद्धार्थत्वादाह — **अहमित्यादि** । प्रीतः प्रीतिमान्, अर्थात् त्वाम् मन्मातुर्भक्षणीयतामात्मनाऽङ्गीकृतवानिति ॥

कुलरक्षापेक्षं स्वप्राणत्यागं प्रत्युत्साहमाविष्कुर्वन्नाह — **धन्य** इति । अहं धन्यः कृतकृत्यः । अस्मि । कुतः इत्यत्राह — यत् यस्मात् कारणात् । गुरुप्राणाः, स्वैः प्राणैः जिहासितैरिति शेषः । परिरक्षिताः अर्थान्मया । तस्माद् धन्य इति सम्बन्धः । का नवैतावता धन्यतेत्यत्राह — महतः प्रबलात् । बन्धुस्नेहात् निमित्तात्, कालस्नेहस्तु काले मृत्यौ स्नेहः, बन्धुस्नेहनिमित्ता स्वमरणाभिरुचिरित्यर्थः । तुशब्दो विशेषे । दुर्लभो हि मनुष्येषु विरलदर्शनः खलु । सोऽयमपूर्वः सद्गुणो दिष्ट्या मे सिद्ध इति कुतो मम न धन्यतेति भावः । 'कायस्नेहस्तु दुर्लभः' इति मातृकान्तरे पाठः । तदेत्थं व्याख्येयं — कुतस्ते गुरुप्राणेष्वपेक्षा स्वप्राणेषु च जिहासेत्यत्राह — कायस्नेहस्तु स्वशरीरस्नेहस्तु । महतो बन्धुस्नेहाद् गुणाधिकं बन्धुस्नेहमपेक्ष्य । ल्यब्लोपे पञ्चमी । दुर्लभो हि अर्थान्मया । मम बन्धुस्नेहो गुरुः, कायस्नेहस्त्वल्प इति भावः ॥ २० ॥

**अहो** इत्यादि । ब्राह्मणवटोः विप्रब्रह्मचारिणः ॥

अथ प्रस्थानोचितमामन्त्रणं पित्रादिक्रमेणारभते — **भोस्तातेत्यादि** ॥

**एह्येहीत्यादि** ।

**विनिमायेति** । हे गुरुवत्सल ! गुरुषु भक्त !, त्वं, स्वैः प्राणैः, गुरुप्राणान्, विनिमाय परिवर्त्य । अकृतात्मदुरावापम् अकृतात्मभिः असंस्कृतात्मभिः दुरावापं दुर्लभम् । इहाङ्प्रश्लेषकृतः प्रथमदीर्घः। ब्रह्मलोकम्, अवाप्नुहि लभस्व ॥ २१ ॥

**द्वितीयः** — अनुगृहीतोऽस्मि । अम्ब! अभिवादये ।

**ब्राह्मणी** — (क) जाद! चिरं जीव ।

**द्वितीयः** — अनुगृहीतोऽस्मि । आर्य! अभिवादये ।

**प्रथमः** — एह्येहि वत्स!

परिष्वजस्व गाढं मां परिष्वक्तः शुभैर्गुणैः ।
कीर्त्या तव परिष्वक्ता भविष्यति वसुन्धरा ॥ २२ ॥

**द्वितीयः** — अनुगृहीतोऽस्मि ।

**तृतीयः** — आर्य! अभिवादये ।

**द्वितीयः** — स्वस्ति ।

**तृतीयः** — अनुगृहीतोऽस्मि ।

**द्वितीयः** — भोः पुरुष! ब्रवीमि किञ्चित् ।

**घटोत्कचः** — ब्रूहि ब्रूहि शीघ्रम् ।

---

(क) जात! चिरं जीव ।

---

अन्वित्यादि ॥

मरणासत्तिनिश्चयेऽपि पुत्रस्य जीवितप्रत्याशया जननीस्वभावसिद्धया दीर्घायुष्यमाशास्ते — जादेत्यादि । जात! वत्स! ॥

अन्वित्यादि ॥

एहीत्यादि ।

परीत्यादि । परिष्वजस्व आलिङ्ग । गाढं दृढं । परिष्वक्तः उपेतः । कीर्त्या कुलरक्षणजन्येन यशसा । परिष्वक्ता व्याप्ता ॥ २२ ॥

अन्वित्यादि ॥

आर्येत्यादि ॥

स्वस्तीति । स्वस्ति शुभम् । अस्त्विति शेषः ॥

अन्वित्यादि ॥

भोः पुरुषेत्यादि । ब्रवीमि वच्मि । वदतो वचनप्रतिज्ञानं विवक्षितस्यावश्यवक्तव्यत्वद्योतनार्थम् । किञ्चित्पदस्थाने तावत्पदं मातृकान्तरे पठ्यते ॥

ब्रूहीत्यादि । शीघ्रवचनम् आहारकालातिक्रमो मा भूदिति ॥

**द्वितीयः** — एतस्मिन् वनान्तरे जलाशय इव दृश्यते । तत्र मे प्रकल्पितपरलोकस्य पिपासाप्रतीकारं करिष्यामि ।

**घटोत्कचः** — दृढव्यवसायिन्! गम्यताम् । अतिक्रामति मातुराहारकालः । शीघ्रमागच्छ ।

**द्वितीयः** — भोस्तात! एष गच्छामि । (निष्क्रान्तः ।)

**वृद्धः** — हा हा परिमुषिताः स्मो भोः! परिमुषिताः स्म ।

यस्त्रिशृङ्गो मम त्वासीन्मनोज्ञो वंशपर्वतः ।
स मध्यशृङ्गभङ्गेन मनस्तपति मे भृशम् ॥ २३ ॥

हा पुत्र! । कथं गत एव । (विलोक्य)

तरुण! तरुणतानुरूपकान्ते! नियमपराध्ययनप्रसक्तबुद्धे! ।
कथमिह गजराजदन्तभग्नस्तरुरिव यास्यसि पुष्पितो विनाशम् ॥ २४ ॥

---

एतस्मिन्नित्यादि । वनान्तरे वनमध्ये । जलाशयः जलाधारः । प्रकल्पितपरलोकस्य प्रकल्पितः सज्जितः परलोको यस्य तस्य तथाभूतस्य । पिपासाप्रतीकारं पिपासा पातुमिच्छा तस्याः प्रतीकारं शान्तिं, जलपानमित्यर्थः ॥

दृढेत्यादि । दृढव्यवसायिन्! दृढः अभेद्यः व्यवसायः परलोकगमनोद्यमः प्रशस्तोऽस्येति दृढव्यवसायी, तस्य सम्बुद्धिः । प्रशंसायां मत्वर्थीय इनिः ॥

भोस्तातेत्यादि ॥

चरमपिपासाप्रतीकारार्थेन पुत्रस्य गमनेनोद्दीपिताच्छोकादाह — हाहेत्यादि । परिमुषिताः राक्षसेन पुत्रस्य हरणात् परिलुण्टितार्थाः । इह परिमुषितशब्दः परिमुषितार्थेषु वर्तते, यथा विभक्ता भ्रातर इत्यत्र विभक्तशब्दो विभक्तधनेषु ।

य इति । त्रिशृङ्गः त्रीणि शृङ्गाणि पुत्रत्रयरूपाणि शिखराणि यस्य स तथाभूतः । अत एव मनोज्ञः हृद्यः । मम, यः वंशपर्वतः वंश एव पर्वतः सुप्रतिष्ठत्वात् । आसीत् । सः, मध्यशृङ्गभङ्गेन मध्यशृङ्गस्य मध्यमपुत्रात्मकस्य मध्यमशृङ्गस्य भङ्गेन नाशेन हेतुना । मे, मनः, भृशम् अत्यर्थम् । तपति सन्तापयति । तपतिरन्तर्भावितण्यर्थः । इह पुत्राणामौन्नत्यादिना शृङ्गत्वाध्यवसानादतिशयोक्तिः । तदुत्थापितः वंशपर्वत इति रूपकम् ॥ २३ ॥

हेत्यादि । गत एव दर्शनविषयमतिक्रान्त एव ।

तरुणेति । हे तरुण! युवन्! । तरुणतानुरूपकान्ते! तरुणतायाः अनुरू-

**घटोत्कचः** — चिरायते खलु ब्राह्मणवटुः । अतिक्रामति मातुराहारकालः । किन्नुखलु करिष्ये । भवतु, दृष्टम् । भो ब्राह्मण! आहूयतां तव पुत्रः ।

**वृद्धः** — हुम् अतिराक्षसं खलु ते वचनम् ।

**घटोत्कचः** — कथं रुष्यति, मर्षयतु मर्षयतु भवान् । अथ मे प्रकृतिदोषः । अथ किन्नामा तव पुत्रः ।

**वृद्धः** — एतदपि न शक्यं श्रोतुम् ।

**घटोत्कचः** — युक्तं भो ! । ब्राह्मणकुमार ! किन्नामा ते भ्राता ।

**प्रथमः** — तपस्वी मध्यमः ।

---

पा सदृशी कान्तिः शोभा यस्य स तथाभूतः, तस्य सम्बुद्धिः । नियमपराध्ययनप्रसक्तबुद्धे ! नियमपरे व्रतप्रधाने अध्ययने वेदग्रहणे प्रसक्तबुद्धे ! । इह वने । गजराजदन्तभग्नः, पुष्पितः सञ्जातपुष्पः । उपमेयगतकान्तिमत्त्वप्रतिबिम्बमिदं विशेषणम् । तरुरिव वृक्ष इव । विनाशं, कथं यास्यसि प्राप्स्यसि । उपमालङ्कारः ॥ २४ ॥

सम्भावितैः क्षणैरप्रत्यागते मध्यमे विलम्बमसहमान आह — **चिरायत** इत्यादि । चिरायते विलम्बते । चिरशब्दात् 'लोहितादिडाज्भ्यः क्यष्' इति क्यष् । इह वटोः शीघ्रानयनेऽभ्युपायो विज्ञात इत्यर्थः । आहूयताम् आकार्यताम् ॥

**हुमित्यादि** । हुमित्यसम्मतौ । अतिराक्षसं राक्षसानतिक्रान्तं । राक्षसोऽपीदृशं क्रूरं वचनं न ब्रूयादिति भावः ॥

**कथमित्यादि** । रुष्यति कुप्यति । मर्षयतु क्षमताम् । अथ मे प्रकृतिदोषः अनुचितवक्तृत्वं नाम मम स्वभावसिद्धो दोषः । काममयुक्तं पुत्राह्वानाय भवतः प्रेरणम् । तस्य तु नाम मे ब्रूहि, येनाहमेव तमाह्वयेयमित्यभिप्रायेणाह — अथेत्यादि । अथशब्दः प्रश्ने । किन्नामा किं नाम यस्य स किन्नामा ॥

**एतदिति** । एतदपि नामापि । श्रोतुं मन्मुखादाकर्णयितुं । न शक्यम् अर्थात् त्वया ॥

**युक्तमित्यादि** । युक्तं भो ! इह काकुः । अयुक्तं ते वचनं 'नामापि नाभिधास्यामी'ति । भो इति कोपसूचनम् । अन्यं पृच्छति — **ब्राह्मणेत्यादि** ॥

**तपस्वीत्यादि** । तपस्वी दीनः ॥

**घटोत्कचः** —मध्यम इति सदृशमस्य। अहमेवाह्वयामि। भो भो मध्यम! मध्यम! शीघ्रमागच्छ।

(ततः प्रविशति भीमसेनः।)

रङ्. **भीमसेनः**—भो! कस्यायं स्वरः।

खगशतविरुते विरौति तारं द्रुमगहने दृढसङ्कटे वनेऽस्मिन्।
जनयति च मनोज्वरं स्वरोऽयं बहुसदृशो हि धनञ्जयस्वरस्य॥ २५॥

**घटोत्कचः**—चिरायते खलु ब्राह्मणवटुः। अतिक्रामति मातुराहारकालः। किन्नुखलु करिष्ये। भवतु दृष्टम्। उच्चैः शब्दापयामि। भो भो मध्यम! शीघ्रमागच्छ।

---

**मध्यम** इत्यादि। सदृशम् अनुरूपं मध्यमपुत्रत्वात्। आह्वयामीत्यस्य स्थाने यास्यामीत्यपपाठो ग्रन्थान्तरे॥

अथ मध्यमेति सम्बोधनशब्दश्रवणादात्मानमेव केनाप्याहूयमानं मन्यमानस्य व्यायामव्यापृतत्वेन पूर्वं सूचितस्य मध्यमशब्दितस्य भीमसेनस्य प्रवेशमाह—तत इत्यादि॥

**भोः** कस्येत्यादि।

**खगेति**। धनञ्जयस्वरस्य अर्जुनस्वरस्य। बहुसदृशः अत्यन्ततुल्यः। एतेन स्वरवति पुरुषे स्वबन्धुभावशङ्का द्योतिता। अयं स्वरो हि, खगशतविरुते खगशतस्य पक्षिशतस्य विरुतं शब्दः यस्मिन् तस्मिंस्तथाभूते। द्रुमगहने द्रुमैः गहने दुष्प्रवेशे दृढसङ्कटे भृशनिबिडे। अनेन विशेषणद्वयेन असम्भावितजनवासत्वं सूचितम्। अस्मिन् वने, तारम् अत्युच्चं यथा भवति तथा। विरौति शब्दायते। स्वरवत्पुरुषगतस्य शब्दकर्तृत्वस्य स्वरेऽयमुपचारः स्वरस्य प्राधान्यसूचनाय। स्वरो हि पुरुषगतविशेषाभ्यूहस्थानत्वात् प्रधानमिति। मनोज्वरं श्रोतुर्मनःपीडां। जनयति च। स्वरस्य मनोज्वरजनकत्वोक्त्या तथाविधस्वरयुक्तशब्दकर्तरि पापाभिनिवेशित्वानुमानं तद्दमनेच्छा च भीमसेनस्य गम्यते। भीमसेनेन च श्रुतमात्रे शब्दे तत्स्वरगतयावद्विशेषपरिज्ञानस्य प्रकाशनात् शब्दोत्थानदेशस्य भीमसेनव्यायामदेशात्प्रत्यासन्नत्वं सूचितम्॥ २५॥

**चिरायत** इत्यादि। शब्दापयामि आह्वयामि। शब्दशब्दाद् णिच्। आपुगागम आर्षः। शब्दापशब्दाद्वा करोत्यर्थे णिच्॥

**भीमसेनः** —— भोः ! कोनुखल्वेतस्मिन् वनान्तरे मम व्यायामविघ्नमुत्पाद्य मध्यम ! मध्यम ! इति मां शब्दापयति । भवतु, पश्यामस्तावत् (परिक्रम्यावलोक्य) अहो दर्शनीयोऽयं पुरुषः । अयं हि,

सिंहास्यः सिंहदंष्ट्रो मधुनिभनयनः स्निग्धगम्भीरकण्ठो
बभ्रुभ्रूः श्येननासो द्विरदपतिहनुर्दीर्घविश्लिष्टकेशः ।
व्यूढोरा वज्रमध्यो गजवृषभगतिर्लम्बपीनांसबाहुः
सुव्यक्तं राक्षसीजो विपुलबलयुतो लोकवीरस्य पुत्रः ॥ २६ ॥

**घटोत्कचः** — चिरायते खलु ब्राह्मणवटुः । अतिक्रामति मातुराहारकालः । किमिदानीं करिष्ये । भवतु, उच्चैराह्वानं करिष्ये । भो भो मध्यम ! शीघ्रमागच्छ ।

---

भोः कोन्वित्यादि । दर्शनीयः आकृतिगुणाद् द्रष्टुं योग्यः । अयं हीति श्लोकान्वयि ।

आकृतिं वर्णयति—सिंहास्य इति । सिंहास्यः सिंहमुखः । सिंहदंष्ट्रः । मधुनिभनयनः मधुनिभे रक्तवर्णत्वान्मधुतुल्ये नयने यस्य स तथाभूतः । स्निग्धगम्भीरकण्ठः स्निग्धो मधुरः गम्भीरश्च कण्ठः कण्ठनादो यस्य स तथाभूतः । बभ्रुभ्रूः बभ्रू पिङ्गले भ्रुवौ यस्य सः । श्येननासः गृध्रनासिकः । द्विरदपतिहनुः द्विरदपतेर्गजराजस्येव हनू यस्य सः । दीर्घविश्लिष्टकेशः दीर्घा विश्लिष्टाः प्रकीर्णाश्च केशा यस्य सः । व्यूढोराः व्यूढं विस्तीर्णम् उरो वक्षः यस्य सः । वज्रमध्यः वज्रस्येव मध्यः काठिन्यादिना यस्य सः । गजवृषभगतिः गजवृषभस्य गजश्रेष्ठस्येव गजवृषभयोरिव वा गतिर्यस्य सः । लम्बपीनांसबाहुः लम्बौ लम्बमानौ पीनांसौ पृथुस्कन्धौ च बाहू यस्य स तथाभूतः । विपुलबलयुतः, अयं हि, राक्षसीजः राक्षस्या जातः । लोकवीरस्य पुत्रः, भवतीति शेषः । सुव्यक्तं सुस्पष्टम् । कथमन्यथास्यैतादृशाकारानुभावयोग इति भावः । घटोत्कचे 'सोऽयं मम पुत्रः' इति प्रत्यभिज्ञानं तु भीमस्य न सञ्जातम्, अतिबाल्यदृष्टचरी तस्याकृतिमपेक्ष्य साम्प्रतिकयास्तरुणिमनवनिर्मितायाः आकृतेरत्यन्तवैलक्षण्यात् ।' इह बह्वीनामुपमानां संसृष्टिः स्फुटा । व्यूढोरा इत्यत्र 'उरःप्रभृतिभ्यः कप्' इति कपो नित्यस्याप्यकरणमार्षम् ॥ २६ ॥

उच्चैराह्वानेनाप्यनागते ब्राह्मणवटौ राक्षस आह — चिरायत इत्यादि ॥

**भीमसेनः** — भो ! प्राप्तोऽस्मि ।

**घटोत्कचः** — न खल्वयं ब्राह्मणवटुः । अहो दर्शनीयोऽयं पुरुषः । य एषः,

सिंहाकृतिः कनकतालसमानबाहुर्मध्ये तनुर्गरुडपक्षविलिप्तपक्षः ।
विष्णुर्भवेद् विकसिताम्बुजपत्रनेत्रो नेत्रे ममाहरति बन्धुरिवागतोऽयम् ॥

भो मध्यम! त्वां खल्वहं शब्दापयामि ।

**भीमसेनः** — अतः खल्वहं प्राप्तः ।

---

**भो** इत्यादि । प्राप्तोऽस्मि आगत एवाहम् । किमिति मामपश्यन मध्यमेत्युच्चैः पुनः शब्दापयसीत्यर्थः ॥

**न खल्वि**त्यादि । ब्राह्मणमाणवक इति मातृकान्तरे पाठः । तत्र माणवको वटुरेव । यदृच्छादृष्टिपतिताद्भुतभीमसेनरूपाकृष्टचित्तश्चिन्तयति - **अहो** इत्यादि । य एष इति श्लोकान्वयि ।

**सिंहाकृतिरि**ति । सिंहाकृतिः सिंहस्येवाकृतिः ऊर्जस्वल आकारो यस्य स तथाभूतः । कनकतालसमानबाहुः कनकतालसमानौ स्वर्णतालद्रुमवद् गौरप्रांशू बाहू यस्य स तथाभूतः । कनकस्तालश्च वृक्षविशेषौ तयोः समानौ बाहू यस्य स इति वा । मध्ये अवलग्ने तनुः कृशः । गरुडपक्षविलिप्तपक्षः गरुडपक्षाविव विलिप्तौ सम्मृष्टौ अदन्तुरमसृणौ पक्षौ पार्श्वभागौ यस्य स तथाभूतः । विकसिताम्बुजपत्रनेत्रः विकचपद्मदलसदृशलोचनः । य एषः, विष्णुः, भवेत्, आकारानुभावविशेषादच्युत एव भवन् सम्भाव्यत इत्यर्थः । सम्भावनायां हि लिङ् । आगतः आगतमात्रः न तु सम्भाषणादिना परिज्ञातविशेषः । अयं, बन्धुरिव, मम, नेत्रे चक्षुषी । आहरति आकर्षति, मम चक्षूरागं जनयतीत्यर्थः ॥ २७ ॥

स्वप्रस्तुतानुसरणभङ्ग्या प्राप्तस्योत्तरमाह — **भो मध्यमे**त्यादि । मध्यमेति जलाशयगतं प्रति सम्बोधनम् । त्वां खलु मध्यमसंज्ञं भवन्तमेव न त्वेनमागतम् । एतेन, नामग्राहमन्यस्मिन्नाहूयमाने, अहो तवात्माह्वानभ्रम इत्यागतं पुरुषं प्रत्यर्थादुक्तं भवति । स एव तु मध्यमाख्याभिसम्बोधितोऽवगमनादिति मन्तव्यम् ॥

स्वनामाह्वानादेवाहं प्राप्त इत्याह — **अत** इत्यादि । अतः खलु मध्यमेत्याह्वानादेव, न पुनरन्यनामाह्वाने आत्माह्वानभ्रमादित्यभिप्रायः ॥

**घटोत्कचः** — किं भवानपि मध्यमः ।

**भीमसेनः** — न तावदपरः ।

मध्यमोऽहमवध्यानामुत्सिक्तानां च मध्यमः ।
मध्यमोऽहं क्षितेर्भद्र! भ्रातॄणामपि मध्यमः ॥ २८ ॥

**घटोत्कचः** — भवितव्यम् ।

**भीमसेनः** — अपिच,

मध्यमः पञ्चभूतानां पार्थिवानां च मध्यमः ।
भवे च मध्यमो लोके सर्वकार्येषु मध्यमः ॥ २९ ॥

---

**किमिति** । भवानपि किं मध्यमः । अपिशब्देन मदाह्वानविषयोऽन्यो मध्यमोऽस्तीति सूचयति ॥

**न तावदिति** । अपरः मदन्यः । न तावत् नैव । मध्यम इति विधेयानुकर्षः । बहुभिः प्रकारैरर्थान्वयाद् मध्यमशब्दस्याहमेव मुख्यं व्यपदेशभाजनं भवामि लोके, न त्वन्य इत्यभिप्रायः ।

तदेव मध्यमत्वं राक्षसदमोपदेशक्षमस्वगतगुणविशेषप्रकाशिकया रीत्या प्रपञ्चयति — **मध्यम** इति । अहम्, अवध्यानां शत्रुभिर्हन्तुमशक्यानां पुंसाम् अर्थात् पाण्डवानां मध्ये । मध्यमः तेष्वन्तर्भूत इत्यर्थः । पाण्डवानां चावध्यत्वं प्रसिद्धम् । उत्सिक्तानां च शौर्योद्धतानां च मध्ये । मध्यमः तेष्वन्तर्भूत इत्येव । शौर्योद्धतत्वमपि हि पाण्डवानां प्रसिद्धम् । क्षितेः भूमेर्निमित्तात् । 'क्षितौ' इति मातृकान्तरे पाठः । अहं मध्यमः भूमेर्मध्यमलोकत्वेन तत्सम्बन्धादहं मध्यमो मध्यमलोकभवो मानुष इत्यर्थः । भ्रातॄणामपि मध्ये अहं मध्यमः, पाण्डवेषु पञ्चसु युधिष्ठिरसहदेवौ प्रथमचरमौ विहायान्येषां त्रयाणां साधारणमिदं मध्यमत्वम् । इहावध्यत्वशौर्योद्धतत्वयोराख्यानं राक्षससन्त्रासार्थम् ॥ २८ ॥

**भवितव्यमिति** । ईदृशं मध्यमत्वं ते भवितुमर्हं, किं ततः इत्यवज्ञा भीमसेनोक्तावेतेन सूचिता ॥

भूयोऽपि मध्यमत्वमाह — **अपिच मध्यम** इति । अहमित्यनुवर्तते । पञ्चभूतानां पृथिव्यप्तेजोवाय्वाकाशानां मध्ये । मध्यमः, पञ्चभूतेषु वायोर्मध्यमत्वेन तत्पुत्रोऽहमपि मध्यमः 'आत्मा वै पुत्रनामासि' इति श्रुतेरिति भावः । अनेन म-

वृद्धः —

मध्यमस्त्विति सम्प्रोक्ते नूनं पाण्डवमध्यमः ।
अस्मान् मोक्तुमिहायातो दर्पान्मृत्योरिवोत्थितः ॥ ३० ॥

ध्यमत्वेनार्जुननकुलयोर्व्यावृत्तिः सिद्धा । पार्थिवानां पृथिवीश्वराणां मध्ये मध्यमः भ्रातरो हि पृथिवीश्वरा इति तन्मध्यमभूतोऽहं पृथिवीश्वरमध्यमोऽपि भवामीत्यर्थः । एतच्च उत्पथप्रवृत्तपुरुषदण्डनाधिकृतत्वसूचनार्थम् । अहं, भवे च भवनं भवः मातृकुक्षेर्निर्गमः तस्मिंश्च विषये । मध्यमः, तत्र हि युधिष्ठिरः प्रथमोऽर्जुनश्चरम इति व्यवस्थितं मे मध्यमत्वमिति भावः । 'भ्रातॄणामपि मध्यमः' इति भिन्नाभिन्नोदरजभ्रातृसामान्यापेक्षं मध्यमत्वं भीमार्जुननकुलसाधारणं पूर्वमुक्तम् । अभिन्नोदरजन्मापेक्षं तु मध्यमत्वमर्जुननकुलव्यावृत्तमिदानीमुच्यते । सर्वकार्येषु सर्वेषां जनानां कार्येषु निर्णयवस्तुषु । अहं मध्यमः मध्यस्थः प्राड्विवाकीभूय न्यायनिर्णायक इत्यर्थः । अनेन मध्यमत्वेन त्वदुच्चारितशब्दरौद्रस्वरसूचितादन्याय्याभिनिवेशात् त्वां वारयितुमेवाहमागत इति स्वागमनप्रयोजनं द्योतितम् ।

एवं भीमेनाष्टभिः प्रकारैर्मध्यमत्वकथनभङ्ग्या 'अहमवध्यः', शौर्योद्धतः, मनुष्यः, बहुभ्रातृकः, वायुपुत्रः, पृथिवीपतिः, उभयपुरुषजन्ममध्यकाललब्धस्वजन्मा, सर्वकार्यगतन्यायान्यायविचारयिता च भवामि' इति स्वस्याष्टौ विशेषणान्याविष्कृतानि । तेषां समुदितानां भीमसेनादन्यत्रासम्भवाद् 'अहं भीमसेनः' इति चार्थादुक्तं भवति ॥ २९ ॥

तस्यास्य भीमसेनवाक्यस्याभिप्रायं घटोत्कचो बाल्यान्न ज्ञातवान् । वृद्धस्तु व्युत्पन्नत्वाज्जानन्नाह — मध्यमस्त्वितीति । 'मध्यमेति तु' इति पाठः, 'भो मध्यमेति' इति वा । मृत्योः दर्पाद् उत्थित इव मृत्युदर्पादुपादानकारणादाविर्भूत इव । अप्रधृष्यत्वसाम्यादियमुत्प्रेक्षा । पाण्डवमध्यमः पाण्डवेषु मध्यमत्वेन प्रसिद्धो भीमसेनः भो मध्यम ! इति एवंरूपे सम्बोधनशब्दे । सम्प्रोक्ते सति सम्यगुच्चैरुच्चारिते सति । इह आयातः आत्माह्वानबुद्ध्या प्राप्तः । नूनं निश्चितम् । किमर्थं प्राप्त इत्यत्राह — अस्मान्, मोक्तुं राक्षसभयाद् मोचयितुम् । आयातो ऽयं शीघ्रमस्मान् राक्षसभयाद् रक्षिष्यतीत्यौत्सुक्यमेतेन व्यज्यते । इह मध्यमस्त्विवतीति प्रथमान्तपाठोऽर्थासामञ्जस्याल्लेखकप्रमादायातो नूनम् । मृत्युरिवेति मातृकान्तरे पाठः ॥ ३० ॥

(प्रविश्य)

**मध्यमः** —

अस्यामाचम्य पद्मिन्यां परलोकेषु दुर्लभम् ।
आत्मनैवात्मनो दत्तं पद्मपत्रोज्ज्वलं जलम् ॥ २१ ॥

(उपगम्य) भोः पुरुष! प्राप्तोऽस्मि ।

**घटोत्कचः** — प्राप्तवानिदानीं खल्वसि । मध्यम! मध्यम! इत इतः ।

**वृद्धः** — (भीममुपगम्य) भो मध्यम! परित्रायस्व ब्राह्मणकुलम् ।

**भीमसेनः** — न भेतव्यं न भेतव्यम् । मध्यमोऽहमभिवादये ।

**वृद्धः** — वायुरिव दीर्घायुर्भव ।

**भीमसेनः** — अनुगृहीतोऽस्मि । कुतो भयमार्यस्य ।

**वृद्धः** — श्रूयताम् । अहं खलु कुरुराजेन युधिष्ठिरेणाधिष्ठितपूर्वे कुरुजाङ्गले यूपग्रामवास्तव्यो माठरसगोत्रश्च कल्पशाखाध्वर्यु. केशवदासो नाम

---

अथ कृतपिपासाप्रतीकारस्य ब्राह्मणमध्यमस्य प्रवेशः प्रविश्येत्यादि ॥

**अस्यामित्यादि** । पद्मिन्या सरसि । दत्तम् अर्पितम् ॥ २१ ॥

**भो** इत्यादि ॥

**प्राप्तवानिति** । इदानीं खलु अस्मिन् क्षण एव, न त्वितः पूर्वम् । प्राप्तवान् असि । मनागागमनविलम्बस्त्वया कृत इत्यभिप्रायः । मध्यम! मध्यमेति गमनत्वराकृता द्विरुक्तिः । 'प्राप्तवानिदानीं खल्वसि मध्यमः' इति मातृकान्तरे पाठः ॥

वृद्धो भीम जानन्नपि मध्यमसंज्ञयैव तत्र प्रसिद्धतरया भीमं सम्बोधयन् अभयं प्रार्थयते — **भो मध्यमेत्यादि** ॥

अभयदानपूर्वं ब्राह्मणोचित समुदाचरति — **न भेतव्यमित्यादि** ॥

**वायुरिति** । वायुरिव वायुर्हि प्राणाधिष्ठानदेवता आमहाकल्पान्तकालजीवी प्रसिद्धः इत्यौचित्यात् तदौपम्यवचनम् । भीमसेनस्य पितृनामकीर्तनेन प्रीतिजननार्थमपि तद् बोद्धव्यम् ॥

**अन्वित्यादि** ॥

ब्राह्मणः । तस्य ममोत्तरस्यां दिश्युद्यामकग्रामवासी मातुलः कौशिकसगोत्रो यज्ञबन्धुर्नामास्ति । तस्य पुत्रोपनयनानुभवनार्थं सकलत्रोऽस्मि प्रस्थितः ।

**भीमसेनः** — अरिष्टोऽस्तु पन्थाः । ततस्ततः ।

**वृद्धः** — ततो मामेष हि,

सजलजलदगात्रः पद्मपत्रायताक्षो
मृगपतिगतिलीलो राक्षसः प्रोग्रदंष्ट्रः ।
जगति विगतशङ्कस्त्वद्विधानां समक्षं
ससुतपरिजनं भो! हन्तुकामोऽभ्युपैति ॥ ३२ ॥

**भीमसेनः** — एवम् । अनेन ब्राह्मणजनस्य मार्गविघ्नः कृतः । भवतु, निग्रहीष्यामि तावदेनम् । भोः पुरुष! तिष्ठ तिष्ठ ।

**घटोत्कचः** — एष स्थितोऽस्मि ।

**भीमसेनः** — किमर्थं ब्राह्मणं प(र'रा)स्यसि ।

पुत्रनक्षत्रकीर्णस्य पत्नीकान्तप्रभस्य च ।
वृद्धस्य विप्रचन्द्रस्य भवान् राहुरिवागतः ॥ ३३ ॥

---

श्रूयतामित्यादि । कुरुजाङ्गले देशविशेषे । यूपग्रामवास्तव्यः यूपाख्यग्रामवासी । माठरसगोत्रः माठरेण ऋषिविशेषेण सगोत्रः गोत्रवान् । कल्पशाखाध्वर्युः कल्पो यज्ञविधान तत्प्रतिपादिका शाखा यजुश्शाखा तस्याम् अध्वर्युः तदुक्तप्रयोगानुष्ठाननिपुण इत्यर्थः । मातुलः मातृभ्राता ॥

**अरिष्ट** इत्यादि । अरिष्टः निरुपद्रवः । अस्तु, निरुपद्रवत्वाशसया 'यदि पथि कश्चिदुपद्रव आपतेत्, तमहं वारयितु सज्जोऽस्मि' इति सूचयति ॥

**तत** इत्यादि । मामित्यादि श्लोकान्वयि ।

**सजले**त्यादि । मृगपतिगतिलीलः मृगपतेः सिंहस्येव गतिलीला गमनविलासो यस्य स तथाभूतः । विगतशङ्कः निर्भयः । भो इति विषादे ॥ ३२ ॥

**एवमि**त्यादि । एवम् अयं भयहेतुप्रकारः । एन मार्गविघ्नकारिण पुरुषम् ॥

**एष** इत्यादि ॥

**किमर्थमि**त्यादि । परास्यसि निरस्यसि कदर्थयसि । 'ब्राह्मणमपराध्यसि' इति मातृकान्तरे पाठः । ब्राह्मणमुद्दिश्यापराध्यसीति तदर्थः ।

**पुत्रेति** । भवान् . पुत्रनक्षत्रकीर्णस्य पुत्रैर्नक्षत्रैरिव परिवृतस्य । पत्नीका-

**घटोत्कचः** — अथकिम् । राहुरेव ।

**भीमसेनः** — आः,

निवृत्तव्यवहारोऽयं सदारस्तनयैः सह ।
सर्वापराधेऽवध्यत्वान्मुच्यतां द्विजसत्तमः ॥ ३४ ॥

**घटोत्कचः** — न मुच्यते ।

**भीमसेनः** — (आत्मगतम्) भोः कस्य पुत्रेणानेन भवितव्यम् ।

भ्रातृणां मम सर्वेषां कोऽयं भो गुणतस्करः ।
दृष्ट्वैतद्बालशौण्डीर्यं सौभद्रस्य स्मराम्यहम् ॥ ३५ ॥

---

न्तप्रभस्य च पत्नी कान्तप्रभेव मनोहरा ज्योत्स्नेव यस्य तस्य तथाभूतस्य । वृद्धस्य स्थविरस्य । विप्रचन्द्रस्य विप्रश्चन्द्र इव विप्रचन्द्रः तस्य । राहुरिव चन्द्रग्रसनशीलो ग्रह इव । आगतः । सावयवोपमालङ्कारः ॥ ३३ ॥

अथकिमित्यादि । राहुरेवेत्येवकारेण यथान्यवमायानुष्ठाननिर्बन्धः प्रकाश्यते ॥

आ इति कोपे ।

निवृत्तेत्यादि । निवृत्तव्यवहारः निवृत्तः करणशक्तिक्षयेण अपगतः व्यवहारः लोकयात्रा यस्मात् स तथाभूतः । सर्वापराधे अवध्यत्वात् सर्वविधापराधयोगेऽपि वधानर्हत्वाद्धेतोः । एतेन निरपराधत्वे वधस्य मनसाप्यचिन्तनीयत्वमुक्तम् । द्विजसत्तमः द्विजेषु विप्रेषु सत्तमः अतिप्रशस्तः ॥ ३४ ॥

नेत्यादि ॥

वचनप्रकाशित पुरुषस्य लोकोत्तर धीरत्वमनुसन्धाय चिन्तयति — भो इत्यादि । भो इति वाक्यार्थभूषण सम्बोधनम् । तद्धि व्यवहर्तारः सम्बोध्यविरहेऽपि विस्मयहर्षविषादादिप्रवृत्ते वाक्यार्थे घटयन्ति । भो इति विस्मये वा । स च पुरुषगतधैर्यविषयः । अनेन कस्य पुत्रेण भवितव्यम् ईदृशधैर्यावष्टम्भादिगुणशालिनः पुत्रस्य जनकस्तादृश एव भवितु युक्तः । स कोनुखलु स्यादित्यर्थः ।

स्वयूथ्यान्यतमपुत्रत्वशङ्का मनसि कुर्वन्निवाह—भ्रातृणामिति । मम, सर्वेषां भ्रातृणां युधिष्ठिरादीना । गुणतस्करः गुणचोरः गुणानुकारीत्यर्थः । अय पुरुषः, कः अज्ञातः । अहम्, एतद्बालशौण्डीर्यम् एतस्य सन्निहितस्य बालस्य शौण्डी-

(प्रकाशम्) भोः पुरुष! मुच्यताम् ।

**घटोत्कचः** — न मुच्यते ।

मुच्यतामिति विस्रब्धं ब्रवीति यदि मे पिता ।
न मुच्यते तथाप्येष गृहीतो मातुराज्ञया ॥ ३६ ॥

**भीमसेनः** — (आत्मगतम्) कथं मातुराज्ञेति । अहो गुरुशुश्रूषुः खल्वयं तपस्वी ।

माता किल मनुष्याणां दैवतानां च दैवतम् ।
मातुराज्ञां पुरस्कृत्य वयमेतां दशां गताः ॥ ३७ ॥

(प्रकाशम्) भोः पुरुष! प्रष्टव्यं खलु तावदस्ति ।

**घटोत्कचः** — ब्रूहि ब्रूहि शीघ्रम् ।

---

र्यं शौर्यगर्वम् । दृष्ट्वा, सौभद्रस्य स्मरामि अभिमन्युं स्मरामि । अभिमन्युसदृशमस्य शौण्डीर्यमिति भावः । सौभद्रस्येति कर्मणः शेषत्वविवक्षया 'अधीगर्थदयेशाम्' इति षष्ठी । इह शौण्डीर्यशब्दो णकारविकल एव मातृकयोः पठ्यते ॥ ३५ ॥

पुनःप्रार्थनामप्यवधीरयति — न मुच्यत इति ।

**मुच्यतामितीति** । मुच्यतामिति, मे पिता, विस्रब्धं स्निग्धं यथा भवति तथा । ब्रवीति यदि, न मुच्यते, अर्थान्मया द्विजः । तथाविधोऽह मुच्यतामिति भवता येन केनाप्यविस्रब्धमुच्यमानः कथं द्विजं मुञ्चेयमिति भावः । मातृनिदेशभङ्ग-भयाच्चाय मे निर्बन्ध इत्यभिप्रायकमाह — तथाहीति हेतौ । एषः द्विजः । मातुः आज्ञया, गृहीतः । यद्येष मुच्येत, मातृनिदेशविपरीतं खल्वनुष्ठितं स्यादिति भावः ॥ ३६ ॥

**कथमित्यादि** । मातुराज्ञेति कथं मातुराज्ञेत्येव किं ब्रवीतीत्यर्थः । अहो इति प्रशंसायाम् । सा च गुरुशुश्रूषुत्वविषया । गुरुशुश्रूषुः मातृपरिचरणपरः । अत एव तपस्वी धार्मिकः । एतेन, अस्य मातृशुश्रूषणधर्मविघातो यथा न भवेत्, तथा द्विजपरित्राणं कर्तव्यमित्येतादृशाभिप्रायाङ्कुरं भीमस्य सूचितम् ।

मातृशुश्रूषणस्य परमधर्मत्वं समर्थयितुं मातुर्महिमानमाह — मातेत्यादि । दैवतानां च दैवतं, चशब्दोऽप्यर्थे । दैवतानि हि पूज्यानि । तेषामपि मध्ये पूज्यतरेत्यर्थः । एतां दशां लोकबहुमान्यामवस्थाम् ॥ ३७ ॥

**ब्रूहीत्यादि** ॥

**भीमसेनः**—का नाम भवतो माता ।

**घटोत्कचः**—श्रूयताम् । हिडिम्बा नाम राक्षसी ।

कौरव्यकुलदीपेन पाण्डवेन महात्मना ।
सनाथा या महाभागा पूर्णेन द्यौरिवात्मना ॥ ३८ ॥

**भीमसेनः**—(आत्मगतम्) एवं, हिडिम्बायाः पुत्रोऽयम् । सदृशो ह्यस्य गर्वः ।

रूपं सत्त्वं बलं चैव पितृभिः सदृशं बहु ।
प्रजासु वीतकारुण्यं मनश्चैवास्य कीदृशम् ॥ ३९ ॥

(प्रकाशम्) भोः पुरुष! मुच्यताम् ।

**घटोत्कचः**—न मुच्यते ।

---

का नामेत्यादि ॥

श्रूयतामित्यादि ॥

कौरव्येति । या, कौरव्यकुलदीपेन कौरव्याणां कुरुपत्यानां शन्तनुप्रभृतीनां कुलस्य दीपेन प्रकाशकेन । महात्मना महानुभावेन । पाण्डवेन भीमसेनेन । पूर्णेन, आत्मना चन्द्रेण द्यौरिव नभ इव । सनाथा नाथवती । भवति । सा हिडिम्बेति पूर्वेण सम्बन्धः । 'आत्मार्कचन्द्रवाताग्निजीवेषु परमात्मनि' इति केशवस्वामी ॥ ३८ ॥

एवमित्यादि ।

रूपमिति । अस्य, रूपम् आकृतिः । सत्त्वं निर्विकारचित्तत्वं धीरत्वम् । बलं देहसारश्चैव । पितृभिः युधिष्ठिरादिभिः । बहु अत्यर्थं । सदृशम् । प्रजासु, वीतकारुण्यं विगतकृपं । मनश्चैव मनोमात्रम् । कीदृशं कुत्सितं, न तु पितृसदृशमित्यर्थः ॥ ३९ ॥

'मुच्यतामिति विस्रब्धं ब्रवीति यदि मे पिते'त्याद्युक्तवतो घटोत्कचस्य द्विजविमोचननिर्बन्धमात्मनः पितृत्वाख्यानेऽप्यनिवार्यं निश्चित्य स्वतत्त्वमप्रकाश्यैव भीमसेनो भूयोऽपि मोचनमर्थयते—भो इत्यादि । इदमपि पितृत्वगोपनस्य प्रयोजनं, यत् पुत्रेण सह स्वयमेव युद्ध्वा तद्बलपरीक्षणम् । तच्च व्यक्तीभविष्यति ॥

न मुच्यत इति । पुनः स्वनिर्बन्धप्रकाशनम् ॥

**भीमसेनः** — भो ब्राह्मण! गृह्यतां तव पुत्रः । वयमेनमनुगमिष्यामः ।

**द्वितीयः** — मा मा भवानेवम् ।

त्यक्ताः प्रागेव मे प्राणा गुरुप्राणेष्ववेक्षया ।
युवा रूपगुणोपेतो भवांस्तिष्ठतु भूतले ॥ ४० ॥

**भीमसेनः** — आर्य! मा मैवम् । क्षत्रियकुलोत्पन्नोऽहम् । पूज्यतमः खलु ब्राह्मणः । तस्मान्मच्छरीरेण ब्राह्मणशरीरं विनिमातुमिच्छामि ।

**घटोत्कचः** — एवं, क्षत्रियोऽयम् । तेन गर्वः । भवतु, इममेव हत्वा नेष्यामि । अथ केनायं वारितः ।

**भीमसेनः** — मया ।

**घटोत्कचः** — किं त्वया ।

**भीमसेनः** — अथकिम् ।

**घटोत्कचः** — तेन हि भवानेवागच्छतु ।

---

द्विजघटोत्कचोभयाभीष्टसिद्ध्यनुगुणमाह — भो ब्राह्मणेत्यादि ॥

मामेत्यादि । मा मा, वदत्विति शेषः ॥

त्यक्ता इत्यादि । रूपगुणोपेतः रूपेण सौन्दर्येण गुणेन दयादिना च उपेतो युक्तः ॥ ४० ॥

त वारयन्नाह — आर्येत्यादि । विनिमातु परिवर्तयितुम् ॥

'क्षत्रियकुलोत्पन्नोऽहमि'ति तदुक्तया तत्क्षत्रियत्व जानन्नाह — एवमित्यादि । अय द्विजाभयदायी मध्यमः । क्षत्रियः क्षत्रियजातिः । भवतीति शेषः । एतेन भीमसेनवाक्कूटस्य प्रागुक्तस्याभिप्रायो घटोत्कचेन न गृहीत इति गम्यते । इह एवमित्यादेः स्वगतोक्तित्वम् अथेत्यादेः प्रकाशोक्तित्व च युक्ततरम् ॥

मयेति ॥

किं त्वयेति । वारणे सम्भावितमात्मानर्थं विमृश्य वारयितृत्वमङ्गीकुर्वित्याशयः ॥

अथकिमिति ॥

तेन हीत्यादि । भवानेव न तु द्विजमध्यमः, स मया विमुक्तः, तत्स्थाने च त्वं गृहीत इत्यभिप्रायः ॥

**भीमसेनः** — एवम्, अतिवीर्यबलं नानुगच्छामि । यदि ते शक्तिरस्ति, बलात्कारेण मां नय ।

**घटोत्कचः** — किं मां प्रत्यभिजानीते भवान् ।

**भीमसेनः** — मत्पुत्र इति जाने ।

**घटोत्कचः** — कथं कथं तव पुत्रोऽहम् ।

**भीमसेनः** — कथं रुष्यति, मर्षयतु मर्षयतु भवान् । सर्वाः प्रजाः क्षत्रियाणां पुत्रशब्देनाभिधीयन्ते । अत एव मयाभिहितम ।

**घटोत्कचः** — भीतानामायुधं गृहीतम् ।

**भीमसेनः** —

शपामि सत्येन भयं न जाने ज्ञातुं तदिच्छामि भवत्समीपे ।
किंरूपमेतद् वद भद्र! तस्य गुणागुणज्ञः सदृश प्रपत्स्ये ॥ ४१ ॥

---

**एवमित्यादि** । एवमित्यभ्युपगमे । द्विजप्रतिनिधित्वमात्मनोऽभ्युपगतमित्यर्थः । अतिवीर्यबलम् अतिशयिते वीर्यबले यस्य त तथाभूतम् । पुरुषम् । नानुगच्छामि, त्वं चात्मानं तथाभूतं मन्यस इत्यार्थम् । अतो, यदि ते शक्तिरस्ति, बलात्कारेण प्रसह्य । मां नय । यदि त्वात्मनोऽशक्तिमङ्गीकरोषि, तदा त्वां स्वयमेवानुगच्छामीत्यर्थः । अनया वचनभङ्ग्या युद्धाय तदाह्वानं सूचितम् । तच्च राक्षसदर्पदमनार्थत्वच्छलेन स्वपुत्रबलपरीक्षणार्थम् ॥

**किमित्यादि** ॥

तं कोपयितुमाह — **मदित्यादि** ॥

**कथमित्यादि** ॥

**कथं रुष्यतीत्यादि** । क्षत्रियाणां क्षत्रियैः । सम्बन्धे षष्ठी । पुत्रशब्देन अभिधीयन्ते अभिभाष्यन्ते, पालकानां पाल्येषु पुत्रसमुदाचारौचित्यादिति भावः ॥

**भीतानामिति** । भीतानाम्, आयुध, गृहीत युद्धसाधनत्वेन शास्त्रेषु निर्दिष्टम् । त्वं भीतश्चेद्, आयुध गृहीत्वा मया सह युद्धमारभस्वेत्यभिप्रायः ॥

**शपामीत्यादि** । सत्येन करणेन । शपामि शपथं करोमि । सत्यदेवसाक्षिकशपथपूर्वं वच्मीत्यर्थः । वक्ष्यमाणोऽर्थः पारमार्थिक इत्यभिप्रायः । तमेवाह — **भयं** भयपदार्थं । न जाने । तद् भयं । भवत्समीपे, ज्ञातुम् इच्छामि । त्वया हि 'भी-

**घटोत्कचः** — एष ते भयमुपदिशामि, गृह्यतामायुधम्

**भीमसेनः** — आयुधमिति । गृहीतमेतत् ।

**घटोत्कचः** — कथमिव ।

**भीमसेनः** —

काञ्चनस्तम्भसदृशो रिपूणां निग्रहे रतः ।
अयं तु दक्षिणो बाहुरायुधं सदृशं मम ॥ ४२ ॥

**घटोत्कचः** — इदमुपपन्नं पितुर्मे भीमसेनस्य !

**भीमसेनः** — अथ कोऽयं भीमो नाम ।

विश्वकर्ता शिवः कृष्णः शक्रः शक्तिधरो यमः ।
एतेषु कथ्यतां भद्र! केन ते सदृशः पिता ॥ ४३ ॥

**घटोत्कचः** — सर्वैः ।

---

ताना'मिति वदतात्मनो भयज्ञानमङ्गीकृतमिति तदुपदेशाचार्यस्त्वं भवितुमर्हसीत्याशयः । भद्र ! एतद् भयं । किंरूपं किंलक्षणकं । वद । तस्य भयस्य । गुणागुणज्ञः गुणदोषाभिज्ञः । भूत्वेति शेषः । सदृशं तदनुरूपं । प्रपत्स्ये कर्तव्यं निर्णेष्यामि । इयमुपहासोक्तिः ॥ ४१ ॥

एष इत्यादि ॥

**आयुधमितीति** । आयुधमिति आयुधं ग्राह्यमिति किं ब्रवीषीत्यर्थः ॥

**कथमिवेति** । आयुधमगृहीत्वैव गृहीतं वदतस्तवाभिप्रायो नावगम्यत इत्यर्थः ॥

**काञ्चनेत्यादि** । काञ्चनस्तम्भसदृशः स्वर्णस्तम्भतुल्यः । रतः आसक्तः ॥ ४२ ॥

**इदमित्यादि** । इदम् ईदृशं वीरवादरचनम् ॥

**अथेत्यादि** ।

**विश्वेत्यादि** । विश्वकर्ता ब्रह्मा । शक्तिधरः स्कन्दः । केन, सदृशः समानः । एष्वन्यतमेन सदृशप्रभावो यदि यः कोऽपि स्यात्, तमेवाहं वीरं गणयेयं, न तु ततो हीनगुणमिति स्वप्रभावप्रशंसने प्रश्नस्य पर्यवसानम् । एतच्च पुत्रवाचालनलीलार्थम् ॥ ४३ ॥

**सर्वैरिति** । सर्वैः विश्वकर्त्रादिभिः षड्भिः । इह सदृश इति सम्बध्यते ॥

**भीमसेनः**—धिगनृतमेतत् ।

**घटोत्कचः**—कथं कथम् । अनृतमित्याह । क्षिपति मे गुरुम् । भवतु, इमं स्थूल वृक्षमुत्पाट्य प्रहरामि । (उत्पाट्य प्रहरति ।) कथमनेनापि न शक्यते हन्तुम् । किन्नुखलु करिष्ये । भवतु, दृष्टम् । एतद् गिरिकूटमुत्पाट्य प्रहरामि ।

शैलकूट मया क्षिप्त प्राणानादाय यास्यति ।

**भीमसेनः**—

रुष्टोऽपि कुञ्जरो वन्यो न व्याघ्रं धर्षयेद् वने ॥ ४४ ॥

**घटोत्कचः**—(प्रहृत्य) कथमनेनापि न शक्यते हन्तुम् । किन्नुखलु करिष्ये । भवतु, दृष्टम् ।

नन्वहं भीमसेनस्य पुत्र. पौत्रो नभस्वत. ।
तिष्ठेदानी सुसन्नद्धो नियुद्धे नास्ति मत्सम. ॥ ४५ ॥

(इत्युभौ नियुद्ध कुरुत ।)

**घटोत्कचः**—(भीमसेन बद्ध्वा)

व्रजसि कथमिह त्वं वीर्यमुल्लङ्घ्य बाह्वो-
र्गज इव दृढपाशै· पीडितो मद्भुजाभ्याम् ।

---

सर्वसाम्यमसहमान इवाह—**धिगित्यादि** । धिगिति निन्दायाम् ॥

स्वपितृनिन्दया सक्रुद्ध आह—**कथ कथमित्यादि** । क्षिपति निन्दति । इह वृक्षमित्यस्य स्थाने सालमिति मातृकान्तरे पाठः । प्रहरामि ताडयामि, **अर्थात्** क्षत्रियमध्यम वृक्षेण । गिरिकूट पर्वतशृङ्गम् । गिरिशिखरमिति मातृकान्तरे पाठः ॥

**शैलकूटमित्यादि** । आदाय गृहीत्वा ।

**रुष्टोऽपीत्यादि** । रुष्टोऽपि । कुपितोऽपि । कुञ्जर. गजः । न धर्षयेत् न परिभवेत् ॥ ४४ ॥

**कथमनेनेत्यादि** ।

प्रकारान्तरेण जयमपश्यन् नियुद्धायाह्वयते—**नन्वहमित्यादि** । नभस्वतः वायोः । वायुपौत्रत्वेन बलजवातिशययोगित्वमुक्तम् । नियुद्धे मुष्टियुद्धे ॥ ४५ ॥

**व्रजसीति** । इह, दृढपाशैः साररज्जुभिः । गज इव, मद्भुजाभ्या पीडितः दृढबद्धः । त्वं, बाह्वोः मद्भुजयोः । वीर्यं शक्तिम् । उल्लङ्घ्य अतिक्रम्य । कथं

**भीमसेनः** — (आत्मगतम्) कथं गृहीतोऽस्म्यनेन। भोः सुयोधन! वर्धते खलु ते शत्रुपक्षः। कृतरक्षो भव। (प्रकाशम्) भोः पुरुष! अवहितो भव।

**घटोत्कचः** — अवहितोऽस्मि।

**भीमसेनः** — (नियुद्धबन्धमवधूय)

व्यपनय बलदर्पं दृष्टसारोऽसि वीर!
न हि मम परिखेदो विद्यते बाहुयुद्धे॥ ४६॥

**घटोत्कचः** — कथमनेनापि न शक्यते हन्तुम्। किन्नुखलु करिष्ये। भवतु, दृष्टम्। अस्ति मातृप्रसादलब्धो मायापाशः। तेन बद्ध्वैनं नेष्यामि। कुतः खल्वापः। भो गिरे! आपस्तावत्। हन्त स्रवति। (आचम्य मन्त्रं जपति।) भोः पुरुष!

मायापाशेन बद्धस्त्वं विवशो न गमिष्यसि।
राजसे रज्जुभिर्बद्धः शक्रध्वज इवोत्सवे॥ ४७॥

---

व्रजसि कथमपि न गमिष्यसीत्यर्थः॥

इति वदन्नेव घटोत्कचेन गृहीतो भीमसेन आत्मनि चिन्तयति — **कथमि-त्यादि**। स्वदेहनिष्पीडनप्रकाराभिव्यक्तया स्वपुत्रशक्त्योपजनितं सन्तोषं सुयोध-नोपदेशभङ्ग्या सूचयति — भोः सुयोधन', ते, शत्रुपक्षः पाण्डवपक्षः। वर्धते वृद्धिं प्राप्नोति खलु। अस्य मत्सूनोरनया व्यज्यमानया शक्त्या सहायभूतया त्वत्पक्षा-दभ्यधिकबलो भवतीत्यर्थः। कृतरक्षः सुविहितविपत्प्रतीकारः। अवहितो भवेति स्वस्य नियुद्धबन्धावधूननसरम्भसूचनम्॥

अवेत्यादि॥

**व्यपनयेत्यादि**। दृष्टसारः मत्प्रत्यभिज्ञितबलः। वीर! वीरोचितलक्षणया वी-र्यहीनेत्यर्थः। परिखेदः श्रमः॥ ४६॥

**कथमित्यादि**। मायापाशः मायामयः पाशः। आपस्तावत्, स्यन्दयेत्यध्या-हारः। हन्तेति हर्षे। स्रवति स्यन्दयति। अर्थादपः। स्रवणं च राक्षसभयादिति बोध्यम्॥

मायापाशबन्धकार्यमाह — **मायेत्यादि**। विवशः कायादिव्यापारेष्वस्वत-न्त्रः। न गमिष्यसि अङ्गचलनशक्तिविरहात्। राजसे शोभिष्यसे। शक्रध्वज इव

(इति मायया बध्नाति ।)

**भीमसेनः** — कथं मायापाशेन बद्धोऽस्मि । किमिदानीं करिष्ये । अस्ति महेश्वरप्रसादाल्लब्धो मायापाशमोक्षो मन्त्रः । तं जपामि । कुतः खल्वापः । भवतु, भो ब्राह्मणकुमार ! आनय कमण्डलुगता अपः ।

**वृद्धः** — इमा आपः ।

(भीमसेन आचम्य मन्त्रं जप्त्वा मायां मोचयति ।)

**घटोत्कचः** — अये पतितः पाशः ! किमिदानीं करिष्ये । भवतु, भो पुरुष ! पूर्वसमयं स्मर ।

**भीमसेनः** — समय इति । एष स्मरामि । गच्छाग्रतः ।

(उभौ परिक्रामतः ।)

**वृद्धः** — पुत्रकाः ! किं कुर्मः । अयं गच्छति वृकोदरः ।

---

इन्द्रध्वज इव । परिस्पन्दशक्तिविरहेणान्यैकनेयत्वाद् दृष्टिप्रियत्वाच्च तत्साम्यम् । इन्द्रध्वजो नाम वृष्ट्यर्थं राज्ञा पूज्य इन्द्रसम्बन्धी कोऽपि ध्वजो वेणुयष्टिमयः । 'एवं य कुरुते यात्रामिन्द्रकेतोर्युधिष्ठिर ! । पर्जन्यः कामवर्षी स्यात् तस्मिन् राष्ट्रे न संशयः ॥' इति भविष्योत्तरम् ॥ ८७ ॥

**कथमि**त्यादि । मायापाशमोक्षः मायापाशात् तदाख्यादस्त्रात् मोक्षो मोचनं येन स तथाभूतः ॥

**इमा** इत्यादि ॥

**भीमसेन** इत्यादि । जप्त्वा जपित्वा । आगमशासनमनित्यमितीडभावोपपत्तिः ॥

**अये** इत्यादि । अये इति विषादे । स्वीयगर्वैयर्थ्यनिर्वेदेन सान्त्वमाश्रित्याह — पूर्वसमयं पूर्वं समयं त्वत्कृतां संविदम्, आत्मनो ब्राह्मणमध्यमप्रतिनिधित्वाभ्युपगमरूपाम् । स्मर, तदनुसारेण स्वयं मामनुगच्छ, त्वां जित्वा नेष्यामीति मनोरथस्तु मया त्यक्त एवेति भावः ॥

**समय** इत्यादि ॥

**पुत्रका** इत्यादि । पुत्रकाः ! अयं वृकोदरः भीमसेनः । गच्छति, अर्थाद् अस्मदर्थं स्वदेहत्यागं कर्तुम् । किं कुर्मः अत्र कं प्रतिविधिमनुतिष्ठामः । वृकोदरो हि राक्षसं निगृह्यास्मान् रक्षिष्यतीति मनोरथेनास्माभिः शरणीकृतः । स च यथा-

आक्रम्य राक्षसमिमं ज्वलदुग्ररूप-
मुग्रेण बाहुबलवीर्यगुणेन युक्तम् ।
एष प्रयाति शनकैरवधूय शीघ्र-
मासारवर्षमिव गोवृषभः सलीलः ॥ ४८ ॥

**घटोत्कचः** — इह तिष्ठ । त्वदागमनमम्बायै निवेदयामि ।

**भीमसेनः** — बाढम् । गच्छ ।

**घटोत्कचः** — (उपसृत्य) अम्ब ! अभिवादये घटोत्कचोऽहम् । चिराभिलषितो भवत्या आहारार्थमानीतो मानुषः ।

(प्रविश्य)

**हिडिम्बा** — (क) जाद ! चिरं जीव । कीदिसो माणुसो आणीदो ।

---

(क) जात ! चिरं जीव । कीदृशो मानुष आनीतः ।

---

स्मन्मनोरथं तं निगृह्णानमानं इदानीं रक्षितवानपि भवन् ममयवन्धानार्थं कश्चित् स्वोत्पादिते पतितो न चास्माभिरुद्धर्तुं शक्यः । द्वावेव खलत्र प्रतिविधिप्रकारौ संभावितौ — राक्षसमायास्मदन्यतमदेहपुनरर्पणं वा पूर्वसमयत्यागो वा, तदुभयमपि सत्यप्रतिज्ञो वृकोदरो नानुमन्यत इत्यतोऽस्माभिस्तद्गमनं तूष्णीमवलोकमानैरेव स्थातव्यमापतितमिति भावः ।

जितमपि राक्षसं धर्मानुरोधात् विस्रब्धमनुगच्छतो भीमसेनस्य महासत्त्वता-मनुसन्धायाह — आक्रम्येत्यादि । आक्रम्य अभिभूय । उपमामाह — शीघ्रमा-सारवर्षम् अवधूय गोवृषभ इव । शीघ्रं वेगपाति । आसारवर्षं जलदधारावृष्टिम् । अवधूय विषाणविधूननादिना अपसार्य । गोवृषभ इव महोक्ष इव । यथा गोवृषभः आसारवर्षबाधां सुपरिहरामप्यात्मेच्छयाङ्गीकृत्य सलीलं गच्छति, तथायं राक्षसबा-धामिति भावः ॥ ४८ ॥

आसादिते स्ववासस्थाने राक्षस आह — इहेत्यादि ॥

बाढमित्यादि । बाढमित्यङ्गीकारे ॥

अम्बेत्यादि ॥

जादेत्यादि ॥

**घटोत्कचः** — भवति! वाङ्मात्रेण मानुषो न वीर्येण ।

**हिडिम्बा** — (क) किं बह्मणो ।

**घटोत्कचः** — न ब्राह्मणः ।

**हिडिम्बा** — (ख) आदु थेरो ।

**घटोत्कचः** — न वृद्धः ।

**हिडिम्बा** — (ग) किं वालो ।

**घटोत्कचः** — न बालः ।

**हिडिम्बा** — (घ) जइ एव्वं, पेक्खामि दाव णं ।

(उभौ परिक्रामतः ।)

**हिडिम्बा** — (ङ) किं एसो माणुसो आणीदो ।

**घटोत्कचः** — भवति! कोऽयम् ।

**हिडिम्बा** — (च) उम्मत्तअ! दइवदं खु अअं ।

(क) किं ब्राह्मणः ।

(ख) अथवा स्थविरः ।

(ग) किं बालः ।

(घ) यद्येवं, पश्यामि तावदेनम् ।

(ङ) किमेष मानुष आनीतः ।

(च) उन्मत्तक! दैवतं खल्वयम् ।

---

**भवती**त्यादि । वाङ्मात्रेण जात्यभिलापकशब्दमात्रेण । 'रूपमात्रेण' इति मातृकान्तरे पाठः ॥

किमित्यादीनि हिडिम्बाघटोत्कचयोक्तीणि प्रश्नोत्तराणि स्पष्टार्थानि ॥

जइ इत्यादि । पेक्खामीत्यस्य पश्यामीति वा प्रेक्षे इति वा संस्कृतम् ॥

किमित्यादि ॥

आनीते पुरुषे मातुर्बहुमानं तद्वाक्यस्वरविशेषेणानुमाय पृच्छति — **भवती**त्यादि ॥

**उम्मत्तअ** इत्यादि । उन्मत्तक! भ्रान्तचित्त! । आनीतपुरुषगतविशेषाविचारणात् साक्रोशं सम्बोधनम् ॥

**घटोत्कचः** — आः कस्य दैवतम् ।

**हिडिम्बा** — (क) तव अ मम अ ।

**घटोत्कचः** — कः प्रत्ययः ।

**हिडिम्बा** — (ख) एसो पच्चओ । जेदु अय्यउत्तो ।

**भीमसेनः** — (विलोक्य) का पुनरियम् । अये देवी हिडिम्बा ।

अस्माकं भ्रष्टराज्यानां भ्रमतां गहने वने ।
जातकारुण्यया देवि! सन्तापो नाशितस्त्वया ॥ ४९ ॥

हिडिम्बे! किमिदम् ।

---

(क) तव च मम च ।

(ख) एष प्रत्ययः । जयत्वार्यपुत्रः ।

---

आ इत्यादि ॥

तवेत्यादि ॥

क इति । कः प्रत्ययः को हेतुः । अर्थादुभयदैवतत्वे ।

एसो इत्यादि । मद्भर्तृत्वे हेतुरिति बोधयितुं स्वभर्तृयोग्येन समुदाचारेण भीमसेनं सम्भावयति — जेदु इत्यादि ॥

का पुनरिति । इयं का । अतिचिरदृष्टां प्रति झटिति प्रत्यभिज्ञानुदयादेवमुक्तिः । प्रत्यभिजानन्नाह — अये इत्यादि । अये इति स्मरणे ।

जतुगृहदाहकालिके प्रवासे हिडिम्बया कृतमुपकारं स्मरंस्तां सम्भावयति — अस्माकमिति । हे देवि! राजदारत्वानुरूपमिदं सम्बोधनम् । भ्रष्टराज्यानां भ्रष्टं च्युतं राज्यं येषां तेषां तथाभूतानाम् । गहने दुर्गमे । वने, भ्रमतां सञ्चरताम् । अस्माकं, सन्तापः, जातकारुण्यया सकृपया । त्वया, नाशितः शमितः । तादृशी पूर्वप्रवासकालदृष्टा त्वं दिष्ट्या भूयो दृश्यस इति भावः ॥ ४९ ॥

प्रकृतमधिकृत्य पृच्छति — हिडिम्बे इति । इदं त्वदाहारार्थं मानुषानयनं नाम प्रकृतं वस्तु । किन्नु अशान्तम् । ईदृशं कर्म त्वयि मया न सम्भावितं, तस्मादस्य फलमभिमहितं मे ब्रूहीत्यभिप्रायः ॥

**हिडिम्बा** — (कर्णे) (क) अय्यउत्त! ईदिस विअ ।

**भीमसेनः** — जात्या राक्षसी, न समुदाचारेण ।

(क) आर्यपुत्र! ईदृशमिव ।

---

मानुषानयनतात्पर्यरहस्यस्य स्वभर्तृमात्रश्रवणीयत्वं मन्यमाना स्वभर्तुः कर्णे तन्निवेदयति — कर्णे इत्यादि । ईदृशमिव इवशब्दो वाक्यभूषणम् । ईदृशं फलरहस्यमित्यर्थः । तच्च पूर्वोत्तरार्थपर्यालोचनयोन्नेतुं शक्यमिति ग्रन्थे न निबद्धम् । तद् उत्तरवाक्ये विशदयिष्याम. ॥

तदभिप्रायरहस्यश्रवणेन परितुष्ट आह — जात्येति । जात्या जन्मना । राक्षसी, असीति शेषः । समुदाचारेण कर्मणा । न, राक्षसी न भवसि । अयमाशयः — मानुषग्रहणचोदना प्रत्युत्पन्नस्य निरवद्यस्य प्रयोजनस्य त्वया कथनाद् राक्षसजातिसहजनृशंसकर्मव्यवसायित्वशङ्का त्वामन्तरेण मम व्यपगता, त्वत्समुदाचारशुद्धिविस्रम्भश्च मे सञ्जात इति । किं तत् प्रयोजनमिति चेत् , स्वभर्तृसमागम इति ब्रूमः । स खल्विदानीं मानुषग्रहणयत्नेनोपनतो हिडिम्बयानुभूयमानः पतिव्रताभिसंधियोग्यः प्रशस्तोऽर्थः प्रतिपत्तृबुद्धिमारूढ एवेति शब्दतो न निर्दिष्टः । उपपद्यते चास्योपेयभावो मानुषग्रहणेऽभ्युपाये । भीमसेनसमागमो हि वर्षपूगविच्छिन्नः स्वाधिष्ठितं वनं दैवादधिवसति भीमसेने तत्प्रियया हिडिम्बयावश्यमेषितव्यः । कर्तव्यश्च प्रयत्नः कमपि तं साधयितुम् । स तु राक्षसानुपगमनीयनानामुनिजनाश्रममध्यगते पाण्डवाश्रमे तया न सुलभः, न च मुन्याश्रमदेशबाह्येऽपि व्यायामपरिचयप्रदेशे भ्रातृभिर्भीमसेनेऽन्वास्यमाने सति सुलभ उचितो वा । तेन तस्य देशान्तरगतभ्रातृकस्याश्रमविप्रकृष्टदेशस्थितस्यवसरं कञ्चिदुपलभ्य स घटयितव्य इति तस्या नूनं बुद्धिः । तत्रापि देशे स्वयं सन्निधाय तं स्वगृहागमनाय प्रार्थयितुं तस्या धैर्यं नासीद् , वर्षपूगविश्लेषसुलभाप्रत्यभिज्ञाननिमित्तकस्वप्रत्याख्यानशङ्कया । पुत्रेणैव भर्ता स्वगृहमानेय इति च तस्या इच्छा । अतः कदाचिदाश्रमविप्रकृष्टभूमौ व्यायच्छमाने प्रोषितभ्रातृके भीमसेने तदभ्यर्णमरण्या कमपि दारपुत्रत्रयानुयातं विप्रपान्थं गच्छन्तं पश्यन्ती हिडिम्बा स्वाभिलषितसिद्धिद्वारमित्थं नूनं व्यचिन्तयत् — 'यदि पान्थविप्रान्यतममभ्यवहारार्थतामपदिश्य पुत्रेण ग्राहयेयं, नूनं मम भर्ता तदाक्रन्दादिविदितार्थस्तद्विपन्मोचनानुरोधात् पुत्रेण निर्बन्धिना प्रतिस्पर्धमानो मन्निदेशे तेनाभिधीयमाने तं च मां च मत्पाणिग्रहणकालवृत्तां प्रकृतविप्रविपत्सजातीयां हिडिम्बसञ्जनितामात्मविपदं चावश्यं सम्मरन् कृपया मद्गृहमागत्य मामनु-

**हिडिम्बा** — (क) उम्मत्तअ! अभिवादेहि पिदरं।

**घटोत्कच.** — भोस्तात! अहं स धार्तराष्ट्रवनदवाग्निर्घटोत्कचोऽभिवादये। पुत्रचापलं क्षन्तुमर्हसि।

**भीमसेनः** — एह्येहि पुत्र! व्यतिक्रमकृतं कान्तमेव। (इति परिष्वज्य) धार्तराष्ट्रवनदवाग्निपुत्रापेक्षीणि पितृहृदयानि। पुत्र! अतिबलपराक्रमो भव।

**घटोत्कचः** — अनुगृहीतोऽस्मि।

(क) उन्मत्तक! अभिवादय पितरम्।

---

गृह्णीयाद्' इति। ततस्तच्चोदनया मानुषग्रहणे तथैव पुत्रेणारब्धे तस्याः स्वभर्तृसमागमो यथामनोरथं सिद्ध इति तदिदं मानुषग्रहणचोदनायाः प्रयोजनं सुप्रपन्नम्। एवञ्च, यत्तद् भीमसेनस्य प्रोषितभ्रातृकत्वम्, आश्रमविप्रकृष्टदेशावस्थानं, तदासन्ने वर्त्मनि घटोत्कचस्य मातृनिदेशाद् व्रतार्थं पान्थद्विजग्रहणम्, हिडिम्बारहस्योक्तिश्रवणपरितुष्टस्य भीमसेनस्य हिडिम्बासमुदाचारशुद्धावात्मविस्रम्भप्रकाशनं च महाकविना कल्पितं, तस्य सर्वस्यार्थवत्ता समर्थिता वेदितव्या ॥

पितृविषयस्वापराधचिन्तया तदभिवादनसमुदाचारं विस्मृत्य तिष्ठन्तं पुत्रं तदभिवादनायादिशति — **उम्मत्तअ** इत्यादि ॥

**भो** इत्यादि। सः भवत्परीक्षितबलपराक्रमः। धार्तराष्ट्रवनदवाग्निः धार्तराष्ट्रा धृतराष्ट्रपुत्रा दुर्योधनादयः शतं, त एव समूहरूपत्वाद् वनं तस्य दवाग्निः दवसंज्ञितो वह्निः। दवशब्दो वनाग्निवाची। अथवा धार्तराष्ट्राणां वनं लक्षणया समूहो धार्तराष्ट्रवनं तदेव दवः अरण्यं, तस्य अग्निः। एतेन स्वपितृद्रोहिधार्तराष्ट्रध्वंसनं प्रत्यात्मनः सन्नद्धत्वं शक्तत्वं चोक्तम्। तद्धि शत्रुत्पादितवनवासकृच्छ्रगतस्य पितुः पुत्रमुखाच्छ्रोतव्यं प्रियतरमिति तदाख्यानस्याभिवादनवाक्ये पुरस्करणम्। पुत्रचापलं पुत्रस्य चपलकर्म अभियोधनम्। 'दवदावौ तु वनवह्नौ वनेऽप्युभौ' इति मेदिनी ॥

**एह्येहीत्यादि**। व्यतिक्रमकृतं व्यतिक्रमः समुदाचारलङ्घनं तेन कृतम्। अर्थान्मदभियोधनम्। कान्तमेव स्वद्बलपराक्रमज्ञानजननेन मम हृद्यमेव। 'क्षान्तमेव' इति मातृकान्तरपाठो न हृद्यः। पितृहृदयानि पितॄणां पञ्चानामस्माकं हृदयानि ॥

**अन्वित्यादि** ॥

**वृद्धः** — एवं, भीमसेनपुत्रोऽयं घटोत्कचः ।

**भीमसेनः** — पुत्र ! अभिवादयात्रभवन्त केशवदासम ।

**घटोत्कचः** — भगवन् ! अभिवादये ।

**वृद्धः** — पितृसदृशगुणकीर्तिर्भव ।

**घटोत्कचः** — अनुगृहीतोऽस्मि ।

**वृद्धः** — भो वृकोदर ! रक्षितमस्मत्कुल, स्वकुलमुद्धृत च । गच्छाम-स्तावत ।

**भीमसेनः** —

अनुग्रहात् तु भवत सर्वमासीदिद शुभम् ।
आश्रमो दूरतोऽस्माकं तत्र विश्रम्य गम्यताम् ॥ ५० ॥

---

'जदु अय्यउत्तो' इत्यादि. प्रत्यभिवादावमानस्य यथादृतातस्य श्रवणेन राक्षसे भीमसेनपुत्रत्वमवधार्याह — **एवमित्यादि** । यद्यपि 'कौरव्यकुलदीपेन' इति, 'पितुर्मे भीमसेनस्य' इति चात्मनो भीमसेनपुत्रत्व राक्षसेन पूर्वमाख्यात, तथापि भीमसेनेन तदननुमोदनात् पितृभावविपरीताचरणाच्चासत्य तदिति बुद्ध्या ब्राह्मणेन न गणितम् । अथवा समुपस्थितविपद्व्याकुलतावशात् पूर्ववाक्ययोस्तेना वधान न दत्तम् ॥

ब्राह्मणाभिवादनाय पुत्रमादिशति **पुत्रेत्यादि** ॥

**भगवन्नित्यादि** ॥

**पितृसदृशेत्यादि** । इह गुण. पुत्रदर्शितनिर्दय-वप्रतीपा पितृप्रकाशिता दया ॥

**अनुगृहीत्यादि** ॥

पान्थः कृतज्ञता प्रकाशयन् जिगमिषया भीमसेनमामन्त्रयते **भो इ-त्यादि** । स्वकुल पाण्डवकुलम् । उद्धृत शत्रुजनितायाः विपत्तेर्निस्तारितमित्यर्थः अनेन वाक्येन ब्राह्मणकुलोद्धरणपुण्यस्य पाण्डवकुलोद्धरण फल निर्दिश्यते । अभू-तस्यापि तस्य क्तप्रत्ययेन भूतत्वाख्यानमवश्यम्भावित्वशीघ्रभावित्वयोर्बोधनार्थम् ॥

ब्राह्मण सत्कुर्वन्नाह — **अनुग्रहादित्यादि** । इद सर्वं यद् मत्पुत्रकृत भवद्-ग्रहण यच्च भवत्परित्राणार्थं मदागमन तदुभयमित्यर्थः । शुभ मङ्गल भवत्परित्रा-णसिद्ध्या मम दारपुत्रसमागमसिद्ध्या च मङ्गलपर्यवसायीत्यर्थः । आसीत् । आ-

**वृद्धः** — कृतमातिथ्यमनेन जीवितप्रदानेन । तस्माद्गच्छामस्तावत् ।

**भीमसेनः** — गच्छतु भवान् सकुटुम्बः पुनर्दर्शनाय ।

**वृद्धः** — बाढम् । प्रथमः कल्पः ।

(निष्क्रान्तः सकलत्रपुत्रः केशवदासः ।)

**भीमसेनः** — हिडिम्बे ! इतस्तावत् । वत्स ! घटोत्कच ! इतस्तावत् । तत्रभवन्तं केशवदासमाश्रमपदद्वारमात्रमपि सम्भावयिष्यामः ।

यथा नदीनां प्रभवः समुद्रो यथाहुतीनां प्रभवो हुताशः ।
यथेन्द्रियाणां प्रभवं मनोऽपि तथा प्रभुर्नो भगवानुपेन्द्रः ॥ ५१ ॥

(निष्क्रान्ताः सर्वे ।)

---

मध्यमव्यायोगोऽवसितः ॥

---

श्रमः, अस्तीति शेषः । विश्रम्य मदीयातिथ्यस्वीकारादिना मार्गसञ्चारपरिखेदम् पनीयेत्यर्थः ॥ ५० ॥

कृतमित्यादि ॥

गच्छत्विति । भवान्, पुनर्दर्शनाय गच्छतु अस्मभ्यं पुनर्दर्शनं दातुं गच्छतु, पुनर्दर्शनदानं पुनरागमनसाध्यमिति पुनरागमनाय गच्छत्विति फलितो ऽर्थः । 'क्रियार्थोपपदस्य कर्मणि स्थानिनः' इति चतुर्थी ॥

बाढमिति । बाढम् अङ्गीकृतम् अर्थाद् भवदर्थितं मम पुनरागमनम् । अङ्गीकारं द्रढयितुमाह — प्रथमः कल्पः स मुख्यो विधिः । पुनरागमनं मम मुख्यं कार्यमित्यर्थः ॥

विप्रस्य प्रस्थितस्यानुगमनसत्कारं चिकीर्षुराह — **हिडिम्बे** इत्यादि । आश्रमपदद्वारमात्रमपि सम्भावयिष्यामः आश्रमपदद्वारमात्रमवधीकृत्यापि सत्करिष्यामः, अर्थादनुगमनेन । अपिशब्देन सम्भावनस्याश्रमपदद्वारमात्रपर्यन्ततायाः अवरकल्पत्वं द्योतयति । आ आश्रमपदद्वारमात्राद् आश्रमपदद्वारमात्रमिति 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावः ।

इत्थं व्यायोगार्थं परिसमाप्य 'प्रशस्तिः शुभशंसनम्' इत्युक्तलक्षणं निर्वह-

णसन्धिचरमाङ्गं प्रशस्तिमाह — यथेति । यथा समुद्रः, नदीनां, प्रभवः ईशिता उत्पत्तिलयहेतुत्वात् । यथा हुताशः अग्निः । आहुतीनां होमानां हुतद्रव्याणां वा । प्रभवः स्वामी भोक्तृत्वात् । यथापि अपिशब्द उपमासमुच्चये । मनः इन्द्रियाणां चक्षुरादीनां । प्रभुव स्वामि, प्रेरकत्वात् । तथा, भगवान् भगः षाड्गुण्यम् 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥' इत्युक्तप्रकारम्, तद्वान् । उपेन्द्रः विष्णुः । नः अस्माकं । प्रभुः नाथः भवति । अतः सोऽस्मान् परित्रायतामिति प्रार्थना गम्यते । प्रभवति ईष्टे इत्यर्थ पचाद्यचा प्रभवशब्दस्य वाच्यलिङ्गस्य सिद्धिः ॥ ५१ ॥

निष्क्रान्ताः सर्वे इति व्यायोगपरिसमाप्तम् ॥

---

ताम्रपर्ण्यमृताद्रपूततरुवाग्रहारगतशशाः
वञ्चिमूलकरामवर्मकुलशेखरक्षितिपरक्षितः ।
मध्यमाख्यमिदं महोर्जितगुणाकरं गणपतिः सुधीः
भासनाटकमण्डले किमपि रूपकं विवृतवानिति ॥
वाग्देव्या वरिवस्येव यदिदं मम जल्पनम् ।
भूयान्मय्येतया नित्यं सुप्रसन्ना सरस्वती ॥

इति श्रीमदनन्तशयनवास्तव्यस्य ताम्रपर्णीतारवर्तितरुवाग्रहारा
भिजनस्य श्रीसीताम्बारामसुब्रह्मण्यार्यसूनोः
गणपतिशास्त्रिणः कृतिषु
मध्यमव्यायोगव्याख्यानं
सम्पूर्णम् ।

---

शुभं भूयात् ॥

# श्लोकानुक्रमणिका ।


| | पृष्ठम् । |
|---|---|
| अनुग्रहात् नु | ४१ |
| अस्माकं भ्रष्ट | ३८ |
| अस्यामाचम्य | २५ |
| आक्रम्य राक्ष (वसन्ततिलक) | ३६ |
| आपद | १५ |
| इद हि (वंशस्थं) | ९ |
| कलभदशन (मालिनी) | ६ |
| काञ्चनस्तम्भ | ३२ |
| किं यासि (वसन्ततिलक) | ७ |
| कृतकृत्य | १३ |
| कौरव्यकुल | २० |
| खगशत (पुष्पिताग्रा) | २० |
| ग्रहयुगल (मालिनी) | ५ |
| जानामि सर्वत्र (उपजाति) | ८ |
| ज्येष्ठ श्रेष्ठ | १४ |
| ज्येष्ठो भ्राता | १५ |
| तरुण! तरुण । (पुष्पिताग्रा) | १८ |
| तरुणरवि । (पुष्पिताग्रा) | ५ |
| त्यक्ता, प्रागेव | २० |
| धन्योऽस्मि | १६ |
| नन्वह भीम | ३३ |
| निवृत्तव्यव | २७ |
| पत्न्या चारित्र | १२ |
| परिष्वजस्व | १७ |
| पायात् स (वसन्ततिलकं) | १ |
| पुत्रसक्षत्र | २६ |

| | पृष्ठम । |
|---|---|
| ब्राह्मण श्रुत | १२ |
| भो शब्दोच्चा | ३ |
| भ्रातृणां मम | २७ |
| मध्यमः पञ्च | २२ |
| मध्यमस्त्विति | २४ |
| मध्यमोऽह | २३ |
| मम प्राणै | १४ |
| माता किल | २८ |
| मायापाशेन | ३४ |
| मुच्यतामिति | २८ |
| यथा नदीना (उपेन्द्रवज्रा) | ४२ |
| यथार्थिनो | १२ |
| यस्त्रिशृङ्गो | १८ |
| युद्धप्रियाश्च (वसन्ततिलक) | ९ |
| रूप सत्त्व | २० |
| वज्रपातो | ६ |
| विनिमाय | १६ |
| विश्वकर्ता | ३२ |
| व्रजसि कथ (मालिनी) | ३३ |
| शपामि सत्येन (उपजाति) | ३१ |
| शैलकूट | ३३ |
| श्रान्तैः सुतैः (वसन्ततिलक) | ४ |
| सजलजलद (मालिनी) | २६ |
| सिंहाकृति (वसन्ततिलक) | २२ |
| सिंहास्यः (स्रग्धरा) | २१ |

# वृत्तलक्षणम्।

'स्यादिन्द्रवज्रा यदि तौ जगौ गः।' | अनयोर्मिलनादुप-
'उपेन्द्रवज्रा जतजास्ततो गौ।' | जातिः काचित्।
'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा।'
'ननमयययुतेयं मालिनी भोगिलोकैः।'
'जतौ तु वंशस्थमुदीरितं जरौ।'
'उक्तं वसन्ततिलकं तभजा जगौ गः।'
'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्।'

---

# व्यायोगादिलक्षणम्।

''ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः।
हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद्रसाः॥
अस्त्रीनिमित्तसंग्रामो जामदग्न्यजये यथा।
एकाहचरितैकाङ्को व्यायोगो बहुभिर्नरैः॥''
''यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते॥''
''आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥''
''आसूत्रयन् गुणान् नेतुः कवेरपि च वस्तुनः।
रङ्गप्रसाधनप्रौढः सूत्रधार इहोदितः॥''
''कुशीलवकुटुम्बस्य स्थलं नेपथ्यमुच्यते।''
''सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम्।
स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत् तदामुखम्॥
प्रस्तावना वा''
''विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः।
नीतः सदस्यरस्यत्वमुत्साहो वीर उच्यते॥''

---